ओं आं क्रों ह्रीं कुवेरागच्छागच्छ कुवेराय स्वाहा ।

सास्नावाचालकिंकिण्यनणुरणनझणत्कारमंजीरसिंजा
रम्योद्यच्छृंगहेलाविहरदुरुशरच्चंद्रशुभ्रर्षभस्थम् ।
भास्वद्भूपाभुजंगभुजगासितजटाकेतकार्द्धेंदुचूलं
दधत्शूलं कपालं सगणवामिहार्चामि पूर्वोत्तरेशम् ॥ १९४ ॥
ओं आं क्रों ह्रीं ईशानागच्छागच्छ ईशानाय स्वाहा ।

इत्यादि तथा "ओं आं" इत्यादि बोलकर वायुको अर्घ चढावे ॥१९२॥ "हांसो" इत्यादि तथा "ओं" इत्यादि पढकर कुवेरको अर्घ चढावे ॥ १९३ ॥ "सास्ना" इत्यादि तथा "ओं" इ-

इत्यर्हन्मदुसामवायिकनयाह्वानादियोग्यक्रमं—
दिक्पालाः कृततुष्टयः परिजनोत्कृष्टाश्रियोष्टाप्यमू ।
द्रष्टा कामदमर्हदध्वरमरं दिक्चक्रमाक्रामतो
भव्यान् संदधतः शुभैः सह भजंत्वेतर्हि पूर्णाहुतिम् ॥ १९५ ॥

पूर्णाहुतिः । इति दिक्पालार्चनविधानम् । अथ दिक्चतुष्टयनिविष्टप्रभावनोद्भटयक्षानुकूलनम् ।

प्रभुं भक्तुमिहागत्य प्राचीं चिन्वान्निजाश्रिया । बलिं विजययक्षेश मंत्रपूतां स्वसात्कुरु ॥१९६॥

ओं ह्मल्व्र्यूं विं विजययक्ष बलिं गृहाण गृह्ण गृह्ण स्वाहा ।

अत्रापाचीमलंकृत्य भजमानो जगत्पतिम् । यथार्हबलिसंतुष्टो वैजयंत जयंत नु ॥ १९७ ॥

ओं ह्मल्व्र्यूं वैं वैजयंत बलिं........................ ।

देवाधिदेवसेवायै प्रतीचीं दिशमास्थितः । बलिदानेन संप्रीतो जयंत जय दुर्जयान् ॥ १९८॥

ॐ ह्मल्व्र्यूं जं जयंत बलिं.................................. ।

त्यादि कहकर ईशानको अर्घ चढावे ॥ १९४ ॥ "इत्यर्ह" इत्यादि बोलकर पूर्णार्घ चढावे ॥ १९५ ॥ इसतरह दिक्पालोंकी पूजाविधि पूर्ण हुई । अब चारों दिशाओंके यक्षोंका सत्कार करते हैं । "प्रभुं" इत्यादि तथा "ओं" इत्यादि बोलकर विजययक्षको अर्घ चढावे ॥ १९६ ॥ "अत्रापा" इत्यादि तथा "ओं" इत्यादि बोलकर वैजयंतको अर्घ चढावे ॥ १९७ ॥ "देवाधि इत्यादि तथा "ओं"इत्यादि बोलकर जयंतको अर्घ चढावे ॥ १९८ ॥ " उदीची " इत्यादि

उदीचीं भूषयन् भूत्या सर्वज्ञोपासनोत्सुकः । अपराजित यक्ष त्वं प्रीयस्व बलिनामुना॥१९९॥

ॐ झ्म्ल्व्र्यूं अं अपराजित बलिं.. ।

एवं संमानिता यूयं जिनेंद्रसमये रताः । प्रतिष्ठासमयेऽमुष्मिन् यतध्वं विश्वशांतये ॥ २०० ॥

पूर्णाहुतिः । इति विजयादियक्षानुकूलनविधानम् । अथैशानदिश्यनावृतार्चनम् ।

जंबूवृक्षस्य नानामणिमयवपुषः प्राच्यजंबूद्रुतस्य
प्राक्शाखामावसंतं नवजलदरुचं पक्षिराजाधिरूढम् ।
कुंडीशंखाक्षमालारथचरणकरं त्राणनिःशेषजंबू—
द्वीपश्रीकं यजेस्मिन् विधुरविधुतयेनावृतं व्यंतरेंद्रम् ॥ २०१ ॥

ओं दशदिशाधिनाथं त्रैलोक्यदंडनायकं जंबूद्वीपाधिपतिं गरुडपृष्ठमारूढं स्निग्धभिन्नांजनाभमक्षसूत्रकमंडलुन्यग्रहस्तं चतुर्भुजं शंखचक्रविधृतभुजादंडं यक्षिणीसहितं सपरिजनं सपरिवारमनावृतं देवं समाह्वयामीह स्वाहा हे अनावृतागच्छागच्छ अनावृताय स्वाहा अनावृतपरिजनाय स्वाहा ।

तथा "ओं" इत्यादि बोलकर अपराजितको अर्घ चढावे ॥१९९॥ "एवं संमा" इत्यादि श्लोक बोलकर पूर्णार्घ चढावे ॥ २०० ॥ इस प्रकार विजयादि यक्षोंका सत्कार हुआ । अब ईशानदिशाके अनावृत यक्षकी पूजा कहते हैं । "जंबूवृक्ष" इत्यादि तथा "ओं दश" इत्यादि पढकर जल आदि अष्ट द्रव्य चढावे ॥ २०१ ॥ "व्रतांते" इत्यादि तथा "ओं ह्रीं" बोलकर

ब्रह्मांते दिक्षु रुद्राद्यधिपतिषु समाग्न्यामसूर्याभपूर्व—
द्विद्विस्वर्भूगणैकोत्तरभूतिषु वसंत्यष्ट सारस्वताद्याः ।
यद्वर्गास्ते स्वतंत्राः क्षतविषयतृषो भाविजन्माप्यमोक्षाः
पूर्वज्ञा मेघ लौकांतिकसुरमुनयस्तीर्थकृच्छंसिनोऽर्च्याः ॥ २०२ ॥

ओं ह्रीं लौकांतिकदेवेभ्यः पुष्पांजलिं निर्वपामीति स्वाहा । ब्रह्मेंद्रोपरि देवर्षिपुष्पांजलिः ।

मुख्योपचारिकचरित्रचितोरुपुण्यपाकाक्षयस्थसितरत्नविमानवासान् ।
अर्हत्प्रतिष्ठितिमिमामनुमोदमानान् संमानयामि कुसुमांजलिनाहमिंद्रान् ॥ २०३ ॥

ओं ह्रीं अहमिंद्रदेवेभ्यः पुष्पांजलिं निर्वपामीति स्वाहा । अच्युतेंद्रोपरि अहमिंद्रपुष्पांजलिः ।

अथ विधिशेषम् ।

पूर्वादिदिक्षु वेद्या मंगलशांतिकजयेष्टसिद्ध्यर्थम् ।
मंगलशस्त्रपताकाकलशानथ योजयेष्टशः क्रमशः ॥ २०४ ॥

मंगलादिस्थापनाप्रतिज्ञानाय दिक्षु पुष्पाक्षतं क्षिपेत् ।

लौकांतिक देवोंके लिये पुष्पोंको चढावे ॥ २०२ ॥ "मुख्यो" इत्यादि तथा "ओं ह्रीं" बोलकर अहमिन्द्र देवोंके लिये पुष्पांजलि चढावे ॥ २०३ ॥ अब शेष विधान कहते हैं । "पूर्वादि" इत्यादि श्लोक पढकर मंगल आदि आठ द्रव्योंकी स्थापनाके लिये दिशाओंमें पुष्प अ-

प्राग्वत् प्रार्च्यं तथा दलेष्वनुदिशं देवीर्जयाद्याः पृथक्—
जंभाद्याश्च विदिग्दलेषु धिनुयां दिग्द्वाररैराक्षिणः ॥ २१४ ॥

बहिर्मंडलपूजाप्रतिज्ञानाय पुष्पांजलिं क्षिपेत् । अत्रापि पूर्ववत् कर्णिकाः परब्रह्मादिपदैः पूरयित्वा तत्पद्मदलेषु पूर्वादिदिक्षु ओं जये स्वाहा, ओं विजये स्वाहा, ओं अजिते स्वाहा, ओं अपराजिते स्वाहा । आग्नेय्यादिविदिक्षु च ओं जंभे स्वाहा, ओं मोहे स्वाहा, ओं स्तंभे स्वाहा, ओं स्तंभिनि स्वाहा इति लिखित्वा बहिश्चतुर्द्वारचतुष्कोणमंडलं विलिख्य तद्बहिः पूर्ववद्दिक्पालान् द्वारपालान् यक्षदेवांश्च संस्थाप्य चिद्रूपं विश्वरूपेत्यादिविधिना कर्णिकार्चनं संक्षेपेण कृत्वा जयादिदेवीर्दिक्पालान् द्वारपालान् यक्षांश्च पूजयेत् । अथ जयादिदेवतार्चनम् ।

जयाद्याः शब्दये युष्मानायात सपरिच्छदाः । अत्रोपविशतैता वो यजे प्रत्येकमादरात् २१५

काष्ठासन (पट्टा) स्थापित करे ॥ २१३ ॥ अब चार पीठोंकी पूजा कहते हैं । "तद्वेदीं" इत्यादि श्लोक कहकर बाह्यमंडलकी पूजाके लिये पुष्पोंको क्षेपण करे ॥ २१४ ॥ यहांपरभी पहलेकी तरह कर्णिकामें अरहंत आदि पदोंको लिखकर उस कमलपत्रपर पूर्व आदि दिशाओंमें "ओं जये" इत्यादि चार पद लिखे । फिर आग्नेयी आदि विदिशाओंके पत्तोंपर "ओं जंभे" इत्यादि चार पद लिखे । उसके बाद बाहरके चार दरवाजोंपर चौकोन मंडल लिखकर उसके बाहर पहलेकी तरह दिक्पाल, द्वारपाल और यक्षदेवोंको स्थापन करके "चिद्रूपं" इत्यादि कही हुई विधिसे कर्णिकाकी संक्षेपसे पूजा करे । फिर जयादि देवी, दि-

आवाहनाद्दिपुरस्सरप्रत्येकपूजाप्रातिज्ञानाय पुष्पाक्षतं क्षिपेत् ।

जये जयाद्ये विजये विजैनि जैने जितपराजितेस्मिन् ।
जंभेवमोहनेस्ति भाः स्तंभिनि रक्ष रक्षास्मान ॥ २१६ ॥

स्वोपग्रहाय पत्रेषु पुष्पाक्षतानि क्षिपेत् । अथ प्रत्येकपूजा ।

इहार्हतो विश्वजनीनवृत्तेः कृतौ कृताराातिजये जये त्वाम् ।
सद्गंधपुष्पाक्षतदीपधूपफलादिसंपादनया धिनोमि ॥ २१७ ॥

ओं ह्रीं जये देवि आगच्छागच्छ इदं.................................. ।

जिनाधिराजे विजयैकविद्ये जगद्विजेतुः कुसुमायुधस्य ।
विजेतरि स्फारितभूरिभक्ति त्वामत्र यज्ञे विजये यजेहम् ॥ २१८ ॥

ओं ह्रीं विजये देवि.. ।

कपाल, द्वारपाल, और यक्षोंको पूजे ॥ अब जया आदि देवताओंकी पूजा कहते हैं । जया इत्यादि श्लोक बोलकर आवाहनादिपूर्वक हर एककी पूजा करनेकी प्रतिज्ञाके लिये पुष्प-अक्षतोंको क्षेपण करे॥ २१५॥ "जये" इत्यादि श्लोक बोलकर अपने उपकारके लिये पत्रोंपर पुष्प अक्षतको क्षेपण करे ॥ २१६ ॥ अब प्रत्येककी पूजा कहते हैं। "इहा" इत्यादि तथा "ओं ह्रीं" बोलकर जया देवीको जलादि आठ द्रव्य चढावे ॥ २१७ ॥ "जिना" इत्यादि तथा "ओं ह्रीं" बोलकर विजयाको अर्घ चढावे ॥ २१८ ॥ "जग" इत्यादि तथा "ओं ह्रीं"

जगज्जयोज्जागरिणां कषायद्विषां न केनापि जितं जिनेंद्रम् ।
आवर्जयंतामृजितोर्जितोजामूर्जासये त्वामजितेर्चयामि ॥ २१९ ॥

ओं ह्रीं अजिते... ।

पराजितारेरपराजिताख्रैरप्याश्रितस्यारिपराजयाय ।
जगत्प्रभोरत्र महे महामि पराजिते त्वामपराजितेत्र ॥ २२० ॥

ओं ह्रीं अपराजिते... ।

व्यामोहनिद्रां भुवनानि जंभ विशंत्युद्धरतो जिनस्य ।
वितन्वतां यज्ञप्रजन्यहंत्रीं त्वा देवि जंभे परिपूजयामि ॥ २२१ ॥

ओं ह्रीं जंभे... ।

चिरं जगन्मोहविषेणसुप्तं स्याद्वादमंत्रेण विबोधयंतम् ।
श्रीबुद्धमाराधयतां हि मोहे त्वां मोहयंतीमहितान्महामि ॥ २२२ ॥

ओं ह्रीं मोहे... ।

बोलकर अजिताको जलादि चढावे ॥ २१९ ॥ "पराजि" इत्यादि तथा "ओं ह्रीं" बोलकर अपराजिताको जलादि आठ द्रव्य चढावे ॥ २२० ॥ "व्यामोह" इत्यादि तथा "ओं ह्रीं" बोलकर जंभा देवी पर जलादि चढावे ॥ २२१ ॥ "चिरं" इत्यादि तथा "ओं ह्रीं" बोलकर

जिनं महाभव्यविशुद्धिभावप्रासादसुस्तंभमुपास्ति यस्तम् ।
प्रकुर्वतं स्तंभयतां स्तभंतं स्तंभे सृजंतीं भवतीं यजामि ॥ २२३ ॥

ओं ह्रीं स्तंभे देवि.. ।

प्रवादिनां स्तंभयतोत्र मानस्तंभेन दूरादपि मंक्षु मानम् ।
जिनेस्य यज्ञेर्चनया सपत्नधीस्तंभिनि स्तंभिनि संस्तुवे त्वाम् ॥ २२४ ॥

ओं ह्रीं स्तंभिनि देवि.. ।

इत्येताः पृथुयशसो जयादिदेव्यो देशामभिरुचिते जिनेंद्रयज्ञे ।
पूर्णाहुतिमिह लंभिताः प्रपूज्य श्रेयांसि प्रददतु भव्यभाक्तिकेभ्यः॥ २२५ ॥

पूर्णाहुतिः ।

प्राच्याद्याग्नेयकोणादिपत्रेष्विष्टाः क्रमादिमाः। अष्टौ जयादिजंभादिदेव्यः शांतिं वितन्वताम् ॥

इष्टप्रार्थना । इति जयादिदेवतार्चनाविधानम् । अथ दिक्पालान् द्वारपालान् यक्षांश्च संक्षेपेण सत्कुर्यात् । इति बहिर्मंडलचतुष्टयार्चनविधानम् ।

मोहा देवीको जल आदि द्रव्य चढावे ॥ २२२ ॥ "जिनं" इत्यादि तथा "ओं ह्रीं" बोलकर स्तंभादेवीको जल आदि द्रव्य चढावे ॥ २२३ ॥ "प्रवादि" इत्यादि तथा "ओं ह्रीं" बोलकर स्तंभिनीको जल आदि द्रव्य चढावे ॥ २२४ ॥ "इत्येताः" इत्यादि श्लोक बोलकर स-

इत्थं निष्ठितपूज्यपूजनविधिः शक्रो महार्घेण तां
त्रिर्वेदीमवतार्य भूतिभरतो भक्त्या परीत्यानतः ।
सद्धूपाश्चतुरोऽपि वा सुकुसुमैस्तं जापयन् प्रतस—
द्रूपं मंत्रमनादिसिद्धमुरुधीरीशानवेदीं यजेत् ॥ २२७ ॥

णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं णमो उवज्झायाणं णमो लोए सव्वसाहूणं। चत्तारि मंगलं अरहंतमंगलं सिद्धमंगलं साहुमंगलं केवलीपण्णत्तो धम्मो मंगलं। चत्तारि लोगोत्तमा अरहंतलोगोत्तमा सिद्धलोगोत्तमा साहुलोगोत्तमा केवलिपण्णत्तो धम्मो लोगुत्तमा। चत्तारिसरणं पव्वज्जामि अरहंतसरणं पव्वज्जामि सिद्धसरणं पव्वज्जामि साहुसरणं पव्वज्जामि केवलिपण्णत्तो धम्मो सरणं पव्वज्जामि ह्रौं स्वाहा। अनादिसिद्धमंत्रः। इति मूलवेदिकार्चनविधानम्। अथोत्तरवेदिकार्चनम्।

वेद्यां चान्यां सुरगिरिशिलावेदिरत्कर्णिकायां
माग्वन्मंत्रानथ कजदलेष्वष्टसु श्र्यादिदेवीः ।

धको पूर्णार्घ देवे ॥ २२५ ॥ "प्राच्या" इत्यादि श्लोक बोलकर इष्टवस्तुकी प्रार्थना करे ॥ २२६ ॥ इसतरह जया आदि देवताओंकी पूजा हुई। इसके बाद दिक्पाल, द्वारपाल और यक्षोंका संक्षेपसे सत्कार करे ॥ इसप्रकार बाह्य मंडलचतुष्ककी पूजाविधि जानना। "इसप्रकार" वह इंद्र पूजाविधि करके अनादि सिद्ध मंत्रको जपता हुआ ईशानवेदीको पूजे ॥ २२७ ॥ "णमो" इत्यादि स्वाहातक अनादिसिद्ध मंत्र जानना ॥ इसतरह मूलवेदी-

अष्टेंद्रादीन् क्षितिपुरबहिर्दिक्षु देवीजयाद्या
न्यस्य द्वारेष्वनु च चतुरो यक्षदेवान् यजामि ॥ २२८ ॥

ईशानवेद्यां यागमंडलपूजाप्रतिज्ञानाय पुष्पांजलिं क्षिपेत् । अथ पूर्वविधिना कर्णिकांतःस्थापितां परब्रह्मादिपूजां विधाय पद्मदलेष्वष्टौ श्र्यादिदेवीः पूजयेत् । तथाहि ।

याः सामानिकपर्षदंबुजपरीवारान्वया ध्रुवंभू
पद्मादिह्रदपुष्करेंद्वुत्रिंशदप्रासादवासा मुदा ।
सेवंते बहुधा जिनेंद्रजननीं श्र्यादीन्नयंत्यो गुणान्
भांती पुष्पमुखैः करात्तकलशैस्ताः श्र्यादिदेवीर्यजे ॥ २२९ ॥

श्र्यादिदेवीसमुदायपूजाविधानाय पत्राष्टके कुंकुमालुलितपुष्पाक्षतं क्षिपेत् । अथ पृथगिष्टिः ।

की पूजाविधि हुई । अब उत्तरवेदीकी पूजा कहते हैं । "वेद्यां" इत्यादि श्लोक पढकर ईशानवेदीमें यागमंडलकी पूजा करनेके लिये पुष्पोंको क्षेपण करे ॥ २२८ ॥ अब पहले कही हुई विधिके अनुसार कर्णिकाके मध्यमें स्थापित अरहंत आदि परमेष्ठीकी पूजा करके आठ कमलपत्रोंपर श्री आदि आठ देवियोंकी पूजा करे । उसीको कहते हैं । "याःसामा" इत्यादि श्लोक बोलकर श्रीआदि देवीयोंके समूहकी पूजा करनेके लिये आठ पत्तोंपर केशरसे लेपे हुए पुष्पअक्षतोंको क्षेपण करे ॥ २२९ ॥ अब जुदी जुदी पूजा कहते हैं । "श्र्याद्याः"

पाशाः संशब्दये युष्मानायात सपरिच्छदाः। अत्रोपविशतैता वो यजे प्रत्येकमादरात्॥२३०॥

आवाहनादिपुरस्सरप्रत्येकपूजाप्रतिज्ञानाय पत्रेषु पुष्पाक्षतं क्षिपेत् ।

क्षोण्या पार्श्वततेंद्रकार्मुकतडिद्दंडद्युतिं तन्वतो
हिम्याद्रेरुपरित्यमुज्ज्वलयतः पद्मह्रदं पुष्करात् ।
यत्यद्रव्यवरैः सुरालहृदतैर्गर्भं विशोध्य श्रियं
तन्वाना जिनमातरं भजति या सा श्रीस्तडिद्धार्च्यते ॥ २३१ ॥

ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते श्रीदेवि आगच्छागच्छ इदं जलं........ ।

नानारत्नमयूखपार्श्वखचितक्षीरादवेलाक्षिपो
मूर्द्धन्युल्लसतो महाहिमवतः पद्मान् महापाशिके ।
संविद्वालसखीमुपेत्य विनयाल्लज्जां दृशोर्व्यंजती
यार्हन्मातुरुपासनां वितनुते सा ह्रीर्जपाभार्च्यते ॥ २३२ ॥

इत्यादि श्लोक बोलकर आवाहनादिपूर्वक हरएककी पूजा करनेकी प्रतिज्ञा करनेके लिये पत्तोंपर पुष्प और अक्षत क्षेपण करे ॥ २३० ॥ "क्षोण्या" इत्यादि तथा "ओं सुवर्ण" बोलकर श्रीदेवीको जल आदि आठ द्रव्य चढावे ॥ २३१ ॥ "नानारत्न" इत्यादि तथा "ओं रक्त" इत्यादि बोलकर ह्री देवीको अर्घ चढावे ॥ २३२ ॥ "उद्यंत" इत्यादि तथा "ओं

ओं रक्तवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते ह्रीदेवि इदं........................ ।

उद्यंतं सहतोभितो हरिधनुष्कीर्णां रविं सीकरै—
मूर्ध्नोर्वीं निषधस्य चुंबति महापद्मादपि ज्यायसी ।
कंजादेत्य तिगिंछ एधितरुचेर्धैर्यं परं पुष्यतीं
या जैनां भजतोंबिकामुपहरे तां चीनवर्णां धृतिम् ॥ २३३ ॥

ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते धृति देवि इदं..................... ।

पार्श्वोद्भासिविचित्ररत्नरुचिरां वैडूर्यगात्रीं गदां
द्वीपेनेव धृतां पुनात्युपरिमे नीलाचलं नीरजात् ।
भातः केसरिणि श्रियेत्य विधिवद्या सज्जयंती स्तुतौ
रुक्माभा वरिवस्यतीशजननीं तां कीर्तिमर्चाम्यहम् ॥ २३४ ॥

ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते कीर्तिदेवि इदं.................... ।

भास्वद्भक्तिविचित्रितोभयवपुर्भोगेंद्रनागप्रती—
क्षिष्णो रुक्मिगिरेर्महांतमुपरित्यं पुंडरीकं श्रितात् ।

स्व" इत्यादि बोलकर धृति देवीको जलादि चढावे ॥ २३३ ॥ "पार्श्वो" इत्यादि तथा "ओं स्व" इत्यादि बोलकर कीर्ति देवीको अर्घ चढावे ॥ २३४ ॥ "भास्वद्भ" इत्यादि तथा "ओं स्व" इत्यादि बोलकर बुद्धिदेवीको जलादि चढावे ॥ २३५ ॥ "रत्नाढ्य" इत्यादि तथा "ओं

याज्जादेत्य हिरण्यरुक्परिचरत्यर्हत्सवित्रीं जग—
द्योघं कंदलयंत्यलं बलिमहं तस्यै ददे शुद्धये ॥ २३५ ॥
ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते शुद्धिदेवि इदं.................... ।

रत्नांशुच्छुरितोभयांतकनकश्रोणींध्रशृंगास्निहः
रकुर्वाणमधित्यकां शिखरिणो यत्पुंडरीकं श्रिया ।
आवभाति ततोंबुजादुपरतावायै भवोद्भासिनी
भर्माभा जुपतेंविका जिनपतेर्लक्ष्मीं यजे तामहम् ॥ २३६ ॥
ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते लक्ष्मी देवि इदं............ ।

दृश्यादृश्यवपुर्भिरस्फुटशची साक्षात्सुखं श्यादिभि—
स्तत्तन्मंगलधारणादिविधाभिर्देव्या यदुद्भाव्यते
तत्मत्यूहवाहिष्कृतं विदधती तस्या मनोनिर्वृतिं
कांचित्कांचनकांतिरुत्किराति या शांतिर्मया सार्च्यते ॥ २३७ ॥
ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते शांति देवि इदं........... ।

सु" इत्यादि बोलकर लक्ष्मीदेवीको अर्घ चढावे ॥ २३६ ॥ "दृश्यादृश्य" इत्यादि तथा "ओं
सु" इत्यादि बोलकर शांतिदेवीको जलादि चढावे ॥ २३७ ॥ "संक्रांते" इत्यादि तथा "ओं

संक्रांतेंदु यथामुखीनवलवक्षार्क्षि जिनाध्यासितं
विभ्रत्यावपुषीश्वरे गुणगणे भोगेषु भक्तेषु च ।
देव्याः पुष्टिमनुक्षणं प्रगुणयंत्यन्यासु या स्तभ्यते
गांगेयांगरुगर्हतोर्हति महे सा पुष्टिरिष्टिं न काम् ॥ २३८ ॥

ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते पुष्टिदेवि इदं.................. ।

इत्यष्टौता दिक्कुमारीर्जिनांवापरिचारिकाः। प्रसाद्य हविषां पूर्णाः पूर्णाहुत्यो विदध्महे ॥२३९॥

पूर्णाहुतिः ।

एवं संभाविताः कर्तुर्जिनजन्ममहोत्सवम् । श्रीमुख्यदेवतास्त्वष्टास्तुष्टये संतु यज्वनाम् ॥२४०॥

इष्टप्रार्थनाय पुष्पांजलिं क्षिपेत् । एवं श्र्यादिदेवीरभ्यर्च्य दिक्पालादीन् पूर्ववत्क्रमेण पूजयेत् । इत्युत्तरवेदिकार्चनविधानम् ।

ऐतिह्यादिति यागमंडलमहं निर्वर्त्य वेदीविधिं
चिकृत्यं शुभभावसंपतिपरां निर्माप्य भव्यात्मनाम् ।

सु" इत्यादि बोलकर पुष्टि देविको जलादि चढावे ॥ २३८ ॥ "इत्यष्टे" इत्यादि श्लोक बोलकर पूर्णार्घ चढावे ॥ २३९ ॥ "एवं" इत्यादि श्लोक बोलकर इष्ट वस्तुकी प्रार्थनाकेलिये

दृष्ट्वामृश्य च सर्वशः प्रतिकृतीराशाधरोंतश्चरन्–
कीर्तिः सोत्तरसाधकोनुरहसं गच्छेत्पुरा कर्मणे ॥ २४१ ॥

इत्याशाधरविरचिते प्रतिष्ठासारोद्धारे जिनयज्ञकल्पापरनाम्नि यागमंडलपूजाविधानीयो नाम तृतीयोऽध्यायः ॥ ३ ॥

हे हुए क्रमसे पूजे । इस तरह उत्तर वेदीकी पूजा विधि हुई । मैंने (आशाधरने) यह वेदीका विधान शास्त्रके अनुसार कहा है । जो कोई इस विधीको जानकर और विचार कर करेगा वह मुमुक्षु भव्यजीव उत्तम सुखको अवश्य प्राप्त होगा ॥ २४१ ॥

इसप्रकार पं० आशाधर विरचित जिनयज्ञकल्प द्वितीय नामवाले प्रतिष्ठासारोद्धारमें यागमंडलकी पूजाविधी कहनेवाला तीसरा अध्याय समाप्त हुआ ॥ ३ ॥

॥ चतुर्थोऽध्यायः ॥ ४ ॥



अथो विविक्तदेशस्थः प्रतिष्ठाचार्यकुंजरः । प्रतिष्ठाविधये कुर्यात् परिकर्मेदमादृतः ॥ १ ॥

प्रागेकां सुखसंचार्यां प्रातिहार्यादिशालिनीम् । पुरोधाय सुरम्यार्च्यां प्रतिष्ठेयं निरूपयेत्॥२॥

शस्ताशस्तात्मभावार्जितवृषवृजिनच्छेददृप्यत्परा यः
स्वर्गाच्छ्वभ्रादथैत्य त्रिजगदुपकृतिव्यक्तिमाहात्म्यसंपत् ।
शक्राद्यैर्योऽतिरागादहमहमिकया सेव्यते सिद्ध्यधीशः
पश्यंत्यज्ञास्तदर्चां स्वचितामिह नये स्थाप्यतेऽर्हत्स तेभ्यः ॥ ३ ॥

अब चौथा अध्याय कहते हैं । याग मंडलकी पूजाके बाद उत्तम प्रतिष्ठाचार्य एकांतस्थानमें प्रतिष्ठा विधिके लिये इस आगे कहेजानेवाली क्रियाको करे ॥ १ ॥ सबसे पहले एक प्रतिमाको लावे । जोकि अच्छीतरह अपनेपर चल सके, प्रातिहार्य आदि सहित हो और देखनेमें बहुत अच्छी हो ॥ २ ॥ " शस्तां " आदि श्लोकोंमें जैसा प्रतिमाका वर्णन कि-

कल्याणैः श्रितभूतभाविसुनयत्रित्वैभयेः पंचाभि-
श्चित्तं वित्तमशेषमोहमथनाद्धासत्यविद्याभिदि ।
मत्यग्ज्योतिषि तीर्थकृत्वनियतं निर्वीजयोगे स्फुरद्
ध्यात्वार्चां स्थिरचित्क्षणाष्टकपदे यो क्षेत्रवीजाक्षरम् ॥ ४ ॥
द्रव्यैः स्वैः सुनयार्जितैर्जिनपतेर्विम्बं स्थिरं वा चलं
ये निर्माप्य यथागमं सुदृपदाद्यात्मात्मनान्येन वा ।
लग्ने वाल्गुनि लंभयंति तिलकं पश्यंति भक्त्या च ये
ते सर्वेपि महोदयांतमुदयभव्यां लभंतेऽद्भुतम् ॥ ५ ॥

प्रतिष्ठेयनिरूपणा । अथ सकलीकरणम् । अत्रादावनेन मंत्रेण स्वहस्तौ पवित्रयेत् । ओं णमो अरहंताणं णमो केवलिणे सुअंगदेवि पसत्थ हत्थेहिं हुं फट् स्वाहा । हस्तद्वयपवित्रकरणमंत्रः । ततः

भव्यजीव उत्तमपदको पाते हैं ॥ ३ । ४ । ५ । यह प्रतिमाका वर्णन हुआ । अव सकली-करण क्रिया कहते हैं । उसमें पहले "ओं णमो" इत्यादि मंत्रसे अपने हाथ पवित्र करे । उसके वाद सुरभिमुद्रा धारण करके इस आगेकी पवित्र विद्याको सात वार चिंतवन करे । वह विद्या "ओं णमो" से लेकर स्वाहा तक कही है। उसके वाद अंगन्यास करे वह [illegible]

सुरभिमुद्रां धृत्वा इमां शुचिविद्यां सप्तवारान् न्यसेत्। ओं णमो अरहंताणं णमो सिद्धाणं णमो आगासगामीणं णमो विज्झायाणं णमो सव्वोसाहिपत्ताणं णमो सयं बुद्धाणं णमो केवलिणे स्वाहा । इमा च। ओं अर्हन्मुखकमलवासिनि पापात्मक्षयंकरि श्रुतज्वालासहस्रप्रज्वलिते सरस्वति मम पापं हन हन क्षां क्षीं क्षु क्षौं क्षः क्षीरधवले अमृतसंभवे वं वं हूं स्वाहा । शुचीकरणमंत्रौ । ततः सकलीकुर्यात् । ओं अं नमः सुहृदये, ओं सिं स्वाहा शिरसि, ओं आं वषट् शिखायां, ओं ओं घे घे कवचं, ओं सां हूं फट् स्वाहा अस्त्रं, ओ हौं वषट् नयनयोः । पुनः ओं ह्रां णमो अरहंताणं स्वाहा हृदये, ओं ह्रीं णमो सिद्धाणं स्वाहा ललाटे, ओं ह्रूं णमो आइरियाणं स्वाहा शिरोदक्षिणे, ओं ह्रौं णमो उवज्झायाणं स्वाहा पश्चिमे, ओं ह्रः णमो लोए सव्वसाहूणं स्वाहा वामे । पुनस्तान्येव पदानि ललाटे मूर्ध्नि दक्षिणे पश्चिमे वामे चेति न्यसेत् । सकलीकरणमंत्रः । ततः ।

ओं " उसहाइजिणं पणमामि सया अमलो विरजो वरकप्पतरु ।
सवकामदुहा मम रक्ख सदा पुरु विज्जणही पुरु विज्जणिही ॥ ६ ॥

"ओं" इत्यादि पहला मंत्र बोलकर हृदय स्थानको स्पर्श करे । दूसरेसे मस्तकको, तीसरेसे चोटीको चौथेसे कवचको पांचवेंसे अस्त्रको. और छठेमंत्रसे नेत्रोंको छुए। अथवा "ओं ह्रीं" इत्यादि पहले मंत्रसे हृदयका स्पर्श करे, दूसरेसे मस्तकका, तीसरेसे शिरके दाहिनी तरफका, चौथेसे पश्चिमकी तरफका, पांचवेसे बांई तरफका स्पर्श करे। इन्हीं पदोंको बोलकर मस्त-

ओं " अट्ठेव य अट्ठसया अट्ठसहस्सा य अट्ठकोडीओ ।
रक्खंतु ते सरीरं देवासुरपणमिया सिद्धा ॥ ७ ॥ स्वाहा ।

अनेन स्वस्यांगप्रत्यंगपरामर्शः कार्यः । ततः ओं धनु धनु महाधनु । स्वाहा । इमां धनुर्विद्यां वामकरांगुलिपर्वसु विन्यस्य प्रतिमाग्रे वामपादांगुष्ठेन सरेफाग्रपुरस्सरं धनुरालिख्य वामपादेनाक्रम्य कायोत्सर्गेण स्थितः सन् ओं णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं णमो उवज्झायाणं णमो लोए सव्वसाहूणं थंभेइ जल जलण चिंतियमित्तेण पंचणमोकारो अरि मारि चोर राउल घोरुवसग्गं ह्रां ह्रीं ह्रूं ह्रौं ह्रः विणासेइ स्वाहा । इदं सप्तवारान् ह्युच्चार्य अष्टोत्तरशतं धनुर्विद्यामावर्तयेत् । इति सकलीकरण विधानं । अथ प्रतिष्ठा ।

करके दक्षिण पश्चिम और वांयें भागमें स्थापन करे ॥ यह सकलीकरण मंत्रकी क्रिया हुई । उसके बाद छठे सातवें दो श्लोकमंत्र पढकर अपने अंग उपांगोंको छुए ॥ ६ ॥ ७ ॥ उसके पीछे "ओंधनु" इत्यादि धनुषविद्याको वांयें हाथकी उंगलियोंके पोरुओंमें स्थापनकर प्रतिमाके आगे वांयें पैरके अंगूठेसे रेफ सहित बाणयुक्त धनुषको लिखकर बांये पैरसे आच्छादितकर खड्गासनसे "ओं णमो" इत्यादि स्वाहा पर्यंत मंत्रको सातवार मनमें बोलकर एकसौ आठवार धनुषमंत्रको जपै । इसतरह सकलीकरण क्रियाका कथन किया । अब प्रतिष्ठा करनेकी विधि कहते हैं;—सकलीकरणादि कर्म करनेके बाद प्रतिष्ठाचार्य वेदीके पूर्वसिंहासनके

कृतकर्माधुनावेदीं प्राच्यपीठाग्रभूतले । इह गंधांबुसंसेकसत्पुष्पप्रकारांचिते ॥ ८ ॥
भद्रासनं निवेश्यात्र विश्वकर्मसमक्षतः । गर्भावतारकल्याणं स्थापयापीदमर्हताम् ॥ ९ ॥

ओं मूलवेद्याः पूर्वस्यां दिशि जयादिपीठस्य पुरस्ताद्भद्रासनं निवेशयामीति स्वाहा । भद्रासननिवेशनम् ।

वंशक्षायिकदृक्सामिद्धसुधियां योस्मिन्मनूनामभू-
द्ये चेक्ष्वाकुकुरूग्रनाथहरियुग्वंशाः पुरोवेधसा ।
आधानादिविधिप्रबंधमहिताः सृष्टास्तदुत्थार्यभू-
भर्तृस्वामिकजीविता सुकुलजा जैन्यो जयंत्यंबिकाः ॥ १० ॥

भूत्यादित्रयदृग्विशुद्ध्यनुगचित्सत्कर्मणोआगम-
द्रव्यो गोतमगोत्रभागभिजनो नेमिस्तथा सुव्रतः ।
तद्वत्काश्यपगोत्रिणस्तदितरे णोकर्मनोआगम-
द्रव्योत्रेष्वभवन् स्वयं यदुदरेष्वंबाः प्रसीदंतु ताः ॥ ११ ॥

आगेकी जगहको गंधोदकसे छिडककर पुष्पोंको क्षेपण कर उस जगह पर कारीगरके सामने उत्तम सिंहासन रखे और "मैं अर्हत्प्रभुका गर्भकल्याणक स्थापन करता हूं" ऐसा कहे। उस समय "ओं मूल" इत्यादि मंत्र बोलना चाहिये ॥ ८ ॥ ९ "वंश" इत्यादि दो श्लोक बोलकर जिनमाताओंकी स्तुती करे ॥ १० ॥ ११ ॥ अब जिनमाताओंके नाम कहते है ;—

मरुदेवीं वृषस्यांबा विजयामजितस्य च । सुषेणां संभवेशस्य सिद्धार्थां नंदनप्रभोः ॥१२॥
सुमंगलाह्वां सुमतेः सुसीमां पद्मरोचिषः । वसुंधरां सुपार्श्वस्य लक्ष्मणां चंद्रलक्ष्मणः॥१३॥
रामां श्रीपुष्पदंतस्य सुनंदां शीतलार्हतः । विष्णुश्रियं श्रेयसश्च वासुपूज्यप्रभोर्जयाम् ॥१४॥
सुशर्मलक्ष्मीं विमलार्हतोऽनंतस्य सुव्रताम् । ऐरिणीं धर्मनाथस्य कमलां शांत्यधीशिनः १५
सुमित्रां कुंथुनाथस्य अरभर्तुः प्रभावतीम् । मल्लेः पद्मावतीं वप्रां सुव्रतस्य मुनीशिनः॥१६॥
विनतां नमिनाथस्य शिवां नेमिजिनेशिनः। देवदत्तां च पार्श्वस्य वीरस्य प्रियकारिणीम्॥१७॥
चतुर्विंशतिमप्येताः सवित्रीस्तीर्थकारिणाम् । स्थापयामीह तद्गर्भपवित्रितजगत्त्रयाः॥ १८ ॥

ऋषभनाथकी मरुदेवी अजितकी विजया, संभव नाथकी सुषेणा, अभिनंदनकी सिद्धार्था, सुमतिजिनकी सुमंगला, पद्मप्रभकी सुसीमा, सुपार्श्वकी वसुंधरा, चंद्रप्रभकी लक्ष्मणा, पुष्पदंतकी रामा, शीतलनाथकी सुनंदा, श्रेयांसनाथकी विष्णुश्री और वासुपूज्य प्रभुकी जया है ॥ १२ ॥ ॥१३॥१४॥ विमलनाथकी सुशर्मलक्ष्मी, अनंतनाथकी सुव्रता, धर्मनाथकी ऐरिणी, शांतिनाथकी कमला, कुंथुनाथकी सुमित्रा, अरनाथकी प्रभावती, मल्लिनाथकी पद्मावती, सुव्रतप्रभुकी देवदत्ता और महावीरप्रभुकी प्रियकारिणी—इन चौवीस जिनमाताओंकी स्थापना इस जगह करता हूं । इन्हींके गर्भसे तीन जगत पवित्र होता है । १५।१६।१७।१८ ॥ "ओं"

ओं मरुदेव्यादिजिनेंद्रमातरोत्र सुप्रतिष्ठिता भवंत्विति स्वाहा । जिनमातृस्थापनार्थं भद्रपीठस्योपरि पुष्पांजलिं क्षिपेत् ।

षण्मासान् भुवमेष्यतां नवदिवश्चाजग्मुपामर्हतां
पित्रोः सौधमपीद्धमुत्सृजाति या रैदो महेंद्राज्ञया ।
स्वर्णा गावधुतामरद्रुमफलासारभ्रमं कुर्वतीं
व्यक्तुं तामिह रत्नवृष्टिमुचितं मुंचामि पुष्पोच्चयम् ॥ १९ ॥

ओं धनाधिपते अर्हत्पितासौधे रत्नवृष्टिं मुंच मुंचेति स्वाहा । कनकशलाका रत्नपंचकविमिश्रचित्रकुसुमांजलिं भद्रपीठस्याग्रतः प्रकिरेत् । रत्नवृष्टिस्थापनं ।

सर्वर्तुकामिवरवस्त्रफलप्रसूनशय्यासनाशनाविलेपनमंडनानि ।
तत्तत्क्रियोपकरणानि तथेप्सितानि तीर्थेभशातुरुपदीकुरुतां धनेशः ॥ २० ॥

इत्यादि बोलकर जिनमाताओंकी स्थापनाके लिये सिंहासनके ऊपर पुष्पोंको क्षेपण करे । "षण्मासान्" इत्यादि तथा "ओं" इत्यादि बोलकर सोनेकी सलाई पांच तरहके रत्न—इनसे मिले हुए पुष्पोंको सिंहासनके आगे वखेरे । इस तरह रत्नवर्षाका स्थापन हुआ॥१९॥ "सर्वर्तु" इत्यादि तथा "ओं" इत्यादि बोलकर उत्तम कपड़े अंगूठी हार फल पत्र पुष्प आदिको सिंहासनके आगे रखे । इन सब वस्तुओंको शिल्पी ग्रहणकरे ॥ २० ॥ उसके बाद

ओं निधीश्वर जिनेश्वरमात्रे भोगोपभोगांगान्युपनयोपनयेति स्वाहा । चारुवस्त्रमुद्रिकाहारफलपत्रपुष्पादिकं पीठाग्रे प्रतिष्ठयेत् । तच्च सर्वं विश्वकर्मा गृह्णीयात् ।

माताको सोलह स्वप्नोंका देखना। गर्जताहुआ सफेद ऐरावत हाथी १ बैल २ सिंह ३ देव हस्तियोंसे स्नान कराई गई लक्ष्मी ४ लटकतीं दो फूलोंकी मालायें ५ चांदनीयुक्त पूर्णचंद्रमा ६ ऊगता हुआ सूर्य ७ कमलोंसे ढके हुए सुवर्णमई कलशे ८ सरोवरमें क्रीडा करता मछलियोंका जोड़ा ९ दिव्य सरोवर १० चंचल लहरोंवाला समुद्र ११ रत्नजड़ा सिंहासन १२ मणियोंसे जटित विमान १३ नागेंद्रका भवन १४ प्रकाशमानरत्नोंकी राशि १५ धूमरहित जलती हुए अग्नि १६—ये सोलह स्वप्न हैं इनको देखकर माताको जगना । उसके बाद अपने पतिसें स्वप्नोंका फल सुनना । वह इस तरह है—पहले स्वप्नमें सफेद ऐरावत हाथी देखनेसे उत्तम पुत्रका होना, बैलके देखनेसे तीन लोकका गुरु होना, सिंह देखनेसे अनंत बलसहित होना, स्नान कराई गई लक्ष्मीके देखनेसे इंद्रोंकर सुमेरु पर्वतपर अभिषेक होना, पुष्पमाला देखनेसे धर्मतीर्थका प्रवर्तक होना, पूर्णचंद्रमा देखनेसे संसारको आनंदित करना, सूर्यके देखनेसे तेजस्वी होना, दो सुवर्णके घड़े देखनेसे रत्नादिकी खानिका स्वामी होना, मछलियोंका जोड़ा देखनेसे बहुत सुखी होना, सरोवर (तालाव) देखनेसे शुभलक्षणों सहित होना, समुद्रके देखनेसे केवलज्ञानी होना, सिंहासनके देखनेसे बड़े भारी राज्यका अधिकारी होना, विमान देखनेसे स्वर्गसे आकर जन्म होना, नागेंद्रका भवन देखनेसे अवधिज्ञानी

मंद्रं गर्जतमैन्द्रं द्विपमुडुपशयं तत्सगंधं गवेंद्रं
सिंहं शैलेन दंतं जलरुहि कमलां स्नाप्यमानां सुरेभैः ।
दाम्नी खे लंबमाने भ्रमदलिपटले चंद्रिकाकीर्णदिक्कं
चंद्रं प्रद्योतमर्कं सरसि झषयुगं क्रीडदन्योन्यरक्तम् ॥ २१ ॥
कुंभौ हेमौ सुधाढ्यौ स्फुटकमलमुखौ छन्नमच्छाप्सरोब्जै-
श्चंचद्रत्नोर्मिमब्धिं तडिदुचितमरुच्चापजित्सिंहपीठम् ।
कांत्यान्योन्यं हसंत्या सुरफणिसदने द्यां करैः रंजयंतं
रत्नौघं प्रज्वलंतं ज्वलनमपि निशातुर्ययामे द्विरष्टौ ॥ २२ ॥
स्वप्नान् दृष्ट्वा प्रबुद्धा झटिति घटितमुच्छ्रृण्वती तूर्यनादान्
पत्युः प्रीतात्तदुक्त्या सुतनु सुतमिभस्ते स तादृग्महांतम् ।
सूते विश्वाग्रिमं गौः करिकुलकपितानंतवीर्यं रमेंद्रै-
र्मेरौ स्नाप्य द्विमालं वृषसमयकरग्लौः प्रजाह्लादहेतुम् ॥ २३ ॥
भास्वान् दीप्रं विशारिद्वयमतिसुखिनं कुंभयुग्मं निधीशं
कासारो लक्ष्मसारं परविदमुदधिर्विष्टरं प्राज्यराज्यम् ।

होना, रत्नराशिके देखनेसे अनेक गुणोंका खजाना होना, निर्धूम अग्निके देखनेसे कर्मरूपी ईंधनका जलाना—ये स्वप्नोंको फल है ॥ २१ । २२ । २३ । २४ ॥ स्वप्नोंको देखना स्थापन

घरेतारं सुरौकः फणिगृहमवधिज्ञानिनं सद्गुणाब्धि
रत्नौघोद्दीप्तमग्निः स्तमितिविदितसतत्फलैषार्हदंबा ॥ २४ ॥

षोडश सत्पुष्पाणि तावंत्येव च सत्फलानि परिवर्त्य पीठाग्रतः स्थापयेत् । स्वप्नावलोकनस्थापनम् ।

श्री ह्री धृते कीर्तिमती च लक्ष्मि शांते च पुष्टे च सहेत्य जिष्णोः ।
आज्ञानियोगेन तथा स्वभक्त्या पित्रे निवेद्यात्ततदभ्यनुज्ञाः ॥ २५ ॥
विशोध्य गर्भं सुपवित्रदिव्यद्रव्यैर्यथास्थाननियोगमेनाम् ।
सुभक्त्या गूढमुपास्यमानां शच्या भजध्वं पुरुदिक्कुमार्यः ॥ २६ ॥

ओं दिक्कुमार्यो जिनमातरमुपेत्य परिचरत परिचरतेति स्वाहा । सद्वस्त्रालंकारा अष्टौ वरकुमारीमंगलतांबूलहस्ताः संनिधाप्य पीठं परितः सकुंकुमरंजितपुष्पाक्षतं क्षिपेत् । गर्भशोधनपूर्ववद्दिक्कुमारीपरिचर्यास्थापनं ।

करनेकेलिये सोलह उत्तम पुष्पोंको तथा सोलह उत्तम फलोंको सिंहासनके आगे स्थापन करे । श्री ही धृति कीर्ति बुद्धि लक्ष्मी शांति पुष्टि—इन देवियोंकर गर्भ शोधन करना ॥ २५ । २६ ॥ आठ कुमारी कन्यायें स्वच्छ वस्त्र आभूषणोंको पहनके हाथमें फल आदि मंगलीक द्रव्य लेकर सिंहासनके पास आके केशर मिले हुए पुष्प अक्षतोंको क्षेपण करे । य-

सर्वौषधिचंदनपंचमृद्भिर्विलिप्य तीर्थोदकपंचकेन ।
विशोध्य पीठं जिनमब्जगर्भे गर्भोपमेस्मिन्नवतारयामि ॥ २७ ॥

तामेव रहसि पुरा निरूपितप्रतिष्ठेयामर्हत्प्रतिमां नूतनसितनासितसद्वस्त्रप्रच्छादितां पुरस्सरटंकिकाकरविश्वकर्मसौधर्मेन्द्रौ महोत्सवेनानीय सुविशुद्धभद्रासनगर्भपद्मे निवेशयेतां ।

यो गंगांबुसुरत्नपुष्पकृतभूपस्कारामिंद्रासन—
द्रकूपं प्रमदाकुलीकृतजगद्गर्भं प्रविश्योत्तमे ।
लग्ने त्वामतिरंजयन् रविरिह प्राची परानुग्रह-
ग्राहाद्यन्द्युतिवर्द्धतेस्म सुदृशां सोऽयं जिनस्तन्मुदे ॥ २८ ॥

ओं णमोर्हते केवलिने परमयोगिने शुक्लध्यानाग्निनिर्दग्धकर्मेन्धनाय सौम्याय शांताय वरदाय

ह गर्भशोधन और दिकुमारियोंकी सेवाविधि स्थापन कीजाती है । सर्वौषधि चंदन आदिसे सिंहासनको पवित्र करके कारीगर और सौधर्मेंद्र दोनों उत्तम वस्त्रसे ढकी हुई प्रतिष्ठेय प्रतिमाको महान उच्छवके साथ लाकर शुद्ध सिंहासनके भीतर कमलपत्रमें स्थापित करें ॥ २७ ॥ उसके वाद " यो गंगां " इत्यादि तथा " ओंणमो " इत्यादि बोलकर कुंकुसे रंगे हुए चमेलीके पुष्प तथा अक्षतोंको मूलनायक और दूसरी प्रतिमाओंके ऊपर क्षेपण करें ॥ २८ ॥ गर्भावतार विधि कहते हैं । "दृक् " इत्यादि दो श्लोक बोलकर

अष्टादशदोषविवर्जिताय स्वाहा। जात्यकुंकुमपिंजरितजातिपुष्पाक्षतं तस्या अन्यासां च प्रतिष्ठेयमानानामुपरि क्षिपेत्। गर्भावतारणं।

दृक्शुद्ध्यादिविशेषवद्धसुकृतस्कंधप्रसर्गांगिक-
स्फूर्जच्छुष्मणि विश्वकर्माणि निजव्यापारयोग्यं वपुः।
सद्गुमस्तभरात्रिबोधरुचिभागास्येन योर्कान्दवद्
गर्भे मातुरिभाकृतिर्वसति वै सोत्रावतीर्णः प्रभुः॥ २९॥
इत्युक्त्वा प्रणतामहत्तरिकया निर्दिश्यमाना पृथक्
स्थानाख्यादिभिदा जिनेंद्रजननीमभ्यर्च्य नुत्वा स्फुटं।
नाथं पत्रमुदाभिनीय पितरं चापृच्छ्य जग्मुः पदं
स्वं शक्राः स जयत्ययं जिनपतेर्गर्भावतारोत्सवः॥ ३०॥

जिनमातृपूजनार्थं भद्रासनगर्भनिवेशितप्रतिमाग्रे पुष्पांजलिं क्षिपेत्।

अथेंद्रैः सिद्धचारित्रशांतिभक्तिभिरादरात्। गर्भावतारकल्याणक्रिया तत्यास सूरिभिः॥३१॥

जिनमाताके पूजनके लिये सिंहासन (भद्रासन) में स्थापित प्रतिमाके आगे पुष्पांजलि क्षेपण करे॥ २९।३०॥ उसके बाद वे इंद्र सिद्धभक्ति चारित्रभक्ति शांतिभक्ति—इन तीनोंको करके गर्भावतार कल्याणकी समाप्ति करें॥ ३१॥ इस तरह गर्भावतार कल्याणककी विधि

इति गर्भावतारकल्याणस्थापना । अथ जन्मकल्याणस्थापना ।

देवानां नमयन् शिरांसि समनांस्याकंपयन्नासना-
न्यभ्रं निर्मलयन् सदिक्सुमनसो देवद्रुमैर्वर्षयन् ।
जन्यन् शीतसुगंधिमंदमनिलं यः सिंधुमुद्वेल-
माधुन्वन् स धराधरां च निरगात् कुक्षेः शुभेक्षोपसः ॥ ३२ ॥

वस्त्रापनयनम् ।

किं तां सवित्रीमिह वर्णयामि किं चर्चये लग्नमथास्पदं तत् ।
यदेष देवो भुवनत्रयैकगुरुः स्वयं स्वमसवेधिचक्रे ॥ ३३ ॥
पुण्याहमद्याद्य मनोरथा नः पूर्णा जगंत्यद्य सनायकानि ।
प्रमोदते कोद्य न चेतनोस्मिन्नृजेपि जन्मालयमिदं प्रपन्ने ॥ ३४ ॥

जिनजन्मस्थापनाय तस्या अन्यासां च प्रतिष्ठेयप्रतिमानामुपरि पुष्पाक्षतं क्षिपेत् ।

पूर्ण हुई । अब जन्मकल्याणककी स्थापना कहते हैं । “ देवानां ” इत्यादि श्लोक पढ़कर वस्त्रको अलग कर देना ॥ ३२ ॥ “ किं तां ” इत्यादि दो श्लोक बोलकर जिन भगवानके जन्मकी स्थापना करनेके लिये मूलप्रतिमा तथा अन्य प्रतिष्ठेय प्रतिमाओंके ऊपर पुष्प अक्षतोंको क्षेपण करे ॥ ३३।३४ ॥ पसेवरहित शरीर १ मलरहित शरीर २ सम चतुरस्र

निःस्वेदत्वमनारतं विमलता संस्थानमाद्यं शुभं
तद्वत्संहननं भृशं सुरभिता सौरूप्यमुच्चैः परम् ।
सौलक्षण्यमनंतवीर्यमुदितिः पथ्याप्रियासृक्च यः
शुभ्रं चातिशया दशेह सहजाः संत्वर्हदंगानुगाः ॥ ३५ ॥

सनवव्यंजनशतैरष्टाग्रशतलक्षणैः । विचित्रं जगदानंदि याज्जिनांगं तदस्त्विदं ॥ ३६ ॥

सहजदशातिशयस्थापनार्थं प्रतिमोपरि दशपुष्पीमावपेत ।

भृंगाराब्दातपत्रोज्ज्वलचमररुहाण्युद्वहंत्योष्टशो या
द्वात्रिंशद्दिक्कुमार्यो जिनजनुषि भजंत्यंविकायाश्चतस्रः ।

संस्थान ३ वज्रवृषभनाराच संहनन ४ सुगंधमय शरीर ५ अत्यंत सुंदर शरीर ६ शुभ एक हजार आठ लक्षणवाला शरीर ७ अतुल बल ८ हितमित वचन ९ दूधके समान सफेद लोहू १० ये दश अतिशय जन्मके साथ स्वभावसे ही उत्पन्न होते हैं ॥ ३५ ॥ जिनेंद्रका शरीर नौसौ व्यंजन और एकसौ आठ लक्षण सहित होता है वह यही है ॥ ३६ ॥ ऐसा कहकर स्वभावसे उत्पन्न दश अतिशयोंकी स्थापनाकेलिये प्रतिमाके ऊपर दस पुष्प रखे । "भृंगारा" इत्यादि तथा " ओं रुचक " इत्यादि कहकर भद्रासनपर विराजमान प्रतिमाके चारों तरफ कुंकुसे रंगे हुए पुष्प अक्षतोंको बखेरै ॥३७॥ यह विजयादि देवताओंका सत्कार स्थापन

गेहं विद्युत्कुमार्यो रुचकवरनगाग्रास्पदा द्योतयंते
या चाष्टौ जातकर्मा दधाति तदनुगास्ताः स्फुरंत्वत्र धरन्याः ॥ ३७ ॥

ओं रुचकवरगिरींद्रशिखरनिवासिन्यो विजयादिदेव्यो यथास्वमर्हत्प्रभुमिहेदानीं परिचरंत्विति स्वाहा । पीठस्थप्रतिमां सर्वतः कुंकुमरंजितपुष्पाक्षतं विकिरेत् । विजयादिदैवतोपास्तिस्थापनं ।

दिव्यद्रव्यविशुद्ध एव जवरे यो रत्नवृष्टिं क्षण—
प्रीतायाः पयसीव पद्मभवसन्मातुः स्वयं शुद्धिमान् ।
यन्नामापि विशुद्धयेस्ति जगतो ध्यायंति यं योगिन—
स्तस्याप्याकरशुद्धिमेष विधिरित्यातन्वतां देवताः ॥ ३८ ॥

आकरशुद्धिविधानख्यापनार्थं तीर्थोदकाप्लुतपुष्पाणि प्रतिमोपरि निदध्यात् ।

घंटासिंहासनकजलरुहां निःस्वनैरदेयोस्त्रै—
ज्ञात्वातुल्यजिनजनिमुपेत्योच्चकैः स्वस्वभूत्या ।

किया । " दिव्य " इत्यादि श्लोक पढकर आकरशुद्धिकी विधि दिखलनेकेलिए तीर्थ जलसे धोयें हुए पुष्पोंको प्रतिमाके ऊपर क्षेपण करे ॥ ३८ ॥ " घंटा " इत्यादि श्लोक बोलकर इंद्र और यजमान आदिकोंके ऊपर उन अमुक नामवाले इंद्रादि भावोंको स्थापनकेलिए सौधर्म प्रतिष्ठाचार्य पुष्प और अक्षतोंको क्षेपण करे ॥ ३९ ॥ उसके वाद " अयं "

कल्पज्योतिर्वनभवनगीर्वाणनाथाः स्वयं यत्
तत्कल्याणं यधुराभिनयत्यत्रतं नाम तेमी ॥ ३९ ॥

इंद्रयजमानादिषु तत्तदिंद्रादिभावस्थापनाय सौधर्मः पुष्पाक्षतं क्षिपेत् ।

अयं शच्या गुप्तं कृतवति नुतिं छद्मशयना—
न्निमील्यांबा मायातनयमुपहृत्यार्हति ते ।
समागत्यश्र्यादित्रजमनुव्रजंत्याक्षिकरणीः
शिरो निधानाद्यैः सफलयति सेंद्रोभ्रगगजः ॥ ४० ॥

इंद्राण्या भद्रासनादुद्धृत्य समर्थमाणां प्रतिमां जय जयेति वदन् प्रणतिशिराः करकमलाभ्यां गृहीत्वा सर्वसंघसमन्वित इमानि वृत्तानि पठन्नुत्तरवेदीं नीत्वा जन्माभिषेकोत्सवाय स्नपनपीठे निवेशयेत् ।

यः श्रीमदैरावणवाहनेन निवेशितोंके विधृतातपत्रः ।
ईशानशक्रेण सनत्कुमारमाहेंद्रसच्चामरवीज्यमानः ॥ ४१ ॥

इत्यादि श्लोक बोलकर इंद्राणी भद्रासनसे प्रतिमाको उठाकर जय जय शब्द करती हुई मस्तक नवाकर हस्तकमलोंपर रखती हुई सब जनसंघके साथ आगे कहे जानेवाले श्लोकोंको पढती हुई उत्तर वेदीपर ले जाकर जन्माभिषेक उत्सव करनेके लिए स्नान करनेके आसनपर रखे ॥ ४० ॥ फिर “ यः श्री ” इत्यादि आठ श्लोकोंको तथा “ ओं ह्रीं ” इत्यादिको

शच्यादिभिः श्र्यादिभिरप्युदारं देवीभिरात्तोज्ज्वलमंगलाभिः ।
पुरस्सरंतीभिरिवाप्सरोभिरग्रे नटंतीभिरुपास्यमानः ॥ ४२ ॥
शेषैस्तु शक्रैर्जय जीव नंद प्रसीद श्वश्वत्प्रतप क्षिपारीन् ।
इत्यादि वागुल्वणितप्रमोदैर्मुहुः प्रसूनैरुपहार्यमाणः ॥ ४३ ॥
सुरैः स्फुटास्फोटितगीतनृत्यवादित्रहास्योल्लुतवालितानि ।
समंगलाशीर्धवलस्तुतीनि स्वैरं सृजद्भिः परिचार्यमाणा ॥ ४४ ॥
अहो प्रभावस्तपसां सुदूरमपि व्रजित्वा प्रतिमास्त्वपीक्ष्यः ।
यः सैष साक्षाद्ध्रुवमीक्षितोर्हन्नभेद्यनादिः स्वयमात्मबंधः ॥ ४५ ॥
सविस्मयानंदमिति ब्रुवाणैरालोक्यमानोभिमुखागतैः खे ।
देवार्पिभिः स्पर्धितदेवयुग्मं नभोगयुग्मैरपि सेव्यमानः ॥ ४६ ॥
प्रदक्षिणाध्वव्रजनेन नीत्वा पूर्वोत्तरस्यां दिशि मेरुशृंगम् ।
निवेश्य तत्रत्यशिलोग्रपीठे क्षीरोदनीरैः स्नापितः सुरेन्द्रैः ॥ ४७ ॥
तं देवदेवं जिनमद्य जातं शय्यास्थितं लोकपितामहत्वम् ।
इमं निवेश्योत्तरवेदिपीठे प्राग्वक्रमस्मिन् विधिनाभिषिंचे ॥ ४८ ॥

बोलकर पांडुकशिलाके ऊपर सिंहासनपर विराजमान करे ॥ ४१।४२।४३।४४।४५।४६।४७।४८ ॥ उसके वाद आकर शुद्धिके अभिषेक स्वरूप जन्मभिषेकको दिखलाते हैं । "रत्न"

ओं ह्रीं अर्हं श्रीधर्मतीर्थाधिनाथ भगवान्निह पांडुकाशिलापीठे तिष्ठ तिष्ठेति स्वाहा । उत्तरवेदिकास्नपनपीठे प्रतिमानिवेशनमंत्रः । अथातः आकरशुद्ध्यभिषेकरूपेण जन्माभिषेकमनुक्रमिष्यामः ।

रत्नस्वर्णमयोत्तरीयरसनासंव्यानमौलिप्रभै—
मेरुर्भाति वनैः सहस्ररहितं यो योजनान्युच्छ्रितः ।
लक्षं सोयमियं च पांडुकशिला दीर्घा शतं स्फाटिकी
साष्टौ चार्धशतं तात्र सुरभिः श्रेष्टार्द्धचंद्राकृतिः ॥ ४९ ॥
सोत्रायं पृथुमंडपोत्युपकृतो देव्योर्घहस्ता इमा—
स्तास्तान्याप्सरसाममूनि नटितान्यास्येतता योजनम् ।
निम्नाश्चाष्ट सुरैः पयोर्णवजलैर्भृत्वार्णमाणा इमे
ते कुंभाः स जिनोऽयमस्मि स हरिस्तत्काप्यहो संभृतिः ॥ ५० ॥

अभिषेकप्रकरणसज्जीकरणाय समंतात्पुष्पाक्षतं विकिरेत् । प्रस्तावना । ओं ऋषभादिदिव्यदेहाय सद्योजाताय महाप्रज्ञाय अनंतचतुष्टयाय परमसुखप्रतिष्ठिताय निर्मलाय स्वयंभुवे अजरामरपदप्राप्ताय चतुर्मुखपरमेष्टिने अर्हते त्रैलोक्यनाथाय त्रैलोक्यपूज्याय अष्टदिव्यनागप्रपूजिताय देवाधिदे-

---

इत्यादि दो श्लोक कहकर अभिषेक आरंभकी तयारी करनेके लिये चारों तरफ पुष्प अक्षत बखेरे ॥ ४९।५० ॥ " ओं ऋषभा " इत्यादि " स्वाहा " तक मंत्र बोलकर प्रतिमाके अंग

वायै परमार्थसन्निहितोस्मि स्वाहा । अनेन प्रतिमाया अंगप्रत्यंगानि परमामृशन् सप्तवारानभिमंत्र्य सकलीं कुर्यात् । ततो दशापि लोकपालानावाहनादिविधिनोपचरेत् । तथाहि ।

इंद्रा मिथाद्धदेवा शरपतिवरुणाधाररै देशनाग्रे धिष्णोशा दिक्षु वेद्या ? ॥५१॥

इंद्रादिदिक्पालानामावाहनादिपुरस्सराध्येपणाय समस्तहव्यद्रव्यं जुहोमीति स्वाहा ।

अथ पृथगिष्टिः ।

दिगीशाः शब्दये युष्मानायात सपरिच्छदाः । अत्रोपविशतैतान्वो यजे प्रत्येकमादरात्॥५२॥

दिक्षु पुष्पाक्षतं क्षिपेत् । अत्र रूप्याद्रिस्पर्द्धीत्यादि वृत्ताष्टकं प्रागुक्तमेव वक्ष्यमाणमंत्रोपेतं प्रयुंजीत । तथाहि ।

उपांगोंको छूकर सातवार मंत्रितकर सकलीकरण क्रिया करे । उसके बाद दश लोकपालोंका आवाहन आदि विधिसे सत्कार करे । वह इस तरहसे है-" इंद्रा " इत्यादि तथा " इंद्रादि " बोलकर हवन करनेकी सामग्रीसे अवाहनादि पूर्वक इंद्रादिका सत्कार करे ॥ ५१ ॥ अब वेदीपूजा कहते हैं । " दिगीशा " इत्यादि श्लोक बोलकर दिशाओंमें पुष्प अक्षत क्षेपण करे ॥ ५२ ॥ यहांपर " रूप्याद्रि " इत्यादि पहले कहे हुए आठ श्लोकोंका मंत्र पूर्वक प्रयोग करे । वह इस प्रकार है । " रूप्याद्रि " इत्यादि तथा " हे इंद्र " इत्यादि

रूप्यादि………………………………॥ ५३ ॥

हे इंद्र आगच्छागच्छ इंद्राय स्वाहा, इंद्रपरिजनाय स्वाहा, इंद्रानुचराय स्वाहा, अग्नये स्वाहा, अनिलाय स्वाहा, वरुणाय स्वाहा, सौमाय स्वाहा, प्रजापतये स्वाहा ओं स्वाहा भूः स्वाहा स्वः स्वाहा, ओं इंद्राय स्वगणपारिवृताय इदमर्घ्यं पाद्यं गंधं पुष्पं दीपं धूपं चरुं बलिं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां प्रतिगृह्यतामिति स्वाहा ।

रुक्मारु………………………………॥ ५४ ॥

हे अग्ने आगच्छगच्छ अग्नये स्वाहा…………… ।

कल्पांताः………………………………॥ ५५ ॥

हे यम आगच्छागच्छ यमाय स्वाहा…………… ।

आरूढं………………………………॥ ५६ ॥

हे नैऋत्य आगच्छागच्छ नैऋत्या स्वाहा………… ।

मंत्र बोलकर इंद्रको जल आदि अष्ट द्रव्य चढावे ॥ ५३ ॥ " रुक्मारु " इत्यादि तथा " हे अग्ने " इत्यादि बोलकर अग्निकुमारदेवोंको जल आदि द्रव्य चढावे ॥ ५४ ॥ " कल्पांता " इत्यादि तथा " हे यम " इत्यादि बोलकर यमदेवको जल आदि चढावे ॥ ५५ ॥ " आरूढं " इत्यादि तथा " हे नैऋत्य " इत्यादि बोलकर नैऋत्य दिक्पालको अर्घ चढावे ॥ ५६ ॥

नित्यांभ .... ॥ ५७ ॥

हे वरुण आगच्छागच्छ वरुणाय स्वाहा.......................... ।

वलाच्छ.. ॥ ५८ ॥

हे पवन आगच्छागच्छा पवनाय स्वाहा.......................... ।

हंसौघे.. ॥ ५९ ॥

हे धनदागच्छागच्छ धनदाय स्वाहा.......................... ।

साज्ञावा.. ॥ ६० ॥

हे ईशान आगच्छागच्छ ईशानाय स्वाहा.......................... ।

वक्षौजस्तर्जिपृष्ठश्वसनसमतरः कूर्मराजाधिरूढं

क्षुद्रछीवेभकुंभाक्रमणचणसृणिस्फारणव्यग्रपाणिम् ।

“ नित्यांभ ” इत्यादि श्लोक तथा “ हे वरुण ” बोलकर वरुणको जल आदि द्रव्य चढावे ॥ ५७ ॥ “ वलाच्छं ” इत्यादि तथा “ हे पवन ” इत्यादि बोलकर पवन कुमारको जल आदि द्रव्य चढावे ॥ ५८ ॥ “ हंसौघे ” इत्यादि तथा “ हे धनद ” इत्यादि बोलकर कुवेरको अर्घ चढावे ॥ ५९ ॥ “ साज्ञावा ” इत्यादि तथा “ हे ईशान ” इत्यादि बोलकर ईशानको जलआदि आठ द्रव्य चढावे ॥ ६० ॥ “ वक्षौज ” इत्यादि तथा “ हे धरणेंद्र ”

सांश्लिष्टं दृक्सहस्राद्वितयघृणिफणारत्नरुक्तप्रवाल-
व्रश्मौघापीडमर्हच्छ्रितमहि यमधौचांमि पद्मासमेतम् ॥ ६१ ॥

हे धरणेंद्र आगच्छागच्छ धरणेंद्राय स्वाहा........................ ।

वैरिस्तंवेरमास्रोल्लसदरुणसटाटोपशुभ्रांगभीक्—
द्वालेंदुस्पार्द्धदंष्ट्रोत्क्रमखरनखरारक्तदृक् सिंहसंस्थम् ।
कुंतास्त्रं रोहिणीष्टं कुवलयसुमनः स्रक् श्रितां शंभयुक्तं
ज्योत्स्ना पीयूषवर्षं यज यजनपरं सोममर्घं महामि ॥ ६२ ॥

हे सोम आगच्छागच्छ सोमाय स्वाहा............................ ।

एवं सत्कृत्य दिक्पालानेभ्यो मंत्रैः पुनर्ददे । अप्कुंडे सप्तशः सप्तधान्यमुष्टिभिराहुतीः ॥६३॥

ओं आं क्रौं इंद्राय स्वाहा । अनेन जलपूर्णकुंडे सप्तमे सप्तधान्यमुष्टिभिरिंद्राहुतिं दद्यात् ।

इत्यादि बोलकर धरणेंद्रको अर्घ चढावे ॥ ६१ ॥ " वैरिस्तं " इत्यादि तथा " हे सोम " इत्यादि बोलकर सोम दिक्पालको जलआदि अष्ट द्रव्य चढावे ॥ ६२ ॥ " एवं " इत्यादि तथा " ओं आं " इत्यादि बोलकर जलसे भरे हुए कुंडमें सातवार सात धान्योंकी मुठी भरकर आहुतियां दे ॥ ६३ ॥ इसीतरह अग्नि आदिके कुंडमेंभी जानना । उसके बाद फिर

एवमन्यादिभ्योपि । अथ पुनस्तामेव प्रतिमां जिनमंत्रेण सप्तवारानाभिमंत्र्याकरशुद्धिं विदध्यात् । जिनमंत्रो यथा । ओं अर्हद्भ्यो नमः, पादानुसारिभ्यो नमः, कोष्ठबुद्धिभ्यो नमः, बीजबुद्धिभ्यो नमः । सावधानिभ्यो नमः,परमावधिभ्यो नमः, ओं ह्रौं वल्गु २ निवल्गु २ महाश्रवण । ओं ऋषभादिवर्धमानेभ्यो वषट् वौषट् स्वाहा ॥ अथाभिषेकः ।

पूरं पूरमयस्तदावधिपयः सिंधोपसृत्यामरै—
र्हस्ताहस्तिकयार्पितैर्गलल्लुलन्मुक्ताफलस्रग्भरैः ।
श्रीखंडद्रवचर्चितैः परिदिनश्रीकर्मणा भर्मणात्
कृष्णैः साष्टसहस्रमानकलितैः कुंभैः सिताब्जाननैः ॥ ६४ ॥
आतोद्यध्वनिगीतमंगलरवैः सहर्षहर्षप्लुतां
देवानां नटदप्सरोगणवपुः श्रीभिश्च कीर्णांवरे ।
पार्श्वेन्द्रासनभासि पांडुकशिलासिंहासने प्राङ्मुखं
सौधर्मप्रमुखा निवेश्य जिनपं जन्मन्यसिंचत् किल ॥ ६५ ॥

उसी प्रतिमाको जिनमंत्रसे सातवार मंत्रित करके आकरशुद्धि करे । वह जिनमंत्र " ओं अर्हं " यहांसे लेकर " स्वाहा " तक है ॥ अब अभिषेक वर्णन करते हैं । " पूरं " इत्यादि तीन श्लोक पढकर कलशोंपर पुष्प अक्षत और जलको क्षेपण करे ॥६४।६५।६६॥ "गोवृश्रृं"

धूलीपल्लवमंगलौषधिफलत्वग्मूलसर्वौषधी
संपृक्ताखिलतीर्थवारिसुभृतैर्मंत्रातिपूतैः कुटैः ।
अष्टाभिः स्वपदे स्थितं स्थिर मुदा वेधांचलं चारु तद्
बिंबं चाकरशुद्धिसेचनमिदं तज्जातकर्मार्पये ॥ ६६ ॥
एतत्त्रयं पठित्वा कलशेषु पुष्पाक्षतोदकं क्षिपेत् ।
गोवृंदशृंगतो गजपतेर्दंतान्महातीर्थतः
शैलेंद्रा नृपतोरणादुरुसरित्तीराच्च पद्माकरात् ।
आनीताभिरुपस्कृतेन शुचिभिर्मृद्भिः सुतीर्थांभसा
पूर्णेन स्नपयामि हेमकलशेनार्च्यां जिनार्चां मुदा ॥ ६७ ॥
शिल्प्यादीन् संमान्य सूत्रधारेण धूलीकलशाभिषेकः । कुल्याभिषेकः ।
कुल्याभिः शुचिभिः सतोः स्वसुरपो पित्रोश्च पत्यात्मजैः
संयुक्ताभिरशलिपकाभिरानिशं सक्ताभिरर्हन्मते ।

इत्यादि बोलकर कारीगर आदिका सत्कार करके शुद्धवालु आदिसे अभिषेक करे ॥ ६७ ॥ " कुल्याभिः " इत्यादि बोलकर उत्तम कुलकी स्त्रियोंसे प्रोक्षण (जलसे अभिषेक) करावे ॥ ६८ ॥ इन्हीं स्त्रियोंसे प्रतिष्ठा योग्य उवटना करावे। वेल, ऊमर, चंपा, आम, वकुल,

सिद्धार्थाक्षतसत्फलोद्गमनिशादूर्वादिमैत्रीयुषा
कांडमुखोद्धृतेन जिनपं संप्रोक्षयामि श्रियै ॥ ६८ ॥

प्रोक्षणकप्रणयनम् । एताभिरेव च स्त्रीभिः प्रतिष्ठायोग्यमूलादिवर्तनं कारयेत् ।

बिल्वोदुंबरचंपकाम्रबकुलन्यग्रोधनीपार्जुन—
प्लक्षाशोकपलाशपिप्पलदलप्रच्छादितश्रीमुखैः ।
पुण्याशोष्यसरित्तडागसरसीपूर्वोक्ततीर्थाम्बुभिः
पूर्णैः पूर्णमनोरथैरिव कुटैः कुर्वे निषेकं विभोः ॥ ६९ ॥

ओं णमो अरहंताणं सव्वसरीरावच्छिदे महाभूप आय २ गिण्ह २ स्वाहा । एप मंत्र उत्तरत्रापि योज्यः । द्वादशपल्लवाभिषेकः ।

दूर्वापद्मकदनागुरुयवश्रीखंडवर्हिस्तिलै—
र्नंद्यावर्तकजातिकुंदकुसुमैः स्वर्णार्जुनव्रीहिभिः ।
भूम्यप्राप्तपवित्रगोमयनदीकूलोद्यमृद्रोचना—
सिद्धार्थैश्च समं भृतैः सुपयसा कुंभैः प्रभुं स्नापये ॥ ७० ॥

वड़, कदंब, अर्जुन, पाकर, अशोक, ढाक, पीपल इन बारह वृक्षोंके पत्तोंसे ढके हुए जलके कलशोंसे " ओं णमो " इत्यादि मंत्र बोलकर अभिषेक करे ॥ ६९ ॥ यह द्वादश पल्लवका

अष्टादशमंगलद्रव्याभिषेकः ।

श्यामाशमींदीवरभृंगविष्णुक्रांतागुडूची सह देविकाभिः ।
मिश्रैः पवित्रैः सलिलैः सुपूर्णैरोघैर्जिनार्चां स्नपयामि कुंभैः ॥ ७१ ॥

सप्तौषधस्नपनम् ।

लवंगभल्लातकबिल्वजातीफलाम्रकाम्रामलवारिपूर्णैः ।
शुभ्रैर्घटैरिष्टफलाप्तिहेतोः संस्नापये स्नातकनाथबिंबम् ॥ ७२ ॥

फलपंचकस्नपनम् ।

उदुम्बराश्वत्थशमीपलाशन्यग्रोधकल्कव्यातिकीर्णमर्णः ।
तैर्थं वहद्भिः कलशैर्विलक्षैर्भक्त्याभिषिंचामि जिनेंद्रमूर्तिम् ॥ ७३ ॥

अभिषेक हुआ। "दूर्वा" आदि बोलकर दूव आदि अठारह मंगलीक वस्तुओंसे मिले हुए जलके घड़ोंसे अभिषेक करे ॥ ७० ॥ यह मंगल द्रव्याभिषेक हुआ। "श्यामा" इत्यादि बोलकर उसमें कथित श्यामा आदि सात वनस्पतियोंसे मिले हुए जलपूर्णकलशोंसे अभिषेक करे ॥ ७१ ॥ "लवंग" इत्यादि बोलकर उसमें कहे हुए लवंग, भल्लातक, बेल, जायफल, आम-इन पांच उत्तम फलोंसे मिश्रित निर्मल जलसे भरे हुए घड़ोंसे प्रतिमाका अभिषेक करे ॥ ७२ ॥ यह फलपंचक स्नपन हुआ ॥ "उदुंबरा" इत्यादि बोलकर उसमें कथित

क्षीरिपंचकस्नपनम् ।

व्याघ्री गुडूची सहदेवि सिंही वरी कुमारी शतमूलिकानाम् ।
मूलैर्वलायाश्च युतेन सर्वैः कुंभांभसाहं स्नपये जिनार्चाम् ॥ ७४ ॥

दिव्यौषधिमूलाष्टकस्नपनम् ।

कक्कूलैला जातिपत्रलवंगश्रीखंडोग्रा कुष्ठसिद्धार्थमय्या ।
सर्वौषध्यावासितैस्तीर्थतोयैः कुंभोद्गीर्णैः स्नापयाम्यर्हदर्चाम् ॥ ७५ ॥

सर्वौषधिस्नपनम् । एवं जन्माभिषेकस्थानीयमाकरशुद्ध्यभिषेकं विधायानेन मंत्रेण जिनार्चामधिवासयेत् । ओं णमो भयवदो वड्ढमाणस्स रिसहस्स जस्स चक्कुजलंतं गच्छइ आयासं पायालं लोयाणं भूयाणं जूए वा विवादे वा रणांगणे वा गयंगणे वा थंभणे वा मोहणे वा सव्वजीवसत्ताणं अपराजिदो भवदु मे रक्ख रक्ख रक्ख स्वाहा । श्रीवर्धमानमंत्रः ।

ऊमर, पीपल, शमी, ढाक, वड़–इन पांचोंकी छालसे मिश्रित जलसे पूर्ण कलशोंसे स्नपन करे ॥ ७३ ॥ " व्याघ्री " इत्यादि बोलकर उसमें कथित व्याघ्री (एरंड) गिलोइ, आदि आठ उत्तम औषधियोंके मूलसे मिश्रित जलसे पूर्ण कलशोंसे अभिषेक करे ॥ ७४ ॥ " कक्कूलै " इत्यादि बोलकर उसमें कही गई औषधियोंसे मिश्रित जलसे पूर्ण कलशोंसे

यस्योन्मील्य निसर्गजे श्रवणयोर्वज्रेण रंध्रे हरिः
शच्यासेचनकं वपुस्त्रिजगतां भक्त्याभिसंस्कारयेत् ।
त्रैवर्ण्योज्ज्वलसूत्रदुग्धयवमात्सिद्धार्थरत्नाश्रिय—
श्चर्चा चारुभुजेस्य भूषणमयं बध्नंतु ताः कंकणम् ॥ ७६ ॥

इंद्रकरहारकक्तकर्णवेधादनंतरं प्रोक्षणकाधिकृतनारीभिर्जात्यकुंकुमश्रीखंडागरुकर्पूरचर्चनपूर्वकं दक्षिणभुजे षोडशाभरणात्मककंकणविधानम् ।

गृह्णंति यस्य समयामृतधौतचित्ता नामानि कोटिमृषयः कलुषक्षयाय ।
मेरौ महेंद्र इव संव्यवहारहेतोस्तं व्याहरेहमिह यष्टमतेन नाम्ना ॥ ७७ ॥

अभिषेक करे । यह सर्वौषधिस्नपन विधि हुई ॥ ७५ ॥ इसीप्रकार जन्माभिषेकके स्थानरूप आकार शुद्धिका भी अभिषेक करके आगे कहे जानेवाले मंत्रसे जिन प्रतिमाका संस्कार करे ॥ " ओं णमो " इत्यादि " स्वाहा " तक श्रीवर्धमानमंत्र है । " यस्यो " इत्यादि बोलकर कर्णवेध करके स्त्रियोंसे केशर चंदन अगुरु कपूरकर लेप किये गये सोलह आभूषणोंके साथ दाहिनी भुजाकी तरफ कंकण बांधे ॥ ७६ ॥ " गृह्णंति " इत्यादि बोलकर प्रभुका नाम रखनेके लिये कुंकुसे रंगे हुए पुष्प अक्षतोंको प्रतिमाके ऊपर क्षेपण करे ॥७७॥

नामकरणार्थं कुंकुमाक्तपुष्पाक्षतं प्रतिमोपरि क्षिपेत् । अथानंदस्तवः ।

जय देव प्रसिद्धेन स्वनाम्ना गां पुनीहि मे । जय शुद्ध नय स्वांतं स्वभक्त्या मेऽनुरंजय ७८
जय दिव्यांगगात्राणि स्वनत्या मे कृतार्थय । जय तेजोनिधे स्वामिन् नेत्राब्जे मे विनिद्रय ७९
यद्दर्शनविशुद्ध्यादिभावना दैवतं विभो । तपस्तप्त्वा जगज्ज्योतिस्तज्ज्योतिस्ते तानिष्यति ८०
यात्वयज्ञा हतैः पुण्यैस्तद्रागद्वारसंगतैः । त्वयि प्रयुज्यते कोपाल्लक्ष्मीस्तान्येव हंति सा॥८१॥
सा चेयं च विभूतिस्ते कापीश जगतां दृशः। लब्धा विशुद्धया तद्वृद्ध्या स्वस्याहान्त्रयशुद्धताम्॥
भुंजानोभ्युदयं चार्हन् जनैर्भोगीव लक्ष्यते । बुधैर्योगीव तत्त्वं तु जानाति त्वादृगेव ते॥८३॥
नमस्तेऽचिंत्यचरित नमस्ते त्रिजगद्गुरो । नमस्ते त्रिजगन्नाथ नमस्तेत्यंतानिस्पृह ॥ ८४ ॥
नमस्ते केवलज्ञान नमस्ते केवलेक्षण । नमस्ते परमानंद नमस्तेऽनंतविक्रम ॥ ८५ ॥
एवमानंदतः स्तुत्वा शक्रः पूर्ववदादरात् । जन्माभिषेककल्याणक्रियां कृत्वा स्फुटं नटेत् ॥८६॥

उसके बाद आनंदस्तुतिका पाठ "जय देव" इत्यादिसे लेकर पचासीवें श्लोकतक पढे ॥७८॥ ७९।८०।८१।८२।८३।८४।८५॥ इसप्रकार वह इंद्र आनंदसे भक्तिपूर्वक स्तुतिकरके और जन्माभिषेक कल्याणकी क्रिया करके अच्छीतरह तांडवनृत्य करे ॥ ८६ ॥ यह जन्माभिषेककी

इति जन्माभिषेकविधानम् ।

अथोद्धृत्य निजस्कंधे तामर्हत्प्रतिमां मुदा । आरोप्य व्यंजयन्निंद्रस्तमैंद्रं परमोत्सवम् ॥८७॥
संधेन महता युक्तः प्राप्य तां मूलवेदिकाम् । त्रिःपरीत्य पठन्मंत्रमिमं न्यस्येत्तदासने ॥८८॥

ओं " एतद्राजांगणं तत्सुरकृतसुपमं सिंहपीठं तदेतत्
देवोयं जातकर्मोद्यत इयममरीसेव्यमाना प्रबोध्य ।
देवी साचोपनीता प्रमदवरवशा सेवमानास्तथैते
देवाः सर्वेर्हतीमं परिकरमयमेवेत्यमुं स्थापयेऽस्मिन् ॥ ८९ ॥

ओं नमोर्हते केवलिने परमयोगिने अनंतविशुद्धपरिणामपरिस्फुरच्छुक्लध्यानाग्निनिर्दग्धकर्मबीजाय प्राप्तानंतचतुष्टयाय सौम्याय शांताय मंगलाय वरदाय अष्टादशदोषरहिताय स्वाहा । मूलवेदीमध्यस्थापितभद्रासने प्रतिमानिवेशनमंत्रः । अथ जिनमातृस्नपनम् ।

विधि हुई । उसके बाद इंद्र उस अर्हत्प्रभुकी प्रतिमाको हर्षके साथ अपने कंधेपर रख परम उत्सवको दिखाता हुआ बहुत साधर्मियों सहित उस मूलवेदीमें लेजाकर तीन परिकमा देके इस आगे कहे जानेवाले मंत्रको पढता हुआ उस सिंहासन पर विराजमान करे ॥८७॥८८॥ वह मंत्र " ओं एतद्रा " इत्यादि श्लोकसे लेकर स्वाहा तक है । इससे मूलवेदीके भद्रासनपर

अंव प्रसीद दृशमेषु चतुर्निकायगीर्वाणभर्तृषु निधेहि सनम्रवत्सु ।
एतास्वपीद्रदयितासु ललाटघृष्टपादाग्रभूषु मुदमुल्वणयस्मितेन ॥ ९० ॥
नित्याश्रियेभ्युदयदुर्मदिनां त्वयीशे त्वज्ज्योतिरेतदपि नः परमक्तवत्याम् ।
कर्मस्विहाभ्युदयिकेषु मतेति कोत्र प्राच्याशयोस्तमयपाक्युदयार्कसूतेः ॥९१॥
मग्नाः निमज्जंति जगंत्यमूनि मंक्ष्यंति वा मोहार्णवे कः ।
इहोपगृह्णाति भवादृशीदृक् सर्वज्ञवीजं यदि न प्रसूते ॥ ९२ ॥
त्वं कल्याणी त्रिभुवनजनन्येकमूरस्यासि त्वं
कीर्तिर्ज्योत्स्ना किरयति सदा क्षालयंती जगत्ते ।
स्त्रीसर्गाग्रे गणयति शिवांगेष्वपि स्वं त्वमेव
त्वत्पूताः स्मो नियतमधुना विश्वमान्ये नमस्ते ॥ ९३ ॥
पीठिकायां कुंकुमाक्तकुसुमानि क्षिप्त्वा प्रणमेत् ।

जिनदेवीं जिनाभ्यर्णा स्तुत्वा दिव्यांवरादिभिः। प्रसाद्यानंदनाट्येन स्वयं चाराध्य तं पुनः ९४

प्रतिमाको रखा जाता है ॥ ८९ ॥ अब जिनमाताके अभिषेककी विधि कहते हैं- " अंव प्रसीद " इत्यादिसे लेकर तिरानवे तक श्लोक बोलकर वेदीमें कुंकुमसे मिले हुए फूलोंको डालकर प्रणाम करे ॥९०।९१।९२।९३॥ उसके वाद जिनदेवीको उत्तम वस्त्रादिसे पूज तथा

रक्षायां तस्य दिग्नाथान् देवताः परिकर्मणि । भोगसंपादने श्रीदं क्रीडने शक्रपुत्रकान् ९५
अंगुष्ठे चामृतं स्तन्यलौल्यच्छेदाय वासवः । यद्वदस्थापयत्तद्वदर्चायां स्थापयाम्यहम् ॥९६॥

दिव्यवस्त्रगंधभूषणस्वस्तिकशाल्यक्षीरान्नविचित्र-भक्ष्यपक्वान्नदुग्धदधिघृतशर्कराचारुपुष्पफलपत्र-दीपधूपादि भोज्यवस्तुजातं कांचनभाजने विरचय्य शिलायां निवेशयेत् ।

सिद्ध्युद्वाह महोत्सुकोपि तदलंकर्माणकालाप्तये
निर्ग्रंथं परपर्वनृत्यविधिना धर्मेण शासद्धराम् ।
यः सम्राडिति लक्ष्यते त्रिजगतीनाथोसतीवेश्वरं
यो भक्तेति कुमार एव च भजन् भोगान्यसाम्यत्र तम् ॥ ९७ ॥

स्तुतिकर प्रभुकी रक्षाके लिये दिक्पालोंको, देवताओंको सेवाके लिये, भोगादि सामग्रीके लिये कुवेरको, खेलनेकेलिये इंद्रपुत्रोंको, दूध पीनेकी लालसाको दूर करनेकेलिये अंगूठेमें अमृतको जैसे पहले इंद्रने प्रभुके पास रखा था उसी तरह मैं भी इस प्रभुकी प्रतिमाके सामने स्थापित करता हूं ॥ ९४।९५।९६ ॥ ऐसा कहकर उत्तम वस्त्र सुगंधित पदार्थ आभूषण (गहने) सातिया खीर अनेक पक्वान्न दूध दही घी मिश्री उत्तम फूल फल पत्ते दीप धूप आदि भोगोंकी सामग्री सोनेके पात्रमें रखकर शिलापर रखे । " सिद्ध्यु " इत्यादि बोलकर पुण्यके उदयसे प्राप्त राज्य संपदा आदि उपभोगोंकी स्थापना करनेके

पुण्यविपाकसंपादितसौराज्यसंपदुपभोगस्थापनाय कुंकुमारुणितपुष्पाणि प्रतिमोपरि विकिरेत् ।

एवं वैषयिकैः सुखैः सुरनराधीशामपि प्रार्थितैः
शश्वत्प्रीतमनाः सुराधिपनृपैः राज्ञार्थिभिः सेवितः ।
कालैकक्षपणीयमोहमहिमाव्याधूतिसंसूचक—
प्रेक्षातंकिततीर्थकृच्छिवरतोप्यास्ते द्वितीयाश्रमे ॥ ९८ ॥

देवोपनीतभोगोपभोगानुभवनाय प्रतिमोपरि पुष्पांजलिं क्षिपेत् । इति जन्मकल्याणस्थापना ॥ २ ॥ अथ निष्क्रमणकल्याणं ।

प्राप्ते सामज्वरवदणुता वृत्तमोहे विवेक—
ज्योतिष्युद्यत्यथ किमपि तत्कारणं वीक्ष्य मंक्षु ।
निर्विण्णोर्हत्समरससुधास्वादनोकः सहैत्य
प्रीत्यानत्य सततदुपथैनिभ्यनंदत्सुरर्षीन ॥ ९९ ॥

लिये केशरसे रंगे हुए पुष्पोंको प्रतिमाके ऊपर बखेरै ॥ ९७ ॥ "एवं" इत्यादि श्लोक बोलकर देवोंसे लाये गये भोग उपभोगोंका अनुभव दिखानेके लिये प्रतिमाके ऊपर पुष्पोंको क्षेपण करे ॥ ९८ ॥ इस प्रकार जन्मकल्याणकी स्थापना हुई ॥ (२) ॥ अब तपकल्याणकका वर्णन करते हैं । "प्राप्ते" इत्यादि श्लोक बोलकर शमसुखके एक स्वादी होनेकी स्थापनाके

प्रशमसुखैकरासिकत्वस्थापनार्थं जिनोपरि पुष्पांजलिं क्षिपेत् ।

विजयस्व जिनाधीश स्वयंभूरद्य खल्वसि। वाक्ति स्वायंभुवं ज्योतिः शिवप्रस्थानमेव नः१००
दुग्धां कामामियं चित्तं सुद्रव्यादिचतुष्टयी। एनामेवेयमन्वेतु सुष्ठूत्साहोयमेधताम् ॥ १०१ ॥
जृंभतां तत्परं ज्योतिः प्रीयंतां प्राणिनोऽखिलाः। भव्यात्मानः प्रबुध्यंतां छिद्यंतां कर्मशृंखलाः
निर्मलोन्मुद्रितानंतशक्तिचेतयितृत्वतः। ज्ञानं निःसीमशर्मात्मन् विंदन् प्रतपत्पदे ॥ १०३ ॥
इमं विधिं नियोगेन साधर्मप्रणयेन वा। वाचालयेमहि कृत्ये तु त्वादृशो जाग्रयुः स्वयम् १०४
इति स्तुतो शिवोद्योगं लौकांतिकसुरैः सुरैः। कृतनिःक्रमकल्याणं स्थापयाम्यत्र तं प्रभुम् १०५

निःक्रमणकल्याणोपक्रमस्थापनाय चंदनालुलितपुष्पाक्षतं प्रतिमोपरि क्षिपेत् ।

न्यग्रोधो मदगंधि सर्जमुशनश्यामे शिरीषोर्हता-
मेते ते किल नागसर्जजटिनः श्रीतिंदुकः पाटलः ।
जंब्वश्वत्थकपित्थनंदकविठाम्रावंजुलश्चंपको
जीयासु बकुलोत्र वांशिकधवौ शालश्च दीक्षाद्रुमाः ॥ १०६ ॥

लिये भगवानके ऊपर पुष्पोंकी अंजलि क्षेपण करे। ९९ ॥ उसके बाद प्रभुके वैराग्य होनेके समय लौकांतिक देवोंकर " विजयस्व " इत्यादि छह श्लोकोंसे स्तुति करना। १००।१०१ १०२।१०३।१०४।१०५ ॥ फिर तपकल्याणका आरंभ स्थापन करनेके लिये चंदनसे मिश्रित

ओं णमो अरहंताणं जिनदीक्षावनवृक्षा अत्रावतरंत्विति स्वाहा । जिनदीक्षावनवृक्षस्थापनाय मूलवेद्या प्रत्यग्निवेशितायाः प्रतिष्ठेयमहाप्रतिमायाः पुरस्तात्पुष्पाणि प्रकिरेत् ।

कल्पांतार्णववीचिविभ्रमनिपानाक्रांतदिकं प्रभुः
शक्रैरेत्य कृता स्तवादिकाविधिः स्वं वर्गमापृच्छ्यमां ।
त्यक्ता भूपखगामरोढाशिविकामारुह्य गत्वा वनं
पर्यंकस्य उदग्मुखो नतशिवो वा प्राङ्मुखः प्रव्रजेत् ॥ १०७ ॥
सोयं मुक्तिपुरीं प्रयान् विजयतां स्तादस्य पंथाःशिवो
नंद्यादस्य मनो विशुद्धैरनिशं सैद्धा गुणाः पांत्वमुम् ।
क्रोधादिप्रतिरोधिनोस्य सुतपःशस्त्रैः पतंतु क्षताः
संतश्चैनमनारतं परिचरंत्वेतत्पदं प्रेप्सवः ॥ १०८ ॥

पुष्प अक्षतोंको प्रतिमाके ऊपर क्षेपण करे । " न्यग्रोधो " इत्यादि तथा " ओं णमो " इत्यादि बोलकर भगवानके वड़ सप्तपर्ण आदि दीक्षावनवृक्ष स्थापन करनेकेलिये मूलवेदीके पश्चिमकी तरफ स्थापित प्रतिष्ठेय महाप्रतिमाके आगे पुष्पोंको क्षेपण करे ॥ १०६ ॥ " कल्पांता " इत्यादि श्लोक बोलकर मूलवेदकि सिंहासनसे प्रतिमाको उठाकर उत्तम पालकीमें वैठाकर महान उच्छवके साथ लेजाकर पहले स्थापनकिये गये दीक्षावन वृक्षके

एतत्पठन् मूलवेदीपीठात् प्रतिमामुत्क्षिप्य दिव्यशिविकामारोप्य महोत्सवेन नीत्वा पूर्वस्थापितदीक्षावनवृक्षतले निवेशयन्निमं मंत्रं पठेत् । ओं नमो सिद्धाणं भगवान् स्वयंभू रत्न सुनिविष्टो भवत्विति स्वाहा । अनेनैव मंत्रेण शेपप्रतिमास्वपि निष्क्रमणकल्याणस्थापनाय पुष्पाणि क्षिपेत् ।

स्वस्त्यस्मै वनशाखिने द्रपदियं स्ताचांद्रकांती मुदे ।
ये दीक्षागामिनो न्यधान्नम इमान् राज्ञः समं दीक्षितान् ।
शक्रः सतत्त्वधियोधिरत्नपटलौ मत्यग्रहीत्तत्कचा-
स्तीर्थेषु प्रतपत्वलं तदुपदा द्दष्नोर्णवः पंचमः ॥ १०९ ॥
ममेदमहमस्येति मतिं भित्वार्हतोज्झिताः ।
पुनंतु विश्वस्त्रग्वस्त्रभूषाः संपूजिताः सुरैः ॥ ११० ॥

ओं नमो भगवतेर्हते सद्यः सामायिकप्रपन्नाय कंकणमपनयामीति स्वाहा । कंकणमपनीय दीक्षाविस्थापनाय प्रतिमादिषु पुष्पाणि क्षिपेत् । वनप्रस्थानप्रव्रज्याग्रहणाद्विस्थापनं ।

नीचे स्थापन करे और उस समय " ओं णमो " इत्यादि स्थापनमंत्र बोले ॥ १०७।१०८ ॥ इसी मंत्रसे अन्य प्रतिमाओंमें भी तपकल्याण स्थापन करनेकेलिये पुष्पोंको क्षेपण करे " स्वस्त्यस्मै " इत्यादि दो श्लोक तथा " ओं नमो " इत्यादि बोलकर कंकणादिको उतार कर दीक्षास्थापनकेलिये प्रतिमाके ऊपर पुष्पोंको क्षेपण करे । इस तरह वनमें जाना,

स्वामीसिद्धप्रभुगुणरतः सर्वसावद्ययोग-
व्यावृत्तात्मा स्खलितविमुखस्तत्क्षणादुद्गतेन ।
तस्मै बोधत्रय इव मनःपर्ययेणोपगूढो
व्युत्कृष्टांगः स्वरसविलसद्भावनो देदिवीति ॥ १११ ॥

मतिश्रुतावधिमनःपर्ययाख्यसम्यग्ज्ञानचतुष्टयस्थापनाय चतुर्वर्तिदीपावतारणं विदध्यात् ।

अथेंद्राः सिद्धचारित्रयोगशांतिभक्तिभिः । जिननिष्क्रमणकल्याणक्रियां कुर्युः ससूरयः ११२

स्वं विंदन् स्वतया परंपरतया तीव्रैस्तपोभिर्भवान्
कृष्ट्वा पाकमवाप कष्टव्यनिशं कर्मांशतः शातयन् ।
आकैवल्यपदाद्यथोत्तरविशुद्धयुद्धिद्यमानात्मवित्
सांद्रानंदरसं स्वयं पिबति यः सोयं जगत्त्रायताम् ॥ ११३ ॥

दीक्षा ग्रहण करना, केशलोंच करना आदिका स्थापन हुआ ॥ १०९।११० ॥ " स्वामी " इत्यादि बोलकर मतिश्रुत अवधि मनःपर्यय-इन चार ज्ञानोंको बतलानेके लिये चार बत्तियोंवाला दीपक जलावे ॥ १११ ॥ उसके बाद वे इंद्र सिद्ध चारित्र शांति आदि भक्तिको करके भगवानके तपकल्याणकी क्रियाको करें ॥ ११२ ॥ " स्वं विंदन् " इत्यादि बोलकर

विशिष्टतपोनुष्ठानप्रातिष्ठार्थे प्रतिमोपरि पुष्पांजलिं क्षिपेत् ।
ततोर्चां तां पुनर्वेदीं नीत्वा ताभिः सद्यांजसाऽध्यानावतारितजिनां योजयेत् तिलकादिना ११४
एष क्रमश्चलार्चानां विस्तरेण प्ररूपितः । स्थिराणांतु यथास्थाने सर्वमेनं प्रकल्पयेत्॥११५॥

किंच—गर्भावतारादिविधिः समस्तं स्थानस्थिता चाल्याजिनेन्द्रबिंबे ।
संकल्प्य सिंहासनपादपीठमध्येस्य हैमीं निदधे शलाकाम् ॥ ११६ ॥

श्रीपादपीठसिंहपीठयोर्मध्ये सुवर्णशलाकानिवेशनम् । इति निःक्रमणकल्याणस्थापना ।
अथातस्तिलकदानविधानं । तत्रादौ तावकल्याणपंचकरोपणमनुवर्णयिष्यामः ।

यद्गर्भावतरे गृहे जनयितुः प्रागेव शक्राज्ञया
षण्मासान्नव चानु रत्नकनकं वित्तेश्वरो वर्षति ।

विशेषतपस्या स्थापन करनेकेलिये प्रतिमाके ऊपर पुष्पांजलि क्षेपण करें ॥ ११३ ॥ उसके बाद उस प्रतिमाको वेदीपर लेजाकर तिलकादि क्रियासे युक्त करे ॥ ११४ ॥ यह क्रम चल प्रतिमाओंका विस्तारसे कहा गया है परंतु स्थिर प्रतिमाओंका उसी स्थान पर कल्पना करे ॥ ११५ ॥ " गर्भाव " इत्यादि बोलकर भद्रासनोंके मध्यमें सोनेकी सलाई रक्खे। यह निष्क्रमण कल्याणकी स्थापना हुई ॥ ११६ ॥ अब तिलकदानविधि कहते हैं । उसमें सबसे पहले पांच कल्याणोंका स्थापन कहते हैं । जिस प्रभुके गर्भमें आनेके पहलेही छह

भत्युर्वी मणिगर्भिणी सुरसरिन्नीरोक्षिता पोडश-
स्वप्नेक्षामुदितां भजंति जननीं श्रीदिक्कुमार्योऽसि सः ॥ ११७ ॥

प्रच्छन्नं जननीमुपास्य शयनादानीय शच्यार्पितं
यं तत्वास चतुर्णिकायविबुधः श्रीमत्करींद्राश्रितः ।
सौधर्मांकनिवेशितं सुरगिरिं नीत्वाभिषिच्यावया
संयोज्योपचरत्यजस्रमसमैर्भोगैः स भास्येष नः ॥ ११८ ॥

किं कुर्वाण सुरेंद्ररुद्धविषयानंदाद्विरक्तस्तुतो
यो लौकांतिकनाकिभिः शिविकया निःक्रम्य गेहान्महैः ।
दिव्यैः सिद्धनतीद्धयावनतरुं पूत्वा परादीक्षया
भुंक्ते शुद्धनिजात्मसंविदमृतं स त्वं स्फुरस्येष नः ॥ ११९ ॥

महिने तथा आनेके वाद नौ महीने इस तरह पंद्रह महीने इंद्रकी आज्ञासे कुवेरने पिताके घर रत्न आदिकी वर्षा की तथा सोलह उत्तम स्वप्नोंके देखनेसे हर्षित जिनमाताकी दिक्कुमारियां सेवा करती हुईं ॥ ११७ ॥ जिसके जन्म कल्याणकमें इंद्राणिने माताको निद्रामें मग्न करके प्रभु वालकको लाकर इंद्रको सौंप दिया, फिर उसे ऐरावत हाथी-पर विठाके सुमेरु पर ले जाकर इन्द्रादिने अभिषेक किया, उसके वाद राज्यसंपदा आदि भोगोपभोगकी दिव्य सामग्रीसे शोभायमान हुए ॥ ११८ ॥ उसके वाद किसी

सम्यग्दृष्टिकुशाकुशव्रतशुभोत्साहेषु तिष्ठन् क्वचित्
धर्मध्यानबलादयत्नगलितामायुस्त्रयः सप्त यः ।
दृष्टि प्रप्रकृती समातपचतुर्जातित्रिनिद्रा द्विधा
श्वभ्रस्थावरसूक्ष्मतिर्यगुभयोद्योतान् कषायाष्टकम् ॥ १२० ॥

क्लैव्यं स्त्रैणमथादिमेन नवमे हास्यादिषट्कं नृतां
क्षिप्त्वोदीचि पृथक्क्रुधादिदशमे लोभं कषायाष्टकं ।
निद्रा सप्रचलामुपांत्यसमये दृग्धीघ्नविघ्नाश्चतु-
र्द्विः पंच क्षिपते परेण चरमे शुक्लेन सोऽर्हन्नसि ॥ १२१ ॥

निमित्तको पाकर भोगोंसे वैराग्यरूप हुए, उससमय लौकांतिक देवोंने आकर स्तुति की फिर दिव्य पालकीमें बैठाकर वनमें लेगये वहां पर दीक्षावृक्षके नीचे बैठके प्रभुने सिद्धोंको नमस्कार कर आप ही दीक्षा धारण की, केशलोंच करके ध्यानमें मग्न शुद्ध निजस्वभावामृतका स्वाद लेते हुए। ऐसे प्रभु हमारे कल्याण कर्त्ता हो ॥ ११९ ॥ जिस प्रभुने धर्मध्यान और शुक्लध्यानके बलसे अनायासमें ही गुणस्थान क्रमसे कर्म प्रकृतियोंका क्षय किया। यह क्रम कर्मकांडमें विस्तारसे लिखाहुआ है। विस्तारके भयसे यहां नहीं लिखा। क्षयके क्रमसे चार घातिया कर्मोंका नाशकर केवलज्ञान आदि अनंतच-

नर्थव्यंजनमंगगीरापि पृथक्त्वेनापि संक्रामता ।
कर्मांशानव स्थितेन मनसा मोदार्भकोत्साहवत्
कुंठेन द्रुमिवाणुशः परशुना छिंदन् यतिस्त्वध्यासि ॥ १२२ ॥
क्षुण्णे मोहरिपौ भजन्नुरुयथाख्याताभिराज्याश्रियं
शुद्धस्त्वात्मनि निर्विचारविलसत्पूर्वोदितार्थश्रुतः ।
स्वच्छंदो छकदुत्कलोज्ज्वलचिदानंदैकभावो लस-
च्छेपारिव्रजवैभवः स्फुटमसि त्वं नाथ निर्ग्रंथराट् ॥ १२३ ॥
विश्वैश्वर्यविघातिघातिदितिजो छेदो गतानंतदृक्
संविद्वीर्यसुखात्मिकां त्रिजगदाकीर्णे सदस्या स्थितः ।
जीवन्मुक्तिमृपींद्रचक्रमहितस्तीर्थं चतुस्त्रिंशता
कुर्वाणोऽतिशयैः पुनात्यपि परान् संप्रातिहार्याष्टकैः ॥ १२४ ॥

उदय पाकर सयोगकेवली हुए। उससमय इंद्रने समवसरणकी रचना की। उसी समय चौंतीस अतिशय आठ प्रतिहार्य तथा पूर्वोक्त अनंतज्ञानादि चार—इसतरह छयालीस गुण मंडित हुए दिव्यध्वनिद्वारा तिर्यंचों आदि जीवोंका कल्याण करते हुए॥ १२०। १२१।१२२ १२३। १२४॥ उसके वाद प्रभुने योगोंको रोककर शुक्लध्यानके वलसे मोक्षअवस्थाके

देवव्यक्तिविशेषसंव्यवहातिव्यक्त्युल्लसल्लांछन-
श्रीमत्त्वत्क्रमपद्मयुग्मसततोपास्तौ नियुक्तं शुभैः ।
यक्षद्वंद्वमवश्यमेतदुचितैः प्राच्यैरिदानींतनै-
र्देवेंद्रैरपि मान्यते शिवमुदोप्येष्याङ्घ्रिरीशिष्यते ॥ १२५ ॥
द्वौ गंधौ रसवर्णबंधनवपुः घातकान् पंचशः
षट् षट् संहननाकृतीः शुभगतिः स्वस्वानुपूर्व्यांमुभे ।
खव्रज्ये परघातकागुरुलघूच्छ्वासोपघाता यशो
नादेयं शुभसुस्वरस्थिरयुगैः स्पर्शाष्टकं निर्मितम् ॥ १२६ ॥
व्यांगोपांगमपूर्णदुर्भगयुगे प्रत्येक नीचैः कुले
वेद्यं चान्यतरद्विसप्ततिमुपांत्ये सूरयोगं क्षणे ।
आदेयं सनिजानुपूर्व्यनृगतिं पंचाक्षयोतिशयः
पर्याप्तत्रसबादराणि सुभगं मर्त्यायुरुच्चैः कुलम् ॥ १२७ ॥

अंतके दो समयोंमेंसे पहले समयमें पचासी कर्म प्रकृतियोंमेंसे बहत्तर प्रकृतियोंका क्षय किया और अंतसमयमें अवशेष तेरह प्रकृतियोंका नाशकर कर्मोंसे मुक्त हुए तीनलोकके शिखरपर जा विराजे ॥ १२५ । १२६ । १२७ । १२८ । १२९ ॥ इसप्रकार पूर्वोक्त श्लोकोंको

द्वेधेनान्यतरेण तीर्थकमार अष्टादशाप्यंतिमे
निष्कृत्यप्रकृतीरनुत्तरसमुच्छिन्नाक्रियध्यानतः ।
यः प्राप्तो जगदग्रमेकसमयेनोर्ध्वंगमात्माष्टभिः
सम्यक्त्वादिगुणैर्विभाति स भवानत्रार्थितोच्यार्ज्जगत् ॥ १२८ ॥
मुक्तिश्रीपरिरंभनिर्भरचिदानन्देन येनोज्झितं
देहं द्राक् स्वयमस्तसंहतितडिद्वामेव मायामयम् ।
कृत्वाग्नींद्रकिरीटपावकयुतैः श्रीचन्दनाद्यैर्मुदा
संस्कृत्याभ्युपयांति भस्म भुवनाधीशाः स जीयात् प्रभुः ॥ १२९ ॥

एतत्पठित्वा प्रतिमोपरि पुष्पांजलिमापयेत् । इति कल्याणपंचकारोपणविधानं । अथ संस्कारमालाधिरोपणम्।

न्यस्यामथेह विंबेष्ट चत्वारिंशतमर्हतः । संस्कारान् दृष्टिलाभादिशिवांतपदगोचरान्॥१३०॥

पढकर प्रतिमाके ऊपर पुष्पोंकी अंजलि क्षेपण करे। यह कल्याणपंचककी आरोपणाविधि हुई । अब संस्कारमालाकी आरोपण विधि कहते हैं। "न्यस्या" इत्यादि श्लोक बोलकर सम्यग्दर्शनप्राप्तिके संस्कारसे लेकर मोक्षप्राप्तितक संस्कार स्थापनेकी प्रतिज्ञा करे ॥ १३० ॥

सद्दर्शनस्य संस्कारः स्फुरत्वयमिहार्हति । संज्ञानस्यैव सद्वृत्तस्यैष सत्तपसोप्ययम् ॥१३१॥
एष वीर्यचतुष्कस्य मात्रष्टतयमंडले । प्रवेशस्यायमेषोष्टशुद्ध्यवष्टंभनिष्ठिते ॥ १३२ ॥
परीषहजयस्यायं त्रियोगासंयमच्युतेः । शीलमस्यायमेष त्रिकरणासंयमारतेः ॥ १३३ ॥
अयं दशा संयमोपरमस्यैषोक्षनिर्जितेः । अयं संज्ञानिग्रहस्य दशधर्मधृतेरयम् ॥ १३४ ॥
अष्टादशसहस्राणां शीलानामयमेषकः । चतुरभ्यधिकाशीतिगुणलक्षसमाश्रयः ॥ १३५ ॥
विशिष्टधर्मध्यानस्य अयमेषोतिशायिनः । अप्रमत्तयमस्यायं सुदृढश्रुततेजसः ॥ १३६ ॥
अकंपमकरणश्रेण्यारोहणस्यापुकोसकौ । अनंतगुणशुद्धेश्चाप्यामवृत्तकृतेरयम् ॥ १३७ ॥
अयं पृथक्त्ववीतर्कवीचारप्रणिधेरयम् । अपूर्वकरणस्यैषो निवृत्तिकरणस्य च ॥ १३८ ॥
बादराणां कषायाणामयं किट्टिकृतेरयम् । सूक्ष्माणामेष पूर्वेषां किट्टिनिर्लेपनस्य च ॥१३९॥
एषोन्येषामयं सूक्ष्मकषायचरणस्य च । प्रक्षीणमोहनस्यायं यथाख्यातविधेरयम् ॥ १४० ॥
अयमेकत्ववीतर्कवीचारध्यानभूरयम । घातिघातस्य कैवल्यज्ञानदृष्ट्युद्यतेरयम् ॥ १४१ ॥
तीर्थप्रवर्तनस्यायमेष सूक्ष्मक्रियस्य च । शैलेशीकरणस्यायं परसंवरवर्त्यसौ ॥ १४२ ॥
योगकिट्टिकृतेरेष तन्निर्लेपनगाम्यसौ समुच्छिन्नक्रियस्यायं श्रितोयं निर्जरां पराम् ॥१४३॥

"सद्दर्शन" इत्यादि एकसौ पैंतालीस तक श्लोक बोलकर अभिप्राय मनमें धारण करके प्रतिमाके ऊपर पुष्पांजली क्षेपण करे ॥ १३१ से १४५ ॥ इसप्रकार अड़तालीस संस्कारोंकी

सर्वकर्मक्षयस्यायमनादिभवपर्ययः । विनाशस्याशुकोनंतसिद्धत्वादिगतेरयम् ॥ १४४ ॥
आदेयसहजज्ञानोपयोगैश्वर्यचार्यसौ । एष देहसाद्यात्येक्षोपयोगैश्वर्यगोचरः ॥ १४५ ॥

एतदर्थारोपणपरायणांतःकरणः पठित्वा प्रतिमोपरि पुष्पांजलिं क्षिपेत् । इत्यष्टचत्वारिंशत्संस्कारमालारोपणविधानम् । अथ मंत्रन्यासविधानम् ।

विश्वोद्भासि परब्रह्मव्यंजकं स्यात्पदांकितम्। शब्दब्रह्मेति मंत्रालीं न्यस्यामीह जिनेशिनः१४६

मंत्रन्यासप्रतिज्ञानाय प्रतिमोपरि पुष्पांजलिं क्षिपेत् ।

भालनेत्रश्रवोनासाकपोलरदपंक्तिपु । स्कंधयोर्मूर्ध्नि जिह्वाग्रे ओंमायार्ह रमोत्तरान् ॥ १४७ ॥

स्थापनाका विधान हुआ । अब मंत्रन्यास विधि कहते हैं—मैं स्यात्पदसे चिन्हित, जगतका प्रकाशक और परब्रह्मको कहनेवाले ऐसे शब्दब्रह्म इस मंत्रको अर्थात् ब्रह्म नामको जिनेश्वरमें स्थापित करता हूं ऐसा कहकर मंत्रन्यासकी प्रतिज्ञा प्रगट करनेकेलिये प्रतिमाके ऊपर पुष्पोंकी अंजलि चढावे ॥ १४६ ॥

उसके बाद "भाल" इत्यादि चार श्लोक बोलकर ओं ह्रीं अर्हं श्रींपूर्वक अकारादि वर्णोंको शरदऋतुके निर्मल चंद्रमाके समान चिंतवन करे तथा प्रतिष्ठेय प्रतिमामें हाथसे स्थापन करे। वह इसतरह हैं—"ओं" इत्यादिको ललाटमें दाहिनी बांई तरफ स्थापन करे, इसीप्रकार 'इई' को नेत्रोंमें, उऊको कानोंमें, ऋॠ को नाकमें, ऌॡको गालोंपर, एऐ को दांतोंमें, ओ औ को कंधेके दोनों भागोंमें, अं को मस्तकमें, अःको जीभके अगाड़ीके भागपर, कवर्गको दाहिनी

स्वरान् द्विशः पृथक्कद्वद्वाक्षोर्दक्षिणवामयोः । कचवर्गौ तथा कुक्ष्योष्टतवर्गौ पृथक् पफौ ॥ १४८ ॥
ऊर्वोर्बं गुह्यके नाभ्यां भं मं मांसलतापदे । देहे य मूर्ध्नि रं लं पृष्ठेधिसंधि वं ॥ १४९ ॥
शं जानुनोर्गुल्फयोः पं पादयोः संनिवेश्य हं । सर्वप्राणपदे साक्षाज्जिनमेपोवतारये ॥ १५० ॥

ओं ह्रीं अर्हं श्रीं एतत्पूर्वकानकारादिवर्णान शरच्चंद्रगौरान् यथोक्तस्थानेषु मनसा ध्यात्वा प्रतिष्ठेयप्रतिमासु करेण विन्यसेत् । तथाहि । ओं ह्रीं अर्हं श्रीं अ आ ललाटे दक्षिणतः प्रभृति न्यसेत्, ओं ह्रीं अर्हं श्रीं इई दक्षिणेतरनेत्रयोः । एवं सर्वत्र । उऊ कर्णयोः ऋ ॠ नासापुटयोः, ऌ ॡ गंडयोः, ए ऐ ऊर्ध्वाधो दंतपंक्त्योः, ओ औ स्कंधयोः, अं मस्तके, अः जिह्वाग्रे, क ख ग घ ङ दक्षिणभुजे, च छ ज झ ञ वामभुजे, ट ठ ड ढ ण दक्षिणकुक्षौ, त थ द ध न वामकुक्षौ, प दक्षिणोरौ, फ वामोरौ, ब गुह्ये, भ नाभिमंडले, म स्फिजोः, य शरीरस्थाने उदरे, र ऊर्ध्वरोमांचे मस्तकादिकेशेष्वित्यर्थः, ल पृष्ठे, व ग्रीवाकक्षादिसंधिषु, श जानुयुग्मे, ष गुल्फमूलयोः, स पदयोः ह सर्वप्राणस्थाने हृदये । इति मंत्रन्यासविधानं । अथ प्रतिष्ठातिलकदानं ।

भुजामें, चवर्गको बांई बांहमें, टवर्गको दाहिनी कूखमें, तवर्गको बांई कूखमें, प दाहिनी जांघमें, फ बांई जांघमें, ब गुह्यस्थानमें 'भ नाभिस्थानमें, म चूतड़ोंमें, य उदरमें, र शिरके केशोंमें, ल पीठमें, व गले कांख आदिकी संधिओंमें, श घुटनोंमें, ष पैरोंमें, हकारको हृदयस्थानमें, स्थापन करे ॥ १४७ । १४८ । १४९ । १५०॥ यह मंत्रन्यास विधि हुई । अब प्रति-

प्रीत्यै पिंगा प्रियंगूफलमचिरफलं मंगलार्थं दधि स्यात्
सिद्धार्था वांछितार्थान् ददाति सुमनसः सौमनस्यं महायुः ।
दूर्वा श्रीखंडलोहप्रभृतिसुरभितामृद्धिमृद्धिश्च वृद्धिं
वृद्धिः शैत्यं तुषारो क्षतविशदयशास्यक्षताश्चेत्यमीभिः ॥ १५१ ॥
शुच्या कौसुंभवस्त्राभरणघुसृणसन्माल्यभाजा चतुष्के
तिष्ठंत्या भर्तृवस्त्रांचलयुतवसनप्रांतया यद्वपत्या ।
क्षोणोद्भासि प्रदीपामलजलपवित्ताभ्यर्चितायां शिलायां
पिष्टैर्दत्वा गुडार्द्रांस्तिलकयतु कृतावाहनादिर्जिनार्चाम् ॥ १५२ ॥

चत्वारि मंगलं स्वाहेत्यंतेन प्रणवादिना । प्रियंगुः स्थापकैर्जप्त्वा धार्या हैमादिपात्रगा ॥१५३

तिलकद्रव्यसज्जीकरणं । अत्र स्थापनानिक्षेपेण यमाश्रित्यावाहनादिमंत्राः कथ्यंते तद्यथा । ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः असिआउसा एहि २ संवौषट् आवाहनं, ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः असि आउसा तिष्ठ २ ठ ठ स्थापनं, ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः असिआउसा अत्र सन्निहितो भव २ वषट् सन्निधीकरणं

प्रातिलकदानकी विधि कहते हैं ॥ हरताल आदि तिलक द्रव्य सोनेके पात्रमें रखकर "सि-द्धार्था" इत्यादि तीन श्लोक तथा "ओं" इत्यादिसे आवाहनादि करके जिन प्रतिमामें तिलक लगावे अथवा उसके आगे तिलक द्रव्य चढावे ॥ १५१ । १५२ । १५३ ॥ इसप्रकार वह इंद्र

कृत्वैवं कर्म शक्रोर्चां पूरकेण जिनं स्मरन् । सुलग्ने रेचकेनांतः श्रियां वा तत्पदं न्यसेत् ॥ १५४ ॥

तिलकमंत्रः । इति तिलकदानविधानं । अथाधिवासनाविधानं ।

गंधाक्षतस्रग्वस्त्रान्नयवालीकंकणेषुभिः । चरुधूपारार्तिकफलैर्विरूढकयवारकैः ॥ १५५ ॥

सवर्णपूरेक्षुवालिवार्तिभृंगारकैरिमैः । मंत्राभिमंत्रितैश्चित्तैः सार्घस्वस्त्ययनैः क्रमात् ॥ १५६ ॥

एष निष्पतिघो देव्यस्केवलज्ञाननिर्वृतिम् । प्रतिष्ठितमहार्चायां जिनेंद्रमधिवासये ॥ १५७ ॥

स्वासन्नीकृतचंदनाद्यधिवासनद्रव्येषु पुष्पाक्षतं प्रक्षिप्य तत्कालप्रतिष्ठितार्हत्प्रतिमां नमस्कुर्यात् ।

कर्पूरगकलवंग एला करंबितं चंदनौघैः ।
दूरं स्फुरत्परिमलैर्जिनभर्तुराराद् विद्राणसौरभमदैरपि चर्चयेऽग्रीन् ॥ १५८ ॥

ॐ नमोर्हते सर्वशरीरावस्थिताय पृथु २ गंधं २ गृहाण स्वाहा ।

पूरक प्राणायामसे जिनेंद्र देवका स्मरण करता हुआ रेचक प्राणायामसे चरणकमलोंमें तिलकद्रव्य चढावे ॥ १५४ ॥ यह तिलकदान विधि हुई । अब अधिवासनाविधि कहते हैं- केवलज्ञान कल्याणसे प्रतिष्ठित हुई महान् अर्हंत प्रतिमामें अर्हत्प्रभुको स्थापित करके चंदन अक्षत आदिसे पूजा करे ॥ १५५ । १५६ । १५७ ॥ वह पूजा इसप्रकारसे है-पहले आव्हान-नादि करके पुष्प अक्षत क्षेपण करे । फिर "कर्पूर" इत्यादि श्लोक तथा "ओं नमो" इत्यादि बोलकर चंदन चढावे ॥ १५८ ॥ " शुंभत " इत्यादि तथा " ओं " इत्यादि बोलकर अक्षत

शुंभच्छारदपार्विकेंदुसुहृदामामोदनर्मोल्वण-
घ्राणमाणितचेतसां द्युतटिनीतोयाभिषिक्तात्मनाम् ।
अच्छेदार्जितसाधुशीलयशसां शाल्यक्षतानां चयै-
राचारैरिव पंचभिः सुरचनैरर्हत्पदाब्जे यजे ॥ १५९ ॥

ओं नमोर्हते सर्वशरीरावस्थिताय पृथु २ अक्षतानि गृहाण २ स्वाहा ।

सौरभ्यसांद्रमकरंदपरागजाती मंदारमल्लिकमलादिमयेन दाम्ना ।
कल्याणपंचकरुचिं शरपंचकेन प्रव्यंजता जिनपते रचयामि पूजाम् ॥ १६० ॥

ओं नमोर्हते जय सर्वतो मेदिनीपुष्प वरपुष्पाणि गृहाण २ स्वाहा । पंचशरमालारोपणम् ।

जल्पच्छुक्लतया परां विमलतां तात्कालिकीं लभ्यतां
नव्यत्वेन लसद्दशापरिचयेनोत्कर्पपर्याप्तता ।
माहार्घेण महर्घतां च परमध्यानस्य दुर्लक्ष्यतां
सूक्ष्मत्वेन ददे जिनस्य वदने वस्त्रं प्रनष्टाष्टते ॥ १६१ ॥

चढावे ॥ १५९ ॥ "सौरभ्य" इत्यादि तथा "ओं" इत्यादि बोलकर पुष्प चढावे ॥ १६० ॥
"जल्प" इत्यादि दो श्लोक तथा "ओं नमो" इत्यादि बोलकर वस्त्र और औमाला सहित सात

ओं नमो अर्हं सर्वतो दह २ तेजोधिपतये सहभूताय धूपं गृहाण गृहाण स्वाहा । अष्टासु दिक्षु धूपघटाष्टकनिवेशनम् ।

स्फूर्जज्जोतिः सज्जितैः कज्जलांहो दाहं दाहं स्नेहमेभिर्वहद्भिः ।
दीपैः शुद्धज्ञानरोचिः कलापमख्यैरर्हं देवमाराधयामः ॥ १६७ ॥

ओं नमोर्हते सर्वतः प्रज्वल २ अमिततेजसे दीपं गृहाण स्वाहा ।

श्रीमद्दाडिममोचचोचरुचका क्षौटा मघोटा शिवा
जंबूजंभलनागरंगपनसद्राक्षाकपित्थादिजैः ।
छायागंधरसप्रभाकृतिदशाभेदैर्मनोहारिभिः
साक्षात्पुण्यफलैर्जिनेंद्रचरणावभ्यर्चयामः फलैः ॥ १६८ ॥

ओं नमोर्हते सहभूताय फलानि गृहाण गृहाण स्वाहा ।

मुद्गाद्यशेषाद्विदलप्रसूतैर्वालांकुराक्षिप्तगुणप्ररोहैः ।
विरूढकैः प्रौढविशुद्धभावं यजे जिनं भव्यशुभोद्भवाय ॥ १६९ ॥

॥ १६६ ॥ "स्फूर्ज" इत्यादि तथा "ओं" इत्यादि बोलकर दीपक चढावे ॥ १६७ ॥ "श्रीमद्दा" इत्यादि तथा "ओं" इत्यादि बोलकर फल चढावे ॥ १६८ ॥ "मुद्गा" इत्यादि बोलकर दो द-लवाले धान्यके अंकूरे शुभउदय होनेके लिये चढावे ॥ १६९ ॥ "यवादि" बोलकर जौका

विरूढकस्थापनम् ।

यवादिजैर्मंगलदानदक्षैर्यावारकैः कांतिजिताश्मगर्भैः ।
जगत्पतेः सिद्धवधूविवाहवेदीमिमां भूमिमलंकरोमि ॥ १७० ॥

यवारकस्थापनम् ।

सहानवस्थानहतान् स्वपंचवर्णोच्चयेन द्युविमानवर्णान् ।
आक्षिप्यतोभि प्रभु वर्णपूरान् स्ववासिपुण्याय निवेशयामि ॥ १७१ ॥

वर्णपूरकस्थापनम् ।

व्याहारान् जिनवाक्यवन्मधुरताशैत्यप्रसादोद्धुरै–
रिक्षन् स्वादुविपाकवद्भिरितरान् मत्यादिशक्ती रसैः ।
स्थूलैरायतिशालिभिः कलयुतं कोदंडकॢप्त्यै ।
प्रभ्रारिष्टरसोन्मुखं जिनपतिः पुंड्रेक्षुभिः मार्चये ॥ १७२ ॥

इक्षुस्थापनम् ।

वस्तुं सभाभुवि मनोज्ञफलप्रवालपुष्पावलीरुपहृता भुवनश्रिये वा ।
चित्रामपिष्टमयपुष्पफलप्रवालरूपास्तनोमि वलिवर्तिततीर्जिनाग्रे ॥ १७३ ॥

आटा स्थापन करे ॥ १७० ॥ "सहान" इत्यादि बोलकर पांच रंगोंको चढावे ॥ १७१ ॥ "व्याहारान्" इत्यादि बोलकर पोंढा चढावे ॥ १७२ ॥ "वस्तु" इत्यादि बोलकर घीकी वत्ती

स्वीकार्यापि शिवाय सद्व्रतमिमे कुर्मोवतार्यार्तिकं
तस्योतिक्षिप्य च धूपमध्वमघट्टत्तच्छ्रीमुखोद्घाटनम् ॥ १८३ ॥

ॐ उसहादिवड्ढमाणाणं पंचमहाकल्लाणसंपण्णाणं महइ महावीरवड्ढमाणसामीणं सिज्झउ मे महइ महाविज्जा अट्ठमहापाडिहेरसहियाणं सयलकलाधराणं सज्जोजादरूवाणं चउतीसातिसयविसेससंजुत्ताणं बत्तीसदेविंदमाणिमउडमत्थयमहियाणं सयललोयस्स संतिपुट्ठिकल्लाणाओ आरोगाकराणं बलदेववासुदेवचक्कहररिसिमुणिजदिअणागारोवगूढाणं उहयलोयसुहयफलयराणं थुइसयसहस्सणिलयाणं परापरपरमप्पाणं अणाइणिहणाणं वलिबाहुवलिसाहिदाणं वीरवीरे ओं हां क्षां सेणवीरे वड्ढमाणवीरे हंसं जयंतं पराइएवज्जसियलंममयाणं सस्सदबंभपइट्ठियाणं उसहाइवीरमंगलमहापुरिसाणं णिच्चकालपइट्ठियाणं इत्थ सण्णिहिदा मे भवंतु मे भवंतु ठ ठ क्ष क्ष स्वाहा । श्रीमुखोद्घाटनमंत्रः ।

येनोन्मील्य समस्तवस्तुविशदोद्भासोद्भटं केवल-
ज्ञानं नेत्रमदर्शिमुक्तिपदवी भव्यात्मनामृण्पथा ।
तस्यात्रार्जुनभाजनार्पितसिता क्षीराज्यकर्पूरयुक्
वक्रस्वर्णशलाकया प्रतिकृतौ कुर्वे दृगुन्मीलनम् ॥ १८४ ॥

वाचन विधि हुई । अत्र केवलज्ञान कल्याणका स्थापन करते हैं–" इत्यधु " इत्यादि श्लोक तथा ओं उसहा " इत्यादि श्रीमुखोद्घाटन मंत्र बोलकर भगवानके मुखको उघाड़े ॥ १८३ ॥ "येनो" इत्यादि तथा "ओं नमो" इत्यादि नेत्रोन्मीलनमंत्र बोलकर नेत्रोंको उघाड़े ॥१८४॥

ओं नमो अरहंताणं अमियरसायणं विमलतेयाणं संति तुट्ठि पुट्ठि वरद सम्मादिट्ठीणं वृषभं अभयवरसणं स्वाहा । नेत्रोन्मीलनमंत्रः । अथ गुणाध्यारोपणं ।

यत्सामान्यविशेषयोः सह पृथक् स्वात्यत्वयोर्दीपव—
च्चित्तं द्योतकमर्हतः समुदभूत्ते दृक् चिदो ये च यत् ।
तद्व्यापारनिवंधि वीर्यमपि यत्सौख्यं तदव्याकुली—
भावोऽनंतचतुष्टयं तदिह तद्विंबे न्यसास्यांतरम् ॥ १८५ ॥

अनंतज्ञानादिचतुष्टयप्रतिष्ठार्थे प्रतिमोत्तमांगे चतुःपुष्पीमारोपयेत् ।

सौभिक्षं भवातिस्म योजनशतं यत्संसदं सर्वतः
सार्धक्रोशयुगोज्झिताक्षितितलं यत्रे स्पृहं सद्गतम् ।
यश्चेष्टास्वसितांगसंगवशतोप्यप्राणघातोंगिनां
या तावत्यपि विग्रहस्य कवलाहारं विनैव स्थितिः ॥ १८६ ॥
हुंडामप्यवसर्पिणीं प्रतिवदन् यो नोपसर्गोऽत्र—
स्तैजोवैभवतश्चतुर्मुखतया वीक्ष्यैकमुख्योपि या ।

अब गुणोंकी आरोपणविधि कहते हैं—"यत्सामान्य" इत्यादि बोलकर अनंतज्ञान आदि अनंत चतुष्टयकी स्थापनाकेलिये प्रतिमाके मस्तकके ऊपर चार पुष्प चढावे ॥ १८५ ॥ "सौ-

निद्रास्वप्यखिलासु यः परिदृढीभावो दृढः सर्वदा
यच्छायाविरहस्तिरश्चरदिनेऽप्यंगे क्षिपेयेपि च ॥ १८७ ॥
पक्ष्मस्पंदविपर्ययोऽनिशमृते व्याधेः प्रयत्नाच्च यो
यो मूर्तेर्नखकेशवृद्ध्युपरमो मर्त्यप्रकृत्यत्ययात् ।
ते घातिक्षयजा दशाप्यतिशया बाह्याश्च चेतश्चमत्–
कारोद्रेककृतो जिनस्य निहिता विंबे मयात्राधुना ॥ १८८ ॥
घातिक्षयजदशातिशयस्थापनार्थं पीठिकायां दश पुष्पाणि क्षिपेत् ।
धूलीशालोऽतः क्षितौ चैत्यगेहप्रासादाल्यो नाट्यशालाः सरांसि ।
मानस्तंभाश्चाधिदिग्वीथ्यतोर्णः पूर्णं खेयं वेदिरस्यं विदिक्षु ॥ १८९ ॥
वेदीभूपा पुष्पवाट्यस्ततोंतो नाट्याशोकाद्याग्रभूरुंपशाला ।
वेदीरुद्धावेध्वजोर्वीशतारमाकारांतो नाट्यकल्पद्रुमोर्वी ॥ १९० ॥
वेदीरुद्धातः स्तूपदिव्यालयोर्वीयत्पाद्युर्वीतः सनाद्यार्कशाला ।
तन्मध्येऽर्हन्गंधकुट्यासने भाग्वास्यार्नां नापिह स्थापयामि ॥ १९१ ॥

"निद्रा" इत्यादि तीन श्लोक बोलकर केवलज्ञानके समय होने वाले दस अतिशयोंके स्थापन करनेके दस फूलोंको वेदीपर चढावे १८६ । १८७ । १८८ ॥ "धूली" इत्यादि तीन

समवसरणस्थापनार्थं प्रतिमायाः समंतात् पुष्पाक्षतं क्षिपेत । इति समवसरणस्थापनम् ।

उपानीयं यतोदैवैर्देवदेवातिशायिनः । चतुर्दशाद्भुता भावाः स्थापयामीह तानपि ॥ १९२॥
ब्रुवतोर्द्धार्द्धसर्वांगि मागधोक्तिमयी प्रभोः । सभायामन्वकार्यंत मागधैर्वागिहास्तु सा॥१९३
जातिकारणवैरैकघस्मरेष्याश्रमे पुष्यन । यया प्रीतिकरा भर्तृभक्तान् मैत्रीह भातु सा॥१९४
सर्वर्तुसंपद्भ्राजिष्णु द्रुमा रत्नमयी ब्रुवत । या जिनाब्दतलासर्जि प्रभुभक्त्यास्तु सा प्रभुः १९५॥
यो विस्रसा विहरति प्रभौ मृद्धतिलोन्ववात् । यश्चाभूतपरमानंदः सर्वेषां तामिहापि तौ॥१९६॥
संमार्जनं योजनं यद्भोर्जिनाग्रेनिलैः कृतम् । या गंधोदकवृष्टिश्च मेघैस्ते भवतामिह ॥१९७॥
यांतं तं सर्वतः पद्माः पंक्तिद्वात्रिंशता ताः । सप्तसोधपदोर्थिको यत्तत्पद्मायनं त्विदम् १९८
विभुवैभवनिध्यानहृपिता पुलकानि च । फलभारानतव्रीहिव्याजाद्भूया सा त्विह ॥१९९ ॥
प्रभोर्दिशावसंहर्षाद्यन्नैर्मल्यं दधुर्दिशः । तद्योगादिव यत्खं च प्रसन्नं तद्भवत्विह ॥ २०० ॥
वरमर्द विभुभक्तुमेतैतेत्यभितो व्यधुः । यद्भावनाः समस्तान्यदेवाह्वनं तदस्त्विह ॥ २०१ ॥
रत्नरुक् चक्रदीपारसहस्रेण रविं क्षिपन । धर्मचक्रं चचाराग्रे यत्प्रभोस्तत्स्फुरत्विदम्॥२०२॥
छत्रचामरभृंगारकुंभाब्दव्यजनध्वजान् । स्वसुप्रतिष्ठान् यानिंद्रो भर्तुस्तेनेत्र संतु तो ॥२०३॥

श्लोक बोलकर समवसरण स्थापन करनेके लिये प्रतिमाके चारोंतरफ पुष्प और अक्षत फेंके ॥ १८९ । १९० । १९१ ॥ "उपानीयं" इत्यादि बारह श्लोक बोलकर देवकृत अतिशयोंके स्थापन करनेकेलिये वेदीपर चौदह पुष्प चढावे ॥ १९२ से २०३ ॥

चतुर्दशदेवोपनीतातिशयस्थापनार्थं पीठिकायां चतुर्दश पुष्पाणि क्षिपेत् । इति दिव्यातिशय-स्थापनम् ।

स्पृश्याः स्पृशंतो नापङ्क्तिर्यन्नामापि तथापि तम् । येनेंद्रो यष्टभक्त्या तव प्रातिहार्याष्टकं त्विदम्॥

अष्टमहाप्रातिहार्यस्थापनाय पीठिकायामष्टपुष्पीं क्षिपेत् ।

रत्नांशुवर्गेन्द्रधनुर्न्यातास्या हरिवाहनम् । यच्चक्रे धर्मैकात्मा सिंहपीठं तदस्त्वदः ॥२०५॥

ओं सिंहासनश्रियै स्वाहा । सिंहासने पुष्पांजलिं क्षिपेत् ।

प्रवाद्यभेद्यो मेघौघध्वनिजिद्योजनं सद । व्याप्नुवन् यो न केनापि व्यधाय्येष सतदध्वनिः ॥

ओं ध्वनिश्रियै स्वाहा । सरस्वत्यां पुष्पांजलिं क्षिपेत् ।

यक्षैर्दोधूयमानार्हद्देहं छायाछलाश्रिता । या चामरचतुःषष्टिर्नानटीतिस्म सास्त्वियम्॥२०७॥

ओं चतुःषष्टिचामरश्रियै स्वाहा । चामरधारियक्षयोः पुष्पांजलिं क्षिपेत् ।

चक्षुष्ये पश्यतां सप्त भासयत्यनिशं भवान् । भामंडले त्रुडन् यत्र विश्वतेजोऽस्यदोस्तु तत् ॥

" स्पृश्याः " इत्यादि बोलकर आठ प्रातिहार्य स्थापन करनेकेलिये वेदीमें आठ पुष्प चढा-वे ॥ २०४ ॥ " रत्ना " इत्यादि तथा " ओं " इत्यादि बोलकर सिंहासनके आगे पुष्प चढ़ावे ॥ २०५ ॥ " प्रवाद्य " इत्यादि तथा " ओं " इत्यादि बोलकर सरस्वतीके आगे पुष्प चढावे ॥ २०६ ॥ " यक्षै " इत्यादि तथा " ओं " इत्यादि बोलकर चमर धारण करनेवाले यक्षोंके आगे पुष्पांजलि चढावे ॥ २०७ ॥ " चक्षुष्ये " इत्यादि तथा " ओं " बोलकर भा-

ओं भामंडलश्रियै स्वाहा । भामण्डले पुष्पांजलिं क्षिपेत् ।

रत्नरोचि नदद्भृंगखगोवातचलल्लतः । विश्वाशोकीकृते व्यक्तं योऽशोको नटदेष सः २०९

ओं रत्नाशोकाश्रियै स्वाहा । रक्ताशोके पुष्पांजलिं क्षिपेत् ।

मुक्तप्रारोहमालंवि मुक्त्वा लंचूप लक्षणः । छत्रत्रयं स्मावत् श्रीनिधिं यत्र व्यात्यदोस्तु तत् ॥

ओं छत्रत्रयाश्रियै स्वाहा । छत्रत्रये पुष्पांजलिं क्षिपेत् ।

सभ्याः शृण्वंत्वसभ्योक्तीर्मेतीवातीव योध्वनत् । सार्धद्वादशकोट्युद्यद्वादित्रोयं स दुंदुभिः ॥

ओं दुंदुभिश्रियै स्वाहा । दुंदुभौ पुष्पांजलिं क्षिपेत् ।

गंगांभः सुभगे गुंजद्भृंगौघा सुमनस्तमे । सुमनोभिः सुमनसां वृष्टिर्या सर्जं सास्त्वसौ २१२

ओं पुष्पवृष्टिश्रियै स्वाहा । मालाविद्याधरयोः पुष्पांजलिं क्षिपेत् ।

इत्यष्टौ प्रातिहार्याणि प्रतिमायां जिनेशिनः । स्थापितानि च निघ्नंतु भाक्तिकानां सदापदः ॥

मंडलके आगे पुष्पांजलि चढावे ॥ २०८ " रत्न " इत्यादि तथा " ओं " इत्यादि बोलकर लाल अशोकके आगे पुष्पांजलि क्षेपण करे ॥ २०९ ॥ " मुक्त " इत्यादि तथा " ओं " इत्यादि बोलकर तीन छत्रोंकेलिये पुष्पांजलि क्षेपण करे ॥ २१० ॥ " सभ्या " इत्यादि तथा " ओं " इत्यादि बोलकर दुंदुभिवाजेकेलिये पुष्पोंको क्षेपण करे ॥ २११ ॥ " गंगांभ " इत्यादि तथा " ओं " इत्यादि बोलकर पुष्पमाला धारण करनेवालोंके आगे पुष्पोंको क्षेपण करे ॥ २१२ ॥ " इत्यष्टौ " इत्यादि बोलकर प्रतिमाके आगे आठ पुष्पोंको चढावे ॥

प्रतिमाग्रेऽष्टपुष्पीं क्षिपेत् । इत्यष्टमहाप्रातिहार्यस्थापनम् ।

वंशे जगत्पूज्यतमे प्रतीतं पृथग्विधं तीर्थकृतां यदत्र ।
तल्लांछनं संव्यवहारसिद्ध्यै बिंबे जिनस्येदमिहोल्लिखामि ॥ २१४ ॥

लांछने पुष्पांजलिं क्षिपेत् ।

शक्रेण सत्कृत्य सुभाक्तिकत्वात् त्रातुं नियुक्तो जिनशासनं यः ।
कामान दुहन्नीश जुषां यथास्वं प्रतिष्ठितस्तिष्ठतु सैष यक्षः ॥ २१५ ॥

यक्षोपरि पुष्पांजलिं क्षिपेत् ।

तद्वत्स्वपृथेष्वतिवत्सलत्वान्निवारयंती दुरितानि नित्यम् ।
यथोचितं शासनदेवतेति न्यस्तात्र यक्षी प्रतपत्वसह्यम् ॥ २१६ ॥

शासनदेवतोपरि पुष्पांजलिं क्षिपेत् ।

येनेह दर्शनविशुद्ध्यधिदैवतेन विश्वोपकाररसिकेन दिवीव गर्भम् ।
न्यूपं प्रमोदरसवर्षणपर्वणैव सर्वाणि सैष निहताद् दुरितानि नोऽर्हन् ॥ २१७ ॥

॥ २१३ ॥ " वंशे " इत्यादि बोलकर चिन्हके आगे पुष्पांजलि क्षेपण करे ॥ २१४ ॥ " शा-क्रेण " इत्यादि बोलकर यक्षके ऊपर पुष्पांजलि क्षेपण करे ॥ २१५ ॥ " तद्वत " इत्यादि बोलकर शासनदेवताके ऊपर पुष्पांजलि चढावे ॥ २१६ ॥ " येने " इत्यादि पांच श्लोक

आधीभिराधिभिरवाविपर्यीकृताया निर्गत्य मातुरुदराज्जनयन् मुदं यः ।
लोकोत्तराणि बुभुजेत्र सुखान्यजस्रं श्रेयांसि स जयतु न सदायम् ॥ २१८ ॥

समयाधिगमास्तमोहतंद्रे स्वयमुद्बुध्य झटित्यपास्तसंगम् ।
प्रशमैकरसो चरत्तपो यः स जिनोयं हरतां भवज्वरं नः॥ २१९ ॥

यः सम्यक्त्वरमावगाढदृगुपष्टंभात्समं वेदिता
द्रष्टा विश्वमुपेक्षितासपरमानंदोध्यतिष्ठद्विरम् ।
स्फूर्जत्तीर्थकरत्वनामसुकृतोद्रेकादनुगाणतीं
दिव्यां सभ्यसमीहितार्थकथनीं नस्तत् स्फुरत्वेष नः ॥ २२० ॥

योष्टादशशीलसहस्रसंयुक्तश्चतुरशीतिगुणलक्षैः ।
परिणम्य कृत्स्नकर्मच्युतोष्ट भजते गुणान् सचेहास्ताम् ॥ २२१ ॥

एतत्पंचकं पठित्वा कल्याणपंचकस्थापनाभिव्यक्तये प्रतिमायां पुष्पांजलिं क्षिपेत् ।

इति सिद्धामरसाक्षाज्जीवन् मुक्तिश्रियं स्वसात्कृत्य ।
भजतो जगतो पत्युः कंकणमिह मोक्षयाम्येषः ॥ २२२ ॥

बोलकर पांचकल्याणोंके प्रगट करनेकेलिये प्रतिमाके आगे पुष्पांजलि चढावे ॥ २१७ से २२१ ॥ " इति " इत्यादि श्लोक तथा " ओं " इत्यादि बोलकर प्रतिमाके आगे पुष्प क्षेपण

ओं "सत्तक्खरसक्कारं अरहंताणं णमोत्ति भावेण । जो कुणइ अणण्णमणो सो गच्छइ उत्तमं ठाणं" ॥ कंकणमोक्षणं । ॐ "केवलणाणदिवायरकिरणकलावप्पणासियण्णाणो । णव केवलल्द्धुग्गमसुजणियपरमप्पववएसो" असहायणाणदंसणसहिओ इदि केवली हु जोएण। जुत्तोत्ति सजोगिजिणो अणाइणिहणारिसे उत्तो" ॥ इत्येषोऽर्हत्साक्षादत्रावतीर्णो विश्वं पात्विति स्वाहा। प्रतिमोपरि पुष्पांजलिं क्षिपेत् । अर्हद्देवसाक्षात्करणविधानम् । ओं "खवियघणघाइकम्मा चउतीसातिसयपंचकल्लाणा । अट्ठवरपाडिहेरा अरहंता मंगलं मज्झ" भूयासुरिति स्वाहा ॥ परमोत्सवेन महार्घमवतारयेत् ।

सिद्धश्रुतचारित्रर्षिशांतिभक्तिभिरन्विताः । केवलज्ञानकल्याणक्रियां कुर्वंतु याजकाः ॥२२३॥

इति केवलज्ञानकल्याणकस्थापनविधानम् ।

न्यस्यनिर्वाणकल्याणं सूत्रोक्तविधिना ततः। सिद्धश्रुतचरित्रर्षिशिवशांतीन् स्तुवंतु ते॥२२४॥

इति निर्वाणकल्याणस्थापनम् ।

करे ॥ २२२ ॥ यह अर्हंत प्रभुका साक्षात्करण हुआ । "ओं" इत्यादि स्वाहातक बोलकर बहुत उत्सवके साथ महार्घ चढावे ॥ इसप्रकार प्रतिष्ठा करनेवाले सिद्ध श्रुत चारित्र ऋषि शांति भक्तियों सहित केवलज्ञानकल्याणकी क्रिया करें । । २२३ ॥ इसतरह केवलज्ञानकल्याणकी स्थापना विधि हुई ॥ उसके बाद वे इंद्र शास्त्रकथित विधिसे निर्वाण कल्याणका स्थापन करके सिद्ध श्रुत चारित्र ऋषि शिव शांति स्तुतिका पाठ करें ॥२२४॥ जिसतरह

तथा सामान्यतोविंबे गुणाद्यारोप्यमर्हताम् । यथास्वं च पृथक्कल्यं स्वर्गावतरणादिकम् २२५

अप्यंगुष्ठमितामनेन विधिना जैनीं प्रतिष्ठाप्य ये
शास्त्रोक्तां प्रतिमां भजंति विधिवन्नित्याभिषेकादिभिः ।
तेऽर्हद्भक्तिदृढानुरंजितधियो भुक्त्वा शिवाधर-
श्रामण्योभ्युदयावलीरनुभवंत्यात्यंतिकीं निर्वृतिम् ॥ २२६ ॥

इत्याशाधरविरचिते प्रतिष्ठासारोद्धारे जिनयज्ञकल्पापरनाम्नि जिनप्रतिष्ठाविधानीयो नाम चतुर्थोध्याय: ॥ ४ ॥

स्वर्गसे अवतार लेना आदि क्रियायें हुई हैं उसीतरह अर्हतके प्रतिबिंबमें गुणादिकी स्थापना करनी चाहिये ॥ २२५ ॥ इसतरह निर्वाण कल्याणकी स्थापनाका विधान हुआ । जो अंगुष्ठप्रमाण शास्त्रोक्त जिन प्रतिमाको भी इसी पूर्वकथित विधिसे प्रतिष्ठित करके हमेशा अभिषेकादि विधिसे पूजते हैं वे मुमुक्षु इस लोकमें उत्कृष्ट भोगोंको भोगकर बादमें अनंतसुखरूप मोक्षको पाते हैं ॥ २२६ ॥

इसप्रकार पं० आशाधर विरचित जिनयज्ञकल्प द्वितीय नामवाले प्रतिष्ठासारोद्धारमें अर्हतप्रतिष्ठाकी विधिको कहनेवाला चौथा अध्याय पूर्ण हुआ ॥ ४ ॥

शश्वच्चेतयते यदुत्सवमिमं ध्यायंति यद्योगिनो
येन प्राणिति विश्वमिंद्रनिकरा यस्मै नमस्कुर्वते ।
वैचित्री जगतो यतोस्ति पदवी यस्यांतरप्रत्ययो
मुक्तिर्यत्र लयस्तनोतु जगतां शांतिं परं ब्रह्म तत् ॥ ३ ॥

अनेन जिनाग्रे शांतिधारा प्रकल्प्येत्थं बलिं दद्यात् । ओं अर्हद्भ्यो नमः सिद्धेभ्यो नमः सूरिभ्यो नमः पाठकेभ्यो नमः सर्वसाधुभ्यो नमः । अतीतानागतवर्तमानत्रिकालगोचरानंतद्रव्यगुणपर्यायात्मकवस्तुपरिच्छेदकसम्यग्दर्शनसम्यग्ज्ञानचारित्राद्यनेकगुणगणाधारपंचपरमेष्ठिभ्यो नमः । ओं पुण्याहं २ प्रीयंतां २ ऋषभादि महति महावीर वर्धमानपर्यंतपरमतीर्थंकरदेवान् तत्समयपालिन्योऽप्रतिहतचक्रचक्रेश्वरीप्रभृतिचतुर्विंशतिशासनदेवताः गोमुखयक्षप्रभृतिचतुर्विंशतियक्षा आदित्यचंद्रमंगलबुधबृहस्पतिशुक्रशनिराहुकेतुप्रभृत्यष्टाशीतिग्रहाः वासुकिशंखपालककर्कोटपद्मकुलिकानंततक्षकमहापद्मजयविजयनागाः देवनागयक्षगंधर्वब्रह्मराक्षसभूतव्यंतरप्रभृतिभूताश्च सर्वेप्येते जिनशासनवत्सलाः

कर परब्रह्मका मनमें ध्यान करे ॥ २ ॥ यह देवताविसर्जनकी विधि हुई । "शश्व" इत्यादि बोलकर जिनदेवके आगे शांतिधारा छोड़के इसप्रकार पूजन करे ॥ ३ ॥ "ओं अर्ह" इत्यादि बोलकर पुष्प क्षेपण करे । इसमें राजा प्रजा कुटुंब आदि सब जीवोंके कल्याण होनेका चिंतवन किया जाता है । इसीको पुण्याहवाचन भी कहते हैं "ये सामग्री" इत्यादिसे अर्हंतसे

ऋष्यार्यिकाश्रावकश्राविकायष्टृयाजकराजमंत्रिपुरोहितसामंतारक्षिकप्रभृतिसमस्तलोकसमूहस्य शांतिवृद्धिपुष्टितुष्टिक्षेमकल्याणस्वायुरारोग्यप्रदा भवंतु । सर्वसौख्यप्रदाश्च संतु । देशे राष्ट्रे पुरे च सर्वदैव चौरारिमारीतिदुर्भिक्षावग्रहविघ्नौघदुष्टग्रहभूतशाकिनीप्रभृत्यशेषानिष्टानि प्रलयं प्रयांतु, राजा विजयी भवतु प्रजासौख्यं भवतु, राजप्रभृतिसमस्तलोकाः सततं जिनधर्मवत्सलाः पूजादानव्रतशीलमहामहोत्सवप्रभृतिपूद्यता भवंतु, चिरकालं नंदंतु । यत्र स्थिता भव्यप्राणिनः संसारसागरं लीलयोत्तीर्यानुपमं सिद्धिसौख्यमनंतकालमनुभवंति तच्चाशेषप्राणिगणशरणभूतं जिनशासनं नंदत्विति स्वाहा ।

ये सामग्रीविशेषदृढिमभरहृतात्क्षिप्तदुर्वारवैरि-
व्रातप्रेष्यरपताकासततपरिचितज्ञानसाम्राज्यलीलाः ।
भूतार्थोच्छेदकंदव्यवहरणघटोद्भिन्नपृक्तोक्तियुक्ति-
क्षिप्ताप्तं मन्यमाना जगदतिपुनते ते जिनाः पांतु विश्वम् ॥ ४ ॥
स्फूर्जच्छलश्युदर्चिर्भरमासितदशासाकृतैनःपतंगाः
स्वांगाकाराक्षरैकक्षणस्मरनिराकारसाकारचित्काः ।
व्योम्नो विश्वैकधाम्नः कृततिलकरुचः प्रष्टमात्मंभरीणां
व्यंजंतः स्वं सदान्याज्जिनसपर्यजुषाः संतु सिद्धाः शिवाय ॥ ५ ॥

कल्याण होनेका चिंतवन है ॥ ४ ॥ "स्फूर्ज" इत्यादि बोलकर सिद्धोंसे कल्याण प्रार्थना॥५॥

भ्राजिष्णुशक्तिविभवा भवसिंधुसेतुसर्वज्ञशासनविभासनवद्धकक्षाः ।
याः पूजयंति विविधाद्भुतसिद्धिकामास्ताश्चाष्टविघ्नमवंतु जयादिदेव्यः ॥ १६ ॥
शक्रादेशात्तीर्थकृद्देवमातॄर्याः सेवंते स्वस्वयोग्यैर्नियोगैः ।
ताः सर्वज्ञाराधनातत्पराणां संत्वष्टापि श्रेयसे श्र्यादिदेव्यः ॥ १७ ॥
अन्येपि दौवारिकलोकपालग्रहोरगानाहृतयक्षमुख्याः ।
देवा यथास्वं प्रतिपत्तिहृष्टा निघ्नंतु विघ्नान् जिनभाक्तिकानाम् ॥ १८ ॥
तद्द्रव्यमव्ययमुदेतु शुभः प्रदेशः संतन्यतां प्रतपतु प्रततं स कालः ।
भावः स नंदतु सदा यदनुग्रहेण प्रस्तौति तत्त्वरुचिमाप्तगवी नरस्य ॥ १९ ॥
किं बहुना ।
शांतिः स तनुतां समस्तजगति संगत्वतां धार्मिकैः
श्रेयःश्री परिवर्द्धतां नयधुराधुर्यो धरित्रीपतिः ।

योंसे इष्ट प्रार्थना करे ॥ १५ ॥ " भ्राजिष्णु " इत्यादि बोलकर जया आदि आठ देवियोंसे इष्ट प्रार्थना करे ॥ १६ ॥ " शक्रा " इत्यादि बोलकर श्री आदि आठ देवियोंसे इष्ट प्रार्थना करे ॥ १७ ॥ " अन्येपि " इत्यादि बोलकर इनके सिवाय अन्य देवताओंसे प्रार्थना ॥ १८ ॥ " तद्द्रव्य " इत्यादि बोलकर द्रव्य क्षेत्र काल भावोंके शुभ मिलनेकी प्रार्थना ॥ १९ ॥ बहुत कहनेसे क्या, सब जगतमें शांति रहे, धर्मात्माओंकी संगति मिले, कल्याण करनेवाली लक्ष्मी

सद्विद्यारसमुद्गिरंतु कवयो नामाप्यघः स्यात्तु मा
प्रार्थ्यं वा कियदेक एव शिवकृद्धर्मो जयत्वर्हताम् ॥ २० ॥

एतेत्मार्थपरा शक्राः छत्रचामरशालिनीम् । भृंगारहस्ता मुक्तांबुधारापूतपुरो धराम् ॥२१॥
जिनार्चामनुयांतोग्रे प्रनृत्यत्कलशांगनाः । महान् तूर्यस्वनैर्भव्यजयकोलाहलोल्वणैः ॥ २२ ॥
पूरयंतो दिशः सप्तधान्यपुष्पाक्षतादिभिः । कल्पयंतो बलिं शांत्यै त्रिःपरीयुर्जिनालयम् २३

इति बलिविधानम् ।

अथाचार्योऽभिषेक्तव्यः फलपुष्पाक्षतद्युतः । जिनगंधांबुकुंभेन यष्ट्रे दद्यात्तदाशिषम् ॥२४॥

तद्यथा ।

आयुस्तन्वंतु तुष्टिं विदधतु विधुनंत्वापदो घ्नंतु विघ्नान्
कुर्वंत्वारोग्यमुर्वीं वलयाविलासितां कीर्तिवल्लीं सृजंतु ।

बढे, न्यायमार्गपर चलनेवाला राजा हो, कविजन उत्तम विद्यारसको प्रगट करें, पापका नाम भी न रहे, अन्य विशेष प्रार्थना क्या करें संसारमें एक मोक्षको दाता जैनधर्मकी ही जय हो ॥ २० ॥ आत्मकल्याण करनेमें लीन, छत्र चमर लिये हुए, स्वच्छ जलसे भरी झारीको हाथमें लिए हुए, जिनमूर्तिके आगे नृत्य करते हुए इंद्र, सात तरहके धान्य पुष्प अक्षत आदि पूजा द्रव्यसे पूजा करते हुए जिनमंदिरकी तीन परिकमा दें ॥ २१।२२।२३ ॥ यह बलिविधान हुआ । उसके बाद प्रतिष्ठाचार्य गंधोदक अक्षत पुष्प फल दीप धूपसे प्रतिष्ठाविधि करनेवाले

धर्मं संवर्धयंतु श्रियमभिरमयंत्वर्पयंत्विष्टकामान्
कैवल्यश्रीकटाक्षानपि जिनचरणाः संजयंतु सदा वै ॥ २५ ॥
आज्ञैश्वर्यमकार्यकार्यविचयैः संतानवृद्धिर्जयः
सौभाग्यं धनधान्यवृद्धिरभयं निःशेषशत्रुक्षयः ।
पांडित्यं कविता परार्थपरता कार्तज्ञमोजस्विता
मानित्वं विनयो जयश्च भवतादर्हत्प्रसादेन वः ॥ २६ ॥
कांताः कांतिकलानुरागमधुराः पुण्यास्त्रिवर्गोद्धुरा
भृत्याः स्वाम्यनुरक्तिशक्तिरुचिरा श्च्योतन्मदाः कुंजराः ।
वाहास्तर्जितशक्रसूर्यतुरगाः शौर्योद्धताः पत्तयो
भूयासुर्भवतां जिनेंद्रचरणांभोजप्रसादात्सदा ॥ २७ ॥
गांभीर्यं मौदार्यमजर्यमार्यशौर्यं सशौंडीर्यमवार्यवीर्यम् ।
धैर्यं विपद्यार्जवमार्यभक्तिः संपद्यतां श्रीजिनपूजनाद्वः ॥ २८ ॥

इंद्रको आशीर्वाद दे ॥ २४ ॥ वह ऐसे है कि " आयु " इत्यादि ग्यारह आशीर्वाचक श्लोक पढकर यज्ञके शिरपर अक्षत आदिका क्षेपण करे ॥ २५ से ३५ ॥ यह आशीर्वाद विधि हुई । उसके बाद यज्ञा " यशोचितं " इत्यादि बोलकर जनेऊ आदिक यज्ञदीक्षाके

भवतु भवतामर्हद्भक्त्या सदा मुदितं मनो
ग्रहमुपचिता चौरौचित्यं मदासेन परस्परः ।
प्रणयिविवशैः स्वैसंवौसौद्यागयमीहितं
स्थितिरपि चित्ते प्रज्ञापराधपराहतिः ॥ २९ ॥
दृक्संशुद्धिरतोन्यतोस्तु भवतामर्हत्प्रतिष्ठाविधे
जातु क्वापि कथंचिदीपदपि मा शीलं व्रतं म्लायतु ।
दूरादेव शिरस्यधीरमरयो बध्नंतु देवांजलिं
प्रेम्णा सद्गुणसंपदा च सुहृदः श्लिष्यंतु पुष्णंतु च ॥ ३० ॥
यष्टृणां याजकानां प्रतिनुतिकृतामभ्यनुज्ञायकानां
भूयस्यांतःपुरस्य क्षितिपतनुभुवां मंत्रिसेनापतीनाम् ।
सामंतानां पुरोधः पुरविषयवनादिस्थवर्णाश्रमाणां
सर्वेषामस्तु शांत्यै सततमयमिह स्थापितो विश्वनाथः ॥ ३१ ॥
विचित्रैः स्वैर्द्रव्यं प्रतिसमयमुच्चाद्विपदपि
स्वरूपादुल्लोलैर्जलमिव मनागप्यविचलम् ।

जिन्होंको गुरु (आचार्य) के चरण कमलोंके आगे रखकर नमस्कार करे। यह यज्ञदीक्षा

अनेहो माहात्म्याहितनवनवीभावमखिलं
भणिण्वाणाः स्पष्टं युगपदिह ते पांतु जिनपाः ॥ ३२ ॥
संभुज्यार्थिभिः संविभज्य च यथाविध्येवमेवाथवा
निर्विण्णास्तृणवद्विसृज्य कमलां स्वं स्वं स्वयं केऽपि ये ।
संवेद्यामलकेवलाचलचिदानंदे सदैवासते
ते सिद्धाः प्रथयंतु वः प्रति शिवश्रीसद्विलासान् सदा ॥ ३३ ॥
ज्ञात्वा श्रद्धाय तत्त्वं भजति समरसास्वादमानान्यनीहा-
वृत्त्या प्राणानुसर्पन्मरुदनु च कचानष्टमे ब्रह्मरंध्रे ।
भ्रश्यत्यज्ञाय मोहो मृतिमयति मनः केवलं चापि माया-
च्छून्यध्यानेन येषां प्रमदभरमिमे योगिनस्तन्वतां वः ॥ ३४ ॥
नार्पत्यान् विस्मयांतर्हितपतनरुजो दत्तशंपान्वितन्वन्
निःश्रेणीकृत्य भोगं वलयितपृथुतन्मूलमाद्राहितांघ्रि ।
श्रीकुंडद्रंगगृह्यावनितरुशिखरा द्यौवतीर्णः स्ववर्ण-
रूपासंगं संगमस्य व्यथितबहुमहाः वीरनाथः स वोऽव्यात् ॥ ३५ ॥

विसर्जनकी विधि हुई ॥ ३६ ॥ उसके बाद गुरुकी आज्ञासे शांति पाठ करके कार्यको

एता आशिषः पठित्वा यष्टुः शिरस्यक्षतान् क्षिपेत् । इत्याशीर्वादविधानम् ।

यज्ञोचितं व्रतविशेषकृतो ह्यतिष्ठन् यष्टा प्रतींद्रसहितः स्वयमे पुरावत् ।
एतानि तानि भगवज्जिनयज्ञदीक्षाचिन्हान्यथैष विसृजामि गुरोः पदाग्रे ॥ ३६ ॥

एतत्पठित्वा यज्ञोपवीतादियज्ञदीक्षाचिन्हानि गुरुपादमूले संन्यस्य नमस्येत् । इति यज्ञदीक्षाविसर्जनम् । ततो गुर्वनुज्ञया शांतिभक्त्या निष्ठापयेत् । अथ जिनप्रतिष्ठानिष्ठापनक्रियायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावंदनास्तवसमेतं शांतिभक्तिकायोत्सर्गं करोम्यहं । शेषं पूर्ववत् । ततश्चैशान्यदिशमष्टदलकमलमालिख्य चैत्याभिमुखमेतत्पठित्वा पंचागं प्रणामादिक्पालेभ्यो निजनिजमंत्रपूतयज्ञांगशेषेण सर्वशः पूजां दत्वा जिनगंधोदकतीर्थोदककलशैः सर्वशांतयेम्भः संस्रावयेत् ।

ज्ञानतोऽज्ञानतो वाथ शास्त्रोक्तं न कृतं मया तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जिनप्रभोः ॥ ३७॥

ततश्च क्षमापणाविधिमिममनुतिष्ठेत् ।

समाप्त करे । वह ऐसे है कि–" अथ जिन " इत्यादि " करोम्यहं " तक बोलकर समाप्ति विधि करे । उसके बाद समाधि भक्ति करे । उसके बाद ईशानदिशामें आठ पत्रोंवाला कमल बनाकर प्रतिमाके सामने " ज्ञानतो " इत्यादि श्लोक पढकर पंचांग प्रणाम करे । फिर पूजाकी बची हुई सामग्री सबको चढानेकेलिये देकर कलशोंसे जलधारा सब विघ्नोंकी शांतिके लिये चढावे । " ज्ञानतो " इत्यादिका अर्थ–हे जिनेंद्र मैंने जानकर अथवा अज्ञानसे शास्त्रकथितरीतिसे जो क्रिया नहीं की है वह सब आपके प्रसादसे समाप्त ही हो

चतुर्विधमहासंघं संतर्प्याहारभेषजैः । योग्योपकरणं दत्वा यष्टा संपूजयेत्स्वयम् ॥ ३८ ॥
अत्र ये द्रष्टुमायाता प्रतिष्ठाव्यापृताश्च ये । तांबूलगंधपुष्पाद्यैस्तान् संमान्य विसर्जयेत् ॥ ३९ ॥
प्रतिष्ठाचार्यमानम्य तस्यात्मानं समर्प्य च । वस्त्राभरणाद्यैश्च संपूज्य क्षमयेत्ततः ॥ ४० ॥
संमान्य सूत्रधारादीन् स्वर्णवस्त्रान्नभूषणैः । गांधर्वनर्तकादींश्च यथार्हं तत्समर्पयेत् ॥ ४१ ॥
सार्वकालिकपूजार्थं भूसुवर्णार्पणादिकम् । वित्तानुसारतो दद्यात्पूजोपकरणानि च ॥ ४२ ॥

इति क्षमापना ।

॥३७॥ उसके बाद क्षमा करानेकी विधि करे । वह इस तरह है–प्रतिष्ठा करानेवाला यजमान जिनकल्याणक महोत्सवके बाद आहार औषध दानसे मुनि अर्जिका श्रावक श्राविका–इन चारों संघोंको संतुष्ट करके और उनके योग्य धर्मसाधनके उपकरण (शास्त्र वगैरः) देकर आप उनकी पूजा करे ॥ ३८ ॥ उसके बाद जो प्रतिष्ठा देखनेकेलिये आये हों अथवा प्रतिमाकी प्रतिष्ठा करानेके अभिप्रायसे आये हों उन सबको पान सुपारी फूलोंकी माला आदिसे सत्कार करके जानेको कहे ॥ ३९ ॥ उसके बाद प्रतिष्ठाचार्यको नमस्कार कर उसको कुछ भेंट देकर कपड़े और आभूषण आदिसे संमानकर क्षमा करावे ॥ ४० ॥ प्रतिष्ठाके सहायक तथा गंधर्व व नृत्यकरनेवालोंको वस्त्र अन्न आभूषण और कुछ धन योग्यताके अनुसार दे ॥ ४१ ॥ उसके बाद जिनप्रतिमाकी हमेशा पूजा होनेके लिये जमीन रुपया या कुछ जायदाद आमदनीके अनुसार दे कि जिसमें मंदिर पूजा हमेशा होती रहे और पूजाके उपकरण (वर्तन आदिक)

इत्यर्हत्प्रतिमान्यासविधिर्व्यासेन वर्णितः । तादृक्सामग्र्यभावेसौ मध्यवर्त्यपि कल्पितः ४३

तद्यथा ।

कृत्वा पुराकर्म कृतमंडपादिप्रतिष्ठितिः । मंत्रैरेवार्चयित्वा च मंडलान्यखिलान्यपि ॥ ४४ ॥
प्रतिष्ठेयां निरूप्यार्चां प्रयुक्तसकलक्रियः। संस्कृत्याकरशुद्ध्याथ वेदीपीठे निवेशयेत् ॥४५॥
कृत्वा कल्याणसंस्कारमालामंत्रादिरोहणम् । दत्वा तिलकमंत्राधिवासना संप्रकाशने ॥४६॥
सन्नेत्रोन्मीलने कृत्वा कृत्वा चाभिषवादिकम्। संक्षेपेणाथ शक्तिश्चेद्द्विभक्तः स्थापयेत्प्रभुम् ४७
तत्रैकमेव सज्जायाञ्चर्चयेद्यागमंडलम् । द्वास्थानंतरमत्रैव यजेच्च श्र्यादिदेवताः ॥ ४८ ॥

वनवाके दे ॥ ४२ ॥ यह क्षमावनीकी विधि समाप्त हुई ॥ इसप्रकार अर्हतकी प्रतिमाकी स्थापना विधि विस्तारसे वर्णन की गई है । यदि उतनी सामग्री न हो तो मध्यमरीतिसे भी स्थापना होसकती है ॥४३॥ वह इसतरह है । मंडपादि वनवाकर मंडलादिकी रचना कर उन सबको केवल मंत्रोंसे ही पूजकर प्रतिष्ठा होनेवाली जिन प्रतिमाको आकर शुद्धि आदि कही गई विधिसे संस्कारित करके वेदीके सिंहासन पर विराजमान करे ॥ ४४ । ४५ । ४६ ॥ फिर पांच कल्याण संस्कारमालारोपण तिलक अभिषेकादि करे ॥ यह मध्यमरीति है । जिसकी थोड़ी शक्ति हो वह दो वार भोजनकी प्रतिज्ञा कर प्रभुकी स्थापना करे ॥ ४७ ॥ उसके वाद एक यागमंडलकी पूजा करे फिर द्वारपाल और श्री आदि देवताओंकी पूजा करके मंडपके वाहर शुद्ध स्थानमें ऊंचे आसनपर मूर्तिको विराजमान करके अभिषेक करे ।

ततो मंडपशालैकोदेशेर्चाया सुसंस्कृते । कुर्यादाकरशुद्धिं तां शेषं मध्यवदाचरेत् ॥ ४९ ॥

इति मध्यमसंक्षिप्तप्रतिष्ठानुष्ठानविधानम् ।

प्रासादस्य ध्वजं चिन्हं तेनासौ शोभते यतः । शुभप्रदश्च सर्वेषां तस्मात्तमधिरोपयेत् ॥ ५० ॥
हस्तत्रिभागविस्तीर्णैरर्धहस्तायतैर्दृढैः । वस्त्रोत्तमसुसंश्लिष्टैर्ध्वजं निर्मापयेच्छुभम् ॥ ५१ ॥
सितं रक्तं सितं पीतं सितं कृष्णं पुनः पुनः । यावत्प्रासाददीर्घत्वं तावत्संघट्टयेत् क्रमात् ५२
चंद्रार्धचंद्रमुक्तास्रक्किंकिणीतारकादिभिः । नाना सद्रूपयुग्मैश्च चित्रैः पत्रैर्विचित्रयेत् ॥ ५३॥
अधश्छत्रत्रयं मूर्धस्तस्याधः पद्मवाहनम् । तस्याधः कलशं पूर्णं पार्श्वयोः स्वास्तिकं लिखेत् ५४
दीपदंडौ लिखेत्स्वस्ति शिखायाः पार्श्वयोस्तथा । पार्श्वयोरातपत्रस्य श्वेतचामरयुग्मकम् ॥५५॥

और वाकी क्रियाओंको अर्थात् क्षमावनी आदिको पूर्वकथित रीतिसे करे ॥ ४८ । ४९ ॥ यह मध्यम और संक्षेपरीतिसे प्रतिष्ठाकी विधि कही गई है ॥ उसके वाद जिन मंदिरके शिखरपर धुजाको चढावे उससे मंदिरकी शोभा होती है और सबको कल्याण देता है ॥ ५० ॥ बारह अंगुल लंबी और आठ अंगुल चौड़ी मजबूत उत्तम कपड़ेकी धुजा वनवावे ॥ ५१ ॥ धुजाका कपड़ा सफेद लाल सफेद पीला सफेद काला फिर सी क्रमसे रंगवाला तयार करावे ॥ ५२ ॥ धुजामें चंद्रमा माला घंटरियां तारे इत्यादि अनेक चिन्ह वनाके चित्रित करे ॥ ५३ ॥ कलश सातिया दीपदंड छत्र चमर धर्मचक्र लिखकर धुजाके ऊपर जिनविंबका आकार बनावे। उसमें एक छत्र लगावे । उस धुजामें

मूर्धाधो धवलच्छत्रे ध्वजे वा यक्षमालिखेत् । श्यामं चतुर्भुजं हस्तयुग्मेन रचितांजलिम् ५६
पराभ्यां दधतं मूर्ध्नि धर्मचक्रमृजुस्थितम् । जिनबिंबोर्ध्वमूर्धाने ह्येकछत्रसमान्वितम् ॥ ५७ ॥
दीपदंडादिसंयुक्तं नानालंकरणान्वितम् । हस्तिपृष्टसमारूढं सर्वज्ञाख्यामिमं लिखेत् ॥ ५८ ॥
अशोकासनानियासचंपकाम्रकदंबकाः । पूगवंशादयोन्येपि दंडस्य भवभूरुहाः ॥ ५९ ॥
सादायायाममानार्धं त्रिभागं वा चतुर्थकम् । ध्वजदंडस्य मानं तद्यथाशोभं प्रकल्पयेत् ॥६०॥
प्रासादस्योर्ध्वतुर्यांशे वेदिका वेदिकस्थितम् । आधारं धनदंडस्य यथोक्तं परिकल्पयेत्॥६१॥
अथ मंडलमभ्यर्च्य संक्षेपाद् ध्वजदेवता । प्रतिमाध्यानादिसिद्धमंत्रेणाष्टोत्तरं शतम् ॥ ६२ ॥
स्वधिवास्य ध्वजं स्तुत्वा तन्मंत्रेण घृतादिभिः । अशोकाश्वत्थवत्राद्यदर्भमालाभिवेष्टितम् ६३
ध्वजदंडं समभ्यर्च्य ध्यात्वा रत्नत्रयात्मकम् ।तच्चूलिकां तथैवाभिषिच्य धीशक्तिरूपिणीं६४
संचिंत्य मंडपपुरो गर्ते शाल्यादिपूरिते । पूजिते दधिदूर्वाद्यैस्तदूर्ध्वं स्थापयेद् दृढम् ॥ ६५॥

अशोक चंपा आम कदंब सुपारी वंश आदिके वृक्ष चिन्हित करे ॥ ५४ से ५९ ॥ धजाके दंडेका प्रमाण शोभाके अनुसार होना चाहिये ॥ ६० वह प्रमाण मंदिरकी ऊंचाईसे चौथाई हो तो अच्छा है । और वेदीके ऊपर भी धुजा चढाना चाहिये ॥ ६१ ॥ उसके बाद धुजाके मंडल और प्रतिमाकी स्तुतिकरके अनादिमंत्र (णमोकार मंत्र)को एकसौ आठवार जपकर धुजाको दंडमें लगाके " ओं नमो " इत्यादि ध्वजारोपणमंत्रको बोल शुभ लग्नमें शिखरमें

मंत्रमुच्चार्य तं दर्पणप्रतिबिंबितयक्षं तज्जलैरभिषिंच्य गंधादिभिश्चार्चयित्वा मुखवस्त्रं दत्वा नयनोन्मीलनं सुमुहूर्ते कुर्यात् । इति ध्वजदेवताप्रतिष्ठाविधानम् ।

एवं कृत्वा ध्वजारोहं पुण्यं प्राप्याद्भुतं कृती । भुक्त्वा तथादिसुभगः श्रेयोनिर्वृतिमश्नुते ॥७८॥

इति ध्वजारोपणविधानम् ।

प्रासादप्रतिमे अनेन विधिना ये कारयित्वार्हतां

भक्त्यानिह्नुतशक्तयो विदधते नित्याभिषेकादिकान् ।

वेदीके नीचे पूर्व दिशामें धुजाको रख उसमें चिन्हित यक्ष देवको इसप्रकार प्रतिष्ठित करे। "ओं" इत्यादि बोलकर आवाहन स्थापन सन्निधीकरण करे । उसके बाद सर्वौषधीसे मिलेहुए जलाशयके जलसे भरे कलशोंको आगे रख अमृतादि पूर्व कथितमंत्रसे उस जलको मंत्रितकर धुजाके आगे लिखे हुए पत्तेको रख चंदन अक्षत पुष्पोंसे " ओं ह्रीं " इत्यादि मंत्र बोलता हुआ दर्पणमें स्थित यक्षके आकारकी पूजा शुभ मुहूर्तमें करे । यह धुजाकी प्रतिष्ठाविधि कही गई है ॥ इस रीतिसे धुजारोहण करता हुआ बुद्धिमान पुरुष महान पुण्यका उपार्जन करके तथा पुण्यफल भोगके मोक्षसुखको पाता है ॥ ७८ ॥ यह धुजा चढानेकी विधि पूर्ण हुई । मोक्षके इच्छुक जो भव्यजीव अर्हंत जिनका मंदिर और प्रतिमाको तयार कराके अपनी

पूजाज्ञा विभवाधिपत्यमहिमोदग्राः शिवाशाधरा–
स्ते भुक्त्वा पदवीर्भजंति परमानंदैकसांद्रं पदम् ॥ ७९ ॥

इत्याशाधरविरचिते प्रतिष्ठासारोद्धारे जिनयज्ञकल्पापरनाम्नि अभिषेकादिविधानीयो नाम पंचमोऽध्यायः ॥ ५ ॥

शक्तिको न छिपाकर भक्तिसहित प्रतिदिन अभिषेक पूजा करते हैं वे उत्तम भोगोंको भोगकर परमानंद स्वरूप मोक्ष पदको पाते हैं ॥ ७९ ॥

इसप्रकार पं० आशाधर विरचित प्रतिष्ठासारोद्धारमें अभिषेका विधिको कहनेवाला पांचवां अध्याय समाप्त हुआ ॥ ५ ॥

षष्ठोऽध्यायः ॥ ६ ॥



अथ सिद्धप्रतिमादिप्रतिष्ठाविधानान्यभिधास्यामः—

आचार्यो मंडपे रम्ये सद्वेद्यां चूर्णसत्तमैः । स्वस्वमंडलमालिख्य संपूज्य तिलकद्रवैः ॥ १ ॥
हेमादिपात्रे हेमादिलेखन्या यंत्रमुद्धृतम् । तन्मध्ये न्यस्य जात्यादिपुष्पैरष्टोत्तरं शतम् ॥ २ ॥
स्वस्वमंत्रेण संजप्य निविश्योत्तरमंडपे । वेद्यास्नपनपीठेर्चां धूलीकुंभेन पूर्ववत् ॥ ३ ॥
स्नपयित्वा मंगलादिद्रव्यसंदर्भगर्भितैः । तीर्थांबुसंभृतैः कुंभैर्मु . ? पल्लवैः ॥ ४ ॥
दधिदूर्वाक्षतकुशस्रक्चित्रैर्मंत्रसंस्कृतैः . प्रापय्याकरशुद्धिं प्राक् यंत्रस्योपरि विष्टरे ॥ ५ ॥
..........कीर्त्य तस्यामारोप्य तद्गुणान् । आवाहनादिकं कृत्वा तां युंज्यात्तन्मयीं स्मरन् ॥

अब सिद्ध आदिकी प्रतिमाकी प्रतिष्ठाविधिको कहते हैं । प्रतिष्ठाचार्य सुंदर मंडपकी सुंदर वेदीमें उत्तम चूर्णसे अपने २ मांडले लिखकर पूजे । फिर घिसे हुए चंदन या कुंकुसे सोनें आदिके पात्रमें सोनें आदिकी सलाईसे यंत्र लिखकर उसमें एकसौ आठ चमेलीके पुष्पोंको रख अपने २ मंत्रसे मंत्रित करे । फिर उत्तर मंडपमें वेदीके अभिषेकके सिंहासनपर प्रतिमाको रख जलादिसे अभिषेक पहलेकी तरह करे । ॥ १ । २ । ३ । ४ । ५ ॥ उसके बाद उस प्रतिमामें उसके गुणोंका स्थापनकर तन्मयी स्मरण करता हुआ आवाहना-

जटाकिरीटोष्टमुखस्त्रिनेत्रो वामान्यखेटासिफलेष्टदानः ।
कूर्मांकनम्रो वरुणो वृषस्थः श्वेतो महाकाय उपैतु तृप्तिम् ॥ १४८ ॥

अर्घ चढावे ॥ १४५ ॥ "आरभ्यो" इत्यादि तथा ओं ह्रीं पढकर खेंद्रयक्षको अर्घ चढावे ॥ १४६ ॥ "सफलक" इत्यादि तथा ओं ह्रीं बोलकर कुबेरयक्षको अर्घ चढावे ॥ १४७ ॥ "जटाकिरीटो" इत्यादि तथा ओं ह्रीं बोलकर वरुणयक्षको अर्घ चढावे ॥ १४८ ॥ "सेटा-

ओं ह्रीं वरुणयक्षाय इदं.................................... ।

खेटासिकोदंडशरांकुशाब्ज–चक्रेष्टदानोल्लसिताष्टहस्तम् ।
चतुर्मुखं नंदिगमुत्पलाकभक्तं जपाभं भृकुटिं यजामि ॥ १४९ ॥

ओं ह्रीं भृकुटियक्षाय इदं.................................... ।

श्यामस्त्रिवक्त्रो द्रुघणं कुठारं दंडं फलं वज्रवरौ च बिभ्रत् ।
गोमेदयक्षः क्षितशंखलक्ष्मा पूजां नृवाहोऽर्हतु पुष्पयानः ॥ १५० ॥

ओं ह्रीं गोमेदयक्षाय इदं.................................... ।

ऊर्ध्वद्विहस्तधृतवासुकिरुद्भटाधः सव्यान्यपाणिफणिपाशवरप्रणंता ।
श्रीनागराजककुदं धरणोऽभ्रनीलः कूर्माश्रितो भजतु वासुकिमौलिरिज्याम् १५१

ओं ह्रीं धरणयक्षाय इदं.................................... ।

मुद्गप्रभो मूर्धनि धर्मचक्रं बिभ्रत्फलं वामकरेथ यच्छन् ।
वरं करिस्थो हरिकेतुभक्तो मातंगयक्षोऽगतु तुष्टिमिष्ट्या ॥ १५२ ॥

सि " इत्यादि तथा ओं ह्रीं बोलकर भृकुटि यक्षको अर्घ चढावे ॥ १४९ ॥ " श्यामस्त्रि " इत्यादि तथा ओं ह्रीं पढकर गोमेदयक्षको अर्घ चढावे ॥ १५० ॥ " ऊर्ध्वद्विहस्त " इत्यादि तथा ओं ह्रीं बोलकर धरणयक्षको अर्घ चढावे ॥ १५१ ॥ " मुद्गप्रभो " इत्यादि तथा ओं ह्रीं

ओं ह्रीं मातंगयक्षाय इदं.. ।

इत्थं योग्योपचारव्यतिकरपरमो जागरान् गृहाग्रव्यापाराः
शश्वदर्हत्प्रभुसमयमहस्तायिनो यक्षमुख्याः ।
तद्भक्तोद्धर्षहर्षाप्लुतजलधिनिरुच्छ्वासलीलावगाह
प्रत्यूहापोहकृत्यः सृजतु परमसौपर्वपूर्णाहुतिर्वः ॥ १५३ ॥

पूर्णाहुतिः । इति चतुर्विंशतियक्षार्चनविधानम् । अथ चतुर्विंशतिपत्राग्रस्थापितशासनदेवतार्चनम् ।

संभावयंति वृषभादिजिनानुपास्य तद्वामपार्श्वनिहिता वरलिप्सवो याः ।
चक्रेश्वरीप्रभृतिशासनदेवतास्ताः द्विर्द्वादशादलमुखेषु यजे निवेश्य ॥ १५४ ॥

चतुर्विंशतिशासनदेवतासमुदायपूजाविधानाय पूर्वविधिं विदध्यात् ।

यक्ष्यः संशब्दये युष्मानायात सपरिच्छदाः । अत्रोपविशतैता वो यजे प्रत्येकमादरात् १५५

बोलकर मातंगयक्षको अर्घ चढावे ॥ १५२ ॥ "इत्थं योग्यो" इत्यादि श्लोक पढकर पूर्णार्घ दे ॥१५३॥ इसप्रकार चौवीस यक्षोंकी पूजाका विधान हुआ । अब चौवीस पत्रोंके अग्रभागमें स्थापित शासनदेवताओंकी पूजा कहते हैं । "संभावयन्ति" इत्यादि श्लोक पढकर चौवीस शासनदेवताओंकी समुदायपूजाकेलिये पूर्व कही हुई विधि करे ॥ १५४ ॥ "यक्ष्यः" इत्यादि

आवहनादिपुरस्सरप्रत्येकपूजाप्रतिज्ञानाय पत्राग्रेषु पुष्पाक्षतं क्षिपेत् । अथ प्रत्येकपूजा ।

भर्माभाग्र करद्वयालकुलिशा चक्रांकहस्ताष्टका
सव्यासव्यशयोल्लसत्फलवरा यन्मूर्तिरास्तेंबुजे ।
तार्क्ष्ये वा सह चक्रयुग्मरुचकत्यागैश्चतुर्भिः करैः
पंचेष्वास शतोन्नतप्रभुनतां चक्रेश्वरीं तां यजे ॥ १५६ ॥

ओं ह्रीं अप्रतिहतचक्रे देवि इदं.. ।

स्वर्णद्युतिशंखरथांगशस्त्रा लोहासनस्थाभयदानहस्ता ।
देवं धनुः सार्धचतुःशतोच्चं वंदारुवीष्टामिह रोहिणीष्टेः ॥ १५७ ॥

ओं ह्रीं अजितदेवि इदं.. ।

पक्षिस्थार्धेंदुपरशुफलासीढीवरैः सिता । चतुश्चापशतोच्चार्हद्भक्ता प्रज्ञप्तिरिज्यते ॥ १५८ ॥

श्लोक बोलकर आवाहन आदि पूर्वक हरएककी पूजा करनेकी प्रतिज्ञाके लिये पत्रके अग्रभागमें पुष्प अक्षत क्षेपण करे ॥ १५५ ॥ अब प्रत्येककी पूजा कहते हैं–" भर्मा " इत्यादि तथा "ओं ह्रीं" बोलकर चक्रेश्वरी देवीको जल आदि आठ द्रव्य चढावे ॥ १५६ ॥ "स्वर्णद्युति" इत्यादि तथा "ओं ह्रीं" बोलकर अजितादेवीको जलादि द्रव्य चढावे ॥ १५७ ॥ "पक्षिस्था"

ओं ह्रीं नम्रे देवि इदं.. ।

सनागपाशोरुफलाक्षसूत्रा हंसाधिरूढा वरदानुयुक्ता ।
हेमप्रभार्धत्रिधनुः शतोच्चतीर्थेशनम्रा पविशृंखलार्चाम् ॥ १५९ ॥

ओं ह्रीं दुरितारि देवि इदं.. ।

गजेंद्रगावज्रफलोघचक्रवरांगहस्ता कनकोज्ज्वलांगी ।
गृह्णातुदंडत्रिशतोन्नतार्हन्नतार्चनां खञ्जवराच्र्यते त्वम् ॥ १६० ॥

ओं ह्रीं मोहिनि देवि इदं.. ।

सिता गोवृषगा घंटां-फलशूलवरायुताम् । यजे कालीं द्विको दंडशतोच्छ्रायजिनाश्रयाम् ॥

ओं ह्रीं मानवीदेवि इदं.. ।

चंद्रोज्ज्वलां चक्रशरासपाश चर्मत्रिशूलेपुझपासिहस्ताम् ।

इत्यादि तथा "ओं ह्रीं" बोलकर नम्रादेवीको जलादि द्रव्य चढावे ॥ १५८ ॥ "सनाग" इत्यादि तथा "ओं ह्रीं" बोलकर दुरितारि देवीको अर्घ चढावे ॥ १५९ ॥ "गजेंद्र" इत्यादि तथा "ओं ह्रीं" बोलकर मोहिनी देवीको जलादि. चढावे ॥ १६० ॥ "सिता." इत्यादि तथा "ओं ह्रीं" बोलकर मानव देवीको जलादि चढावे ॥ १६१ ॥ "चंद्रो" इत्यादि

श्रीज्वालिनीं सोर्धधनुःशतोच्चजिनानतां कोणगतां यजामि ॥ १६२ ॥

ओं ह्रीं ज्वालामालिनीदेवि इदं.................................. ।

कृष्णा कूर्मासनाधन्वशतोन्नताजिनानता । महाकालीज्यते वज्रफलमुद्गरदानयुक् ॥ १६३ ॥

ओं ह्रीं भृकुटि देवि इदं.................................. ।

झपदामरुचकदानोचितहस्तां कृष्णकालगां हरितांम् ।

नवतिधनुस्तुगाजिनप्रणतामिह मानवीं प्रयजे ॥ १६४ ॥

ओं ह्रीं चामुंडे देवि इदं.................................. ।

समुद्राब्जकलशां वरदां कनकप्रभाम् । गौरीं यजेशीतिधनुः प्राशु देवीं मृगोपगाम १६५

तथा "ओंह्रीं" बोलकर ज्वालामालिनीदेवीको जलादि द्रव्य चढावे ॥ १६२ ॥ "तृष्णा" इत्यादि तथा "ओं ह्रीं" पढकर भृकुटि देवीको जलादि चढावे ॥ १६३ "झप" इत्यादि तथा "ओं ह्रीं" कहकर चामुंडा देवीको जलादि चढावे ॥ १६४ ॥ "समुद्र" इत्यादि तथा ओं ह्रीं कहकर गोमेधकिदेवीको जलादि अष्टद्रव्य चढावे ॥ १६५ ॥ "सपक्ष" इत्यादि

पीतां विंशतिचापोच्चस्वामिकां बहुरूपिणीम् । यजे कृष्णाहिगां खेटफलखड्गवरोत्तराम् १७४॥

ओं ह्रीं सुगंधिनि देवि इदं................................ ।

चामुंडा यष्टिखेटाक्षसूत्रखड्गोत्कटा हरित् । मकरस्थार्च्यते पंचदशदंडोन्नतेशभाक् ॥ १७५ ॥

ओं ह्रीं कुसुममालिनि देवि इदं................................ ।

सव्येकद्युपगप्रियंकर सुतुक् प्रीत्यै करे बिभ्रतीं
दिव्याम्रस्तबकं शुभंकरकराश्लिष्टान्यहस्तांगुलिम् ।
सिंहे भर्तृचरे स्थितां हरितभामाम्रद्रुमच्छायगां
वंदारुं दशकार्मुकोच्छ्रयजिनं देवीमिहाम्रा यजे ॥ १७६ ॥

ओं ह्रीं कूष्मांडिनि देवि इदं................................ ।

येष्टुं कुर्कटसर्पगात्रिफणकोत्तंसा द्विषो यात षट्
पाशादिः सदसत्कृते च धृतशंखास्यादिदो अष्टका ।
तां शांतामरुणां स्फुरच्छृणिसरोजन्माक्षव्यालांबरां
पद्मस्थां नवहस्तकप्रभुनतां यायज्मि पद्मावतीम् ॥ १७७ ॥

"ओंह्रीं" बोलकर सुगंधिनिदेवीको जल आदि चढावे ॥ १७४॥ "चामुंडा" इत्यादि तथा 'ओंन्हीं बोलकर कुसुममालिनीको जल आदि चढावे ॥ १७५ ॥ "सव्ये" इत्यादि तथा 'ओंन्हीं बोलकर कूष्मांडिनी देवीको जल आदि द्रव्य चढावे ॥ १७६ ॥ "येष्टुं" इत्यादि

ॐ ह्रीं पद्मावतीदेवि इदं............................ ।

सिद्धायिकां सप्तकरोच्छ्रितांगजिनाश्रयां पुस्तकदानहस्ताम् ।
श्रितां सुभद्रासनमत्र यज्ञे हेमद्युतिं सिंहगतिं यजेऽहम् ॥ १७८ ॥

ॐ ह्रीं सिद्धायिनि देवि इदं.............................. ।

इत्यावर्जितचेतसः समुचितैः सन्मानदानैः स्फुरन्
स्यात्कारध्वजशासनद्विषदपक्षेपोच्छलद्युक्तयः ।
यक्ष्यं संघनृपादिलोकविपदुच्छेदादिहार्हन्महे
कुर्वाणाः सहकारितां समिमां गृह्णंतु पूर्णाहुतिम् ॥ १७९ ॥

पूर्णाहुतिः । इति शासनदेवतार्चनविधानम् । अथ द्वारपालानुकूलनम् ।

सोमयमवरुणधनदा जिनदेवीद्वारपालननियुक्ताः ।
स्वं स्वमिहेत्य नियोगं कुर्वद्भ्यः को न वः स्पृहयेत् ॥ १८० ॥

सोमादिद्वारपालसांमुख्यविधानाय दिक्षु पुष्पाक्षतं क्षिपेत् ।

तथा " ॐ ह्रीं " बोलकर पद्मावती देवीको जल आदि द्रव्य चढावे ॥१७७॥ "सिद्धायिकां इत्यादि तथा " ॐ ह्रीं " बोलकर सिद्धायिनी देवीको जल आदि आठ द्रव्य चढावे १७८ ॥ " इत्यावर्जित ", इत्यादि श्लोक कहकर आठ द्रव्यसे सबको पूर्णार्घ दे ॥ १७९ ॥ इस प्रकार

कोदंडकांडस्फुटदृष्टिमुष्टिमरुद्भटोद्भव्यकथानुरक्तम् ।
वेद्याः पुरो द्वारमिमामवंतं सोमोपगृह्णाम्युचितैर्भवंतम् ॥ १८१ ॥
ओं धनुर्धराय अर अर त्वर त्वर हूं सोम आगच्छागच्छ इदं जलं............ ।

द्विड्वर्गदंडोद्यतचंडदंडं प्रचंडसामाजिकसंकथास्थम् ।
वेदिप्रतीहारमपाच्यमेतं पांतं यम त्वामनुकूलयामि ॥ १८२ ॥
ओं दंडधराय अर २ त्वर २ हूं यम आगच्छागच्छ इदं...................... ।

विषाक्तजिह्वायुगलीढसृक्कस्फुलिंगवांत्युग्रभुजंगरज्जुः ।
प्रतीच्यवेदीमुखद्वास्थभृत्यहृतः प्रचेतः कुरु चारुचेतः ॥ १८३ ॥
ओं पाशधराय अर २ त्वर २ हूं वरुण आगच्छागच्छ इदं............ ।

शासनदेवताओंका पूजन समाप्त हुआ । अब द्वारपालोंको अनुकूल करते हैं । "सोम" इत्यादि श्लोक बोलकर उन सोम आदिको सन्मुख करनेके लिये दिशाओंमें पुष्प अक्षतको वखेरै ॥ १८० ॥ "कोदंड" इत्यादि तथा "ओंधनु" इत्यादि बोलकर सोमको जल आदि आठ द्रव्य चढावे ॥१८१ ॥ "द्विड्वर्ग" इत्यादि तथा "ओं दंड" इत्यादि बोलकर यमको जल आदि चढावे ॥ १८२ ॥ "विषाक्त" इत्यादि तथा "ओं पाश" इत्यादि बोलकर वरुणको जल आदि चढावे ॥ १८३ ॥ "इतस्ततो" इत्यादि तथा "ओं गदा" इत्यादि बोलकर

इतस्ततो नाभिगिरेः सगर्भां गदां सलीला भ्रमयन्नुदीच्ये ।
द्वारे निपण्णोनुचरैर्वितर्दैः कुबेर वीरानुसरोपचार ॥ १८४ ॥

ओं गदाधराय अर २ त्वर २ हूं कुबेर आगच्छागच्छ इदं............ ।

एवं प्रियाकृताः सोमप्रमुखा द्वास्थकुंजराः । क्षुद्रान् क्षिपंतो विशतः सलुनु मन्वताम् ॥ १८५ ॥

पुष्पांजलिः । इति द्वारपालानुकूलनविधानम् । अथ दिक्पालानुकूलनम् ।

इंद्राग्निश्राद्धदेवाः शरपतिवरुणस्पर्शनश्रीदरुद्राः
पूर्वाद्याशासु वेधास्त्रिजगदधिपतेः प्रासरक्षाधिकाराः ।
तद्यज्ञेस्मिन्नवात्मप्रयाति विहरतामेत्य पल्यादियुक्ता
विघ्नंतो यथास्वं वितनुत समयोद्योतमौचित्य कृभ्याः ॥ १८६ ॥

इंद्रादिदिक्पालानामावाहनादिपुरस्सरार्घ्यपणाय दिक्षु पुष्पाक्षतं क्षिपेत् । अथ पृथगिष्टिः ।

रूप्याद्रिस्पार्द्धिघंटायुगपटुकटुटंकारनानिशुंभ—
क्रूषासख्यातिचित्रोज्ज्वलविलसल्लक्ष्मवर्ष्मद्वयस्थं ।

कुबेरको जल आदि चढावे ॥ १८४ ॥ "एवं प्रिया" इत्यादि बोलकर पुष्पोंको क्षेपण करे ॥ १८५ ॥ इसतरह द्वारपालोंको अनुकूलकरनेकी विधि हुई । अब दिक्पालोंको प्रसन्न करनेकी विधि कहते हैं । "इंद्रादि" इत्यादि श्लोक बोलकर इंद्र आदि दिक्पालोंका आवाहन आदि करनेके लिये चारोंतरफ पुष्प अक्षत क्षेपण करे ॥ १८६ ॥ अब इनकी जुदी जुदी पूजा

रूप्यत्सामानिकादित्रिदशपरिवृतं रूप्यसंख्यादि देवी
लोलाक्षं वज्रभूषोद्भटसुभगरुचं प्रागिहेंद्रं यजामि ॥ १८७ ॥

ओं ह्रीं इन्द्र आगच्छागच्छ इंद्राय स्वाहा....................।

रुक्मारुग्घुर्घुरस्रग्गलचटुलपृथुप्रायभृंगाभतुंग—
स्थं रौद्रपिंगेक्षणयुगममलं ब्रह्मसूत्रं शिखाग्रम् ।
कुंदी वामप्रकोष्ठे दधतमितरपाण्यात पुण्याक्षसूत्रं
स्वाहान्वीतं धिनोमि श्रुतिमुखरसभं प्राच्यपाच्यंतरेऽग्निम् ॥ १८८ ॥

ओं ह्रीं अग्ने आगच्छागच्छ अग्नये स्वाहा ।

कल्पांताब्दोघजेतृ त्रिगुणफणिगुणोद्ग्राहितग्रैवघंटा
टंकारात्युग्रशृंगक्रमहतभधरव्रातरक्ताक्षसंस्थं
चंडार्चिः कांडदंडोद्भुमरकरमतिक्रूरदारादिलोकं
कारुण्योद्रेकं नृशंस प्रथममथ यम दिश्यपाच्यां यजामि ॥ १८९ ॥

कहते हैं ॥ "रूप्यादि" इत्यादि तथा "ओंह्रीं" बोलकर इंद्रको पूजाद्रव्य चढावे ॥१८७॥
"रुक्मा" इत्यादि तथा "ओंह्रीं" इत्यादि बोलकर अग्निको पूजाद्रव्य चढावे ॥ १८८ ॥
"कल्पांता" इत्यादि तथा "ओंओं" इत्यादि बोलकर यमको पूजाद्रव्य चढावे ॥ १८९ ॥

ॐ आं क्रौं ह्रीं यमागच्छागच्छ यमाय स्वाहा ।

आरूढं धूमधूम्रायतविकटसटास्ताग्रदिक्रूक्षरूक्षमा
लक्षाक्षावशिष्टास्फुटरुदितकला योद्रमाभांगमृक्षम् ।
क्रूरक्रव्यातपरीतं तिमिरचयरुचं मुद्गरक्षुण्णरौद्र-
क्षुद्रौघं त्रात याम्या परहरतमहं नैर्ऋतं तर्पयामि ॥ १९०

ॐ आं क्रौं ह्रीं नैर्ऋत्यागच्छागच्छ नैर्ऋत्याय स्वाहा ।

नित्यांभः कोलिपाण्डूत्कटकापिलविशच्छेदसोदर्यदंत-
प्रोत्फुल्यरपत्रखेलत्करकारिमकरव्योमयानाधिरूढम् ।
प्रेंखन्मुक्ताप्रवालाभरणभरमुपस्थात्तदाराहृताक्षं
स्फूर्जन्नीमाहिपासं वरुणमपरादिग्रक्षणं प्रीणयामि ॥ १९१ ॥

ॐ आं क्रौं ह्रीं वरुणागच्छागच्छ वरुणाय स्वाहा ।

वलगच्छृंगाग्रभिन्नांबुदपटलगलत्तोयपीतश्रमाभ्र
प्लुत्यस्तस्वांतरंहः खुरकषितकुलग्रावसारंगयुग्यम् ।

"आरूढं" इत्यादि तथा "ओं" इत्यादि बोलकर नैर्ऋत्यको अर्घ चढावे ॥ १९० ॥
नित्यांभ" इत्यादि तथा" ओं आं" इत्यादि पढकर वरुणको अर्घ चढावे ॥ १९१ ॥" वल्ग"

व्यालोलद्वात्रयंत्रं त्रिजगदसुधृतिव्यग्रमुग्रद्रुमास्त्रं
सर्वार्थानर्थसर्गप्रभुमनिलमुदक् प्रत्यगंतः प्रणौमि ॥ १९२ ॥
ओं आं क्रों ह्रीं अनिलागच्छागच्छ अनिलाय स्वाहा ।

हांसोघो नाह्यमानं पवननरिनृतत्केतुपंक्ति विमानं
स्वारूढः पुष्पकाख्यं क्रमसखरसनाद्दामुक्ताकलापः ।
अग्राम्योद्दामवेपः सुललितधनदेव्यादिवक्त्राब्जभृंगः
शक्तीभिन्नारिमर्मा भजतु बलिमुदग्भुक्तिवीरः कुवेरः ॥ १९३ ॥
ओं आं क्रों ह्रीं कुवेरागच्छागच्छ कुवेराय स्वाहा ।

सास्नावाचालकिंकिण्यनणुरणनझणत्कारमंजीरसिंजा
रम्योद्यच्छृंगहेलाविहरदुरुशरच्चंद्रशुभ्रर्षभस्थम् ।
भास्वद्भूषाभुजंगभुजगासितजटाकेतकार्द्धेंदुचूलं
दधत्शूलं कपालं सगणवामिहार्चामि पूर्वोत्तरेशम् ॥ १९४ ॥
ओं आं क्रों ह्रीं ईशानागच्छागच्छ ईशानाय स्वाहा ।

इत्यादि तथा "ओं आं" इत्यादि बोलकर वायुको अर्घ चढावे ॥१९२॥ "हांसो" इत्यादि तथा "ओं" इत्यादि पढकर कुवेरको अर्घ चढावे ॥ १९३ ॥ "सास्ना" इत्यादि तथा "ओं" इ-

इत्यर्हन्मदुसामवायिकनयाह्वानादियोग्यक्रमे—
दिक्पालाः कृततुष्टयः परिजनोत्कृष्टाश्रियोष्टाप्यमू ।
दृष्ट्वा कामदमर्हदध्वरमरं दिक्चक्रमाक्रामतो
भव्यान् संदधतः शुभैः सह भजंत्वेतर्हि पूर्णाहुतिम् ॥ १९५ ॥

पूर्णाहुतिः । इति दिक्पालार्चनाविधानम् । अथ दिक्चतुष्टयनिविष्टप्रभावनोद्भटयक्षानुकूलनम् ।

प्रभुं भक्तुमिहागत्य प्राचीं चिन्वन्निजश्रिया । बलिं विजययक्षेश मंत्रपूतां स्वसात्कुरु ॥१९६॥

ओं ह्मल्व्र्यूं विं विजययक्ष बलिं गृहाण गृह्ण गृह्ण स्वाहा ।

अत्रापाचीमलंकृत्य भजमानो जगत्पतिम् । यथार्हबलिसंतुष्टो वैजयंत जयंत नु ॥ १९७ ॥

ओं ह्मल्व्र्यूं वैं वैजयंत बलिं........................ ।

देवाधिदेवसेवायै प्रतीचीं दिशमास्थितः । बलिदानेन संप्रीतो जयंत जय दुर्जयान् ॥ १९८ ॥

ॐ ह्मल्व्र्यूं जं जयंत बलिं.................................... ।

त्यादि कहकर ईशानको अर्घ चढावे ॥ १९४ ॥ "इत्यर्ह" इत्यादि बोलकर पूर्णार्घ चढावे ॥ १९५ ॥ इसतरह दिक्पालोंकी पूजाविधि पूर्ण हुई । अब चारों दिशाओंके यक्षोंका सत्कार करते हैं । "प्रभुं" इत्यादि तथा "ओं" इत्यादि बोलकर विजययक्षको अर्घ चढावे ॥ १९६ ॥ "अत्रापा" इत्यादि तथा "ओं" इत्यादि बोलकर वैजयंतको अर्घ चढावे ॥ १९७ ॥ "देवाधि इत्यादि तथा "ओं"इत्यादि बोलकर जयंतको अर्घ चढावे ॥ १९८ ॥ "उदीचीं" इत्यादि

उदीचीं भूषयन् भूत्या सर्वज्ञोपासनोत्सुकः । अपराजित यक्ष त्वं प्रीयस्व बलिनामुना ॥१९९॥

ॐ झ्म्ल्व्र्यूं अं अपराजित बलिं.................................. ।

एवं संमानिता यूयं जिनेंद्रसमये रताः । प्रतिष्ठासमयेऽमुष्मिन् यतध्वं विश्वशांतये ॥ २०० ॥

पूर्णाहुतिः । इति विजयादियक्षानुकूलनविधानम् । अथैशानदिश्यनावृतार्चनम् ।

जंबूवृक्षस्य नानामणिमयवपुषः प्राग्यजंबूहृतस्य
प्राक्शाखामावसंतं नवजलदरुचं पक्षिराजाधिरूढम् ।
कुंडीशंखाक्षमालारथचरणकरं त्राणनिःशेषजंबू—
द्वीपश्रीकं यजेस्मिन् विधुरविधुतयेनावृतं व्यंतरेंद्रम् ॥ २०१ ॥

ओं दशदिशाधिनाथं त्रैलोक्यदंडनायकं जंबूद्वीपाधिपतिं गरुडपृष्ठमारूढं स्निग्धभिन्नांजनाभमक्षसूत्रकमंडलुव्यग्रहस्तं चतुर्भुजं शंखचक्रविधृतभुजादंडं यक्षिणीसहितं सपरिजनं सपरिवारमनावृतं देवं समाह्वयामीह स्वाहा हे अनावृतागच्छागच्छ अनावृताय स्वाहा अनावृतपरिजनाय स्वाहा ।

तथा "ओं" इत्यादि बोलकर अपराजितको अर्घ चढ़ावे ॥ १९९ ॥ "एवं संमा" इत्यादि श्लोक बोलकर पूर्णार्घ चढ़ावे ॥ २०० ॥ इस प्रकार विजयादि यक्षोंका सत्कार हुआ । अब ईशानदिशाके अनावृत यक्षकी पूजा कहते हैं । "जंबूवृक्ष" इत्यादि तथा "ओं दश" इत्यादि पढ़कर जल आदि अष्ट द्रव्य चढ़ावे ॥ २०१ ॥ "व्रह्मांते" इत्यादि तथा "ओं ह्रीं" बोलकर

ब्रह्मांते दिक्षु रुद्राद्यधिपतिषु समाग्न्यामसूर्याभपूर्वं—
द्विर्द्विस्वर्भूगणैकोत्तरभूतिषु वसंत्यष्ट सारस्वताद्याः ।
यद्वर्गास्ते स्वतंत्राः क्षतविषयतृपो भाविजन्माप्यमोक्षाः
पूर्वज्ञा मेघ लौकांतिकसुरमुनयस्तीर्थकृच्छंसिनोऽर्च्याः ॥ २०२ ॥

ओं ह्रीं लौकांतिकदेवेभ्यः पुष्पांजलिं निर्वपामीति स्वाहा । ब्रह्मेंद्रोपरि देवर्षिपुष्पांजलिः ।

मुख्योपचारिकचरित्रचितोरुपुण्यपाकाग्रखस्थसितरत्नविमानवासान् ।
अर्हत्प्रतिष्ठितिमिमामनुमोदमानान् संमानयामि कुसुमांजलिनाहमिंद्रान् ॥ २०३ ॥

ओं ह्रीं अहमिंद्रदेवेभ्यः पुष्पांजलिं निर्वपामीति स्वाहा । अच्युतेंद्रोपरि अहमिंद्रपुष्पांजलिः ।

अथ विधिशेषम् ।

पूर्वादिदिक्षु नेत्रा मंगलशांतिकजयेष्टसिद्ध्यर्थम् ।
मंगलशस्त्रपताकाकलशानथ योजयेष्टशः क्रमशः ॥ २०४ ॥

मंगलादिस्थापनाप्रतिज्ञानाय दिक्षु पुष्पाक्षतं क्षिपेत् ।

लौकांतिक देवोंके लिये पुष्पोंको चढावे ॥ २०२ ॥ "मुख्यो" इत्यादि तथा "ओं ह्रीं" बोलकर अहमिन्द्र देवोंके लिये पुष्पांजलि चढावे ॥ २०३ ॥ अब शेष विधान कहते हैं । "पूर्वादि" इत्यादि श्लोक पढकर मंगल आदि आठ द्रव्योंकी स्थापनाके लिये दिशाओंमें पुष्प अ-

प्राग्वत् प्राच्य तथा दलेष्वनुदिशं देवीर्जयाद्याः पृथक्—
जंभाद्यांश्च विदिग्दलेषु धिनुयां दिग्द्वाररैरक्षिणः ॥ २१४ ॥

बहिर्मंडलपूजाप्रतिज्ञानाय पुष्पांजलिं क्षिपेत् । अत्रापि पूर्ववत् कर्णिकाः परब्रह्मादिपदैः पूरयित्वा तत्पद्मदलेषु पूर्वादिदिक्षु ओं जये स्वाहा, ओं विजये स्वाहा, ओं अजिते स्वाहा, ओं अपराजिते स्वाहा । आग्नेय्यादिविदिक्षु च ओं जंभे स्वाहा, ओं मोहे स्वाहा, ओं स्तंभे स्वाहा, ओं स्तंभिनि स्वाहा इति लिखित्वा बहिश्चतुर्द्वारचतुष्कोणमंडलं विलिख्य तद्बहिः पूर्ववद्दिक्पालान् द्वारपालान् यक्षदेवांश्च संस्थाप्य चिद्रूपं विश्वरूपेत्यादिविधिना कर्णिकार्चनं संक्षेपेण कृत्वा जयादिदेवीर्दिक्पालान् द्वारपालान् यक्षांश्च पूजयेत् । अथ जयादिदेवतार्चनम् ।

जयाद्याः शब्दये युष्मानायात सपरिच्छदाः । अत्रोपविशतैता वो यजे प्रत्येकमादरात् २१५

काष्ठासन (पट्टा) स्थापित करे ॥ २१३ ॥ अब चार पीठोंकी पूजा कहते हैं । "तद्वेदीं" इत्यादि श्लोक कहकर बाह्यमंडलकी पूजाके लिये पुष्पोंको क्षेपण करे ॥ २१४ ॥ यहांपरभी पहलेकी तरह कर्णिकामें अरहंत आदि पदोंको लिखकर उस कमलपत्रपर पूर्व आदि दिशाओंमें "ओं जये" इत्यादि चार पद लिखे । फिर आग्नेयी आदि विदिशाओंके पत्तोंपर "ओं जंभे" इत्यादि चार पद लिखे । उसके बाद बाहरके चार दरवाजोंपर चौकोन मंडल लिखकर उसके बाहर पहलेकी तरह दिक्पाल, द्वारपाल और यक्षदेवोंको स्थापन करके "चिद्रूपं" इत्यादि कही हुई विधिसे कर्णिकाकी संक्षेपसे पूजा करे । फिर जयादि देवी, दि-

आवाहनादिपुरस्सरप्रत्येकपूजाप्रतिज्ञानाय पुष्पाक्षतं क्षिपेत् ।

जये जयाद्ये विजये विजैनि जैने जितेपराजितेस्मिन् ।
जंभेवमोहनेस्ति भाः स्तंभिनि रक्ष रक्षास्मान ॥ २१६ ॥

स्वोपग्रहाय पत्रेषु पुष्पाक्षतानि क्षिपेत् । अथ प्रत्येकपूजा ।

इहार्हतो विश्वजनीनवृत्तेः कृतौ कृताराातिजये जये त्वाम् ।
सद्गंधपुष्पाक्षतदीपधूपफलादिसंपादनया धिनोमि ॥ २१७ ॥

ओं ह्रीं जये देवि आगच्छागच्छ इदं............................... ।

जिनाधिराजे विजयैकविद्ये जगद्विजेतुः कुसुमायुधस्य ।
विजेतरि स्फारितभूरिभक्ति त्वामत्र यज्ञे विजये यजेहम् ॥ २१८ ॥

ओं ह्रीं विजये देवि... ।

कपाल, द्वारपाल, और यक्षोंको पूजे ॥ अब जया आदि देवताओंकी पूजा कहते हैं । जया इत्यादि श्लोक बोलकर आवाहनादिपूर्वक हर एककी पूजा करनेकी प्रतिज्ञाके लिये पुष्प-अक्षतोंको क्षेपण करे ॥ २१५ ॥ "जये" इत्यादि श्लोक बोलकर अपने उपकारके लिये पत्रोंपर पुष्प अक्षतको क्षेपण करे ॥ २१६ ॥ अब प्रत्येककी पूजा कहते हैं । "इहा" इत्यादि तथा "ओं ह्रीं" बोलकर जया देवीको जलादि आठ द्रव्य चढावे ॥ २१७ ॥ "जिना" इत्यादि तथा "ओं ह्रीं" बोलकर विजयाको अर्घ चढावे ॥ २१८ ॥ "जग" इत्यादि तथा "ओं ह्रीं"

जगज्जयोज्जागरिणां कषायद्विषां न केनापि जितं जिनेंद्रम् ।
आवर्जयंतामृजितोर्जितोजामूर्जास्तये त्वामजितेर्चयामि ॥ २१९ ॥
ओं ह्रीं अजिते.. ।

पराजितारेरपराजितास्त्रैरप्याश्रितस्यारिपराजयाय ।
जगत्प्रभोरत्र महे महामि पराजिते त्वामपराजितेद्य ॥ २२० ॥
ओं ह्रीं अपराजिते.. ।

व्यामोहनिद्रां भुवनानि जंभ विशंत्युद्धरतो जिनस्य ।
वितन्वतां यज्ञपजन्यहंत्रीं त्वा देवि जंभे परिपूजयामि ॥ २२१ ॥
ओं ह्रीं जंभे.. ।

चिरं जगन्मोहविषेणसुप्तं स्याद्वादमंत्रेण विबोधयंतम् ।
श्रीबुद्धमाराधयतां हि मोहे त्वां मोहयंतीमहितान्महामि ॥ २२२ ॥
ओं ह्रीं मोहे.. ।

बोलकर अजिताको जलादि चढावे ॥ २१९ ॥ "पराजि" इत्यादि तथा "ओं ह्रीं" बोलकर अपराजिताको जलादि आठ द्रव्य चढावे ॥ २२० ॥ "व्यामोह" इत्यादि तथा "ओं ह्रीं" बोलकर जंभा देवी पर जलादि चढावे ॥ २२१ ॥ "चिरं" इत्यादि तथा "ओं ह्रीं" बोलकर

जिनं महाभव्यविशुद्धिभावप्रासादसुस्तंभमुपास्ति यस्तम् ।
प्रकुर्वतं स्तंभयतां स्तभंतं स्तंभे सृजंतीं भवतीं यजामि ॥ २२३ ॥

ओं ह्रीं स्तंभे देवि.. ।

प्रवादिनां स्तंभयतोत्र मानस्तंभेन दूरादपि मंक्षु मानम् ।
जिनेस्य यज्ञेर्चनया सपत्नधीस्तंभिनि स्तंभिनि संस्तुवे त्वाम् ॥ २२४ ॥

ओं ह्रीं स्तंभिनि देवि.. ।

इत्येताः पृथुयशसो जयादिदेव्यो देशामभिरुचिते जिनेंद्रयज्ञे ।
पूर्णाहुतिमिह लंभिताः प्रपूज्य श्रेयांसि प्रददतु भव्यभाक्तिकेभ्यः॥ २२५ ॥

पूर्णाहुतिः ।

प्राच्याद्याग्नेयकोणादिपत्रेष्विष्टाः क्रमादिमाः। अष्टौ जयादिजंभादिदेव्यः शांतिं वितन्वताम् ॥

इष्टप्रार्थना । इति जयादिदेवतार्चनाविधानम् । अथ दिक्पालान् द्वारपालान् यक्षांश्च संक्षेपेण सत्कुर्यात् । इति बहिर्मंडलचतुष्टयार्चनविधानम् ।

मोहा देवीको जल आदि द्रव्य चढावे ॥ २२२ ॥ "जिनं" इत्यादि तथा "ओं ह्रीं" बोलकर स्तंभादेवीको जल आदि द्रव्य चढावे ॥ २२३ ॥ "प्रवादि" इत्यादि तथा "ओं ह्रीं" बोलकर स्तंभिनीको जल आदि द्रव्य चढावे ॥ २२४ ॥ "इत्येताः" इत्यादि श्लोक बोलकर स-

इत्थं निष्ठितपूज्यपूजनविधिः शक्रो महार्घेण तां
त्रिर्वेदीमवताय भूतिभरतो भक्त्या परित्यानतः ।
सद्रूपाश्चतुरोष्ट वा सुकुसुमैस्तं जापयन् प्रतस-
द्रूपं मंत्रमनादिसिद्धमुरुधीरीशानवेदीं यजेत् ॥ २२७ ॥

णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं णमो उवज्झायाणं णमो लोए सव्वसाहूणं। चत्तारि मंगलं अरहंतमंगलं सिद्धमंगलं साहुमंगलं केवलीपण्णत्तो धम्मो मंगलं। चत्तारि लोगोत्तमा अरहंतलोगोत्तमा सिद्धलोगोत्तमा साहुलोगोत्तमा केवलिपण्णत्तो धम्मो लोगुत्तमा। चत्तारिसरणं पव्वज्जामि अरहंतसरणं पव्वज्जामि सिद्धसरणं पव्वज्जामि साहुसरणं पव्वज्जामि केवलिपण्णत्तो धम्मो सरणं पव्वज्जामि ह्रीं स्वाहा। अनादिसिद्धमंत्रः। इति मूलवेदिकार्चनविधानम्। अथोत्तरवेदिकार्चनम्।

वेद्यां चाग्यां सुरगिरिशिलावेदित्रत्कर्णिकायां
माग्वन्मंत्रानथ कजदलेष्वष्टसु श्र्यादिदेवीः ।

चको पूर्णार्घ देवे ॥ २२५ ॥ "प्राच्या" इत्यादि श्लोक बोलकर इष्टवस्तुकी प्रार्थना करे ॥ २२६ ॥ इसतरह जया आदि देवताओंकी पूजा हुई। इसके बाद दिकपाल, द्वारपाल और यक्षोंका संक्षेपसे सत्कार करे ॥ इसप्रकार बाह्य मंडलचतुष्ककी पूजाविधि जानना। "इसप्रकार" वह इंद्र पूजाविधि करके अनादि सिद्ध मंत्रको जपता हुआ ईशानवेदीको पूजे ॥ २२७ ॥ "णमो" इत्यादि स्वाहातक अनादिसिद्ध मंत्र जानना ॥ इसतरह मूलवेदी-

अष्टेंद्रादीन् क्षितिपुरबहिर्दिक्षु देवीजयाद्या
न्यस्य द्वारेष्वनु च चतुरो यक्षदेवान् यजामि ॥ २२८ ॥

ईशानवेद्यां यागमंडलपूजाप्रतिज्ञानाय पुष्पांजलिं क्षिपेत् । अथ पूर्वविधिना कर्णिकांतःस्थापितां परब्रह्मादिपूजां विधाय पद्मदलेष्वष्टौ श्र्यादिदेवीः पूजयेत् । तथाहि ।

याः सामानिकपर्षदंबुजपरीवारान्वया ध्रूर्ध्वभू
पद्मादिह्रदपुष्करेंदुत्रिंशद्प्रासादवासा मुदा ।
सेवंते बहुधा जिनेंद्रजननीं श्र्यादीन्नयंत्यो गुणान्
भांती पुष्पमुखैः करात्तकलशैस्ताः श्र्यादिदेवीर्यजे ॥ २२९ ॥

श्र्यादिदेवीसमुदायपूजाविधानाय पत्राष्टके कुंकुमाघुलितपुष्पाक्षतं क्षिपेत् । अथ पृथगिष्टिः ।

की पूजाविधि हुई । अब उत्तरवेदीकी पूजा कहते हैं । "वेद्यां" इत्यादि श्लोक पढकर ईशानवेदीमें यागमंडलकी पूजा करनेके लिये पुष्पोंको क्षेपण करे ॥ २२८ ॥ अब पहले कही हुई विधिके अनुसार कर्णिकाके मध्यमें स्थापित अरहंत आदि परमेष्ठीकी पूजा करके आठ कमलपत्रोंपर श्री आदि आठ देवियोंकी पूजा करे । उसीको कहते हैं । "याःसामा" इत्यादि श्लोक बोलकर श्रीआदि देवीयोंके समूहकी पूजा करनेके लिये आठ पत्तोंपर केशरसे लेपे हुए पुष्पअक्षतोंको क्षेपण करे ॥ २२९ ॥ अब जुदी जुदी पूजा कहते हैं । "श्र्याद्याः"

ऽपायाः संशब्दये युष्मानायात सपरिच्छदाः।अत्रोपविशतैता वो यजे प्रत्येकमादरात्॥२३०॥

आवाहनादिपुरस्सरप्रत्येकपूजाप्रतिज्ञानाय पत्रेषु पुष्पाक्षतं क्षिपेत् ।

क्षोण्या पार्श्वततेंद्रकार्मुकतडिद्वंडद्युतिं तन्वतो
डिम्याद्रेरुपरित्यमुज्ज्वलयतः पद्मह्रदं पुष्करात् ।
यत्यद्रव्यवरैः सुराळह्रदतैर्गर्भं विशोध्य श्रियं
तन्वाना जिनमातरं भजति या सा श्रीस्तडिद्धार्च्यते ॥ २३१ ॥

ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते श्रीदेवि आगच्छागच्छ इदं जलं........ ।

नानारत्नमयूखपार्श्वखचितक्षीरादवेळाक्षिपो
मूर्द्धन्युल्लसतो महाहिमवतः पद्मान् महापाद्मिके ।
संविद्वालसखीमुपेत्य विनयाल्लज्जां दृशोर्व्यंजती
यार्हन्मातुरुपासनां वितनुते सा ह्रीर्जपाभार्च्यते ॥ २३२ ॥

इत्यादि श्लोक बोलकर आवाहनादिपूर्वक हरएककी पूजा करनेकी प्रतिज्ञा करनेके लिये पत्तोंपर पुष्प और अक्षत क्षेपण करे ॥ २३० ॥ "क्षोण्या" इत्यादि तथा "ओं सुवर्ण" बोलकर श्रीदेवीको जल आदि आठ द्रव्य चढावे ॥ २३१ ॥ "नानारत्न" इत्यादि तथा "ओं रक्त" इत्यादि बोलकर ह्री देवीको अर्घ चढावे ॥ २३२ ॥ "उद्यंतं" इत्यादि तथा "ओं

ओं रक्तवर्णे चतुर्भुजे पुण्पमुखकलशहस्ते ह्रीदेवि इदं........................ ।

उद्यंतं सहतोभितो हरिधनुष्कीर्णा रविं सीकरै—
मूर्द्धोर्वी निषधस्य चुंबति महापद्मादपि ज्यायसी ।
कंजादेत्य तिगिंछ एधितरुचेर्धैर्यं परं पुष्यतीं
या जैनां भजतोंबिकामुपहरे तां चीनवर्णां धृतिम् ॥ २३३ ॥

ओं सुवर्णवर्णे चतुर्भुजे पुण्पमुखकलशहस्ते धृति देवि इदं........................ ।

पार्श्वोद्धासिविचित्ररत्नरुचिरां वैडूर्यगात्रीं गदां
द्वीपेनेव धृतां पुनात्युपरिमे नीलाचलं नीरजात् ।
भातः केसरिणि श्रियेत्य विधिवद्या सज्जयंती स्तुतौ
रुक्माभा वरिवस्यतीशजननीं तां कीर्तिमर्चाम्यहम् ॥ २३४ ॥

ओं सुवर्णवर्णे चतुर्भुजे पुण्पमुखकलशहस्ते कीर्तिदेवि इदं........................ ।

भास्वद्भक्तिविचित्रितोभयवपुर्भोगेंद्रनागप्रती—
क्षिण्णो रुक्मिगिरेर्महांतमुपरित्यं पुंडरीकं श्रितात ।

स्व" इत्यादि बोलकर धृति देवीको जलादि चढावे ॥ २३३ ॥ "पार्श्वो" इत्यादि तथा "ओं स्व" इत्यादि बोलकर कीर्ति देवीको अर्घ चढावे ॥ २३४ ॥ "भास्वद्भ" इत्यादि तथा "ओं स्व" इत्यादि बोलकर बुद्धिदेवीको जलादि चढावे ॥ २३५ ॥ "रत्नाग्र" इत्यादि तथा "ओं

याज्जादेत्य हिरण्यरुक्परिचरत्यर्हत्सवित्रीं जग—
द्बोधं कंदलयंत्यलं बलिमहं तस्यै ददे शुद्धये ॥ २३५ ॥
ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते शुद्धिदेवि इदं......................।

रत्नांशुच्छुरितोभयांतकनकश्रोणीध्रशृंगास्निहः
रक्कुर्वाणमधित्यकां शिखरिणो यत्पुंडरीकं श्रिया।
आवभ्राति ततोंबुजादुपरतावायै भवोद्भासिनी
भर्माभा जुषतेंबिकां जिनपतेर्लक्ष्मीं यजे तामहम् ॥ २३६ ॥
ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते लक्ष्मी देवि इदं............।

दृश्यादृश्यवपुर्भिरस्फुटशची साक्षात्सुखं श्र्यादिभि–
स्तत्तन्मंगलधारणादिविधाभिर्देव्या यदुद्भाव्यते
तत्मत्यूहनिराकृतं विदधती तस्या मनोनिर्वृतिं
कांचित्कांचनकांतिरुत्किरति या शांतिर्मया सार्च्यते ॥ २३७ ॥
ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते शांति देवि इदं............।

सु" इत्यादि बोलकर लक्ष्मीदेवीको अर्घ चढावे ॥ २३६ ॥ "दृश्यादृश्य" इत्यादि तथा "ओं
सु" इत्यादि बोलकर शांतिदेवीको जलादि चढावे ॥ २३७ ॥ "संक्रांते" इत्यादि तथा "ओं

संक्रांतेंदु यथाम्रुखीनवलवकुर्क्षि जिनाध्यासितं
बिभ्रत्यावपुषीश्वरे गुणगणे भोगेषु भक्तेषु च ।
देव्याः पुष्टिमनुक्षणं प्रगुणयंत्यन्यासु या स्तभ्यते
गांगेयांगरुगर्हतोर्हति महे सा पुष्टिरिष्टिं न काम् ॥ २३८ ॥

ओं सुवर्णवर्णे चतुर्भुजे पुष्पमुखकलशहस्ते पुष्टिदेवि इदं.................. ।

इत्यष्टता दिक्कुमारीर्जिनांबापरिचारिकाः । प्रसाद्य हविषां पूर्णाः पूर्णाहुत्यो विदध्महे ॥२३९॥

पूर्णाहुतिः ।

एवं संभाविताः कर्तुर्जिनजन्ममहोत्सवम् । श्रीमुख्यदेवतास्त्वष्टास्तुष्टये संतु यज्वनाम् ॥२४०॥

इष्टप्रार्थनाय पुष्पांजलिं क्षिपेत् । एवं श्र्यादिदेवीरभ्यर्च्य दिक्पालादीन् पूर्ववत्क्रमेण पूजयेत् । इत्युत्तरवेदिकार्चनविधानम् ।

ऐतिह्यादिति यागमंडलपदं निर्वर्त्य वेदीविधिं
चिह्नत्यं शुभभावसंपतिपरां निर्माप्य भव्यात्मनाम् ।

सु" इत्यादि बोलकर पुष्टि देविको जलादि चढावे ॥ २३८ ॥ "इत्यष्टे" इत्यादि श्लोक बोलकर पूर्णार्घ चढावे ॥ २३९ ॥ "एवं" इत्यादि श्लोक बोलकर इष्ट वस्तुकी प्रार्थनाकेलिये

दृष्ट्वामृश्य च सर्वेशः प्रतिकृतीराशाधरोंतश्चरत्-
कीर्तिः सोत्तरसाधकोनुरहसं गच्छेत्पुरा कर्मणे ॥ २४१ ॥

इत्याशाधरविरचिते प्रतिष्ठासारोद्धारे जिनयज्ञकल्पापरनाम्नि यागमंडलपूजाविधानीयो नाम तृतीयोऽध्यायः ॥ ३ ॥

हे हुए क्रमसे पूजे। इस तरह उत्तर वेदीकी पूजा विधि हुई। मैंने (आशाधरने) यह वेदीका विधान शास्त्रके अनुसार कहा है। जो कोई इस विधीको जानकर और विचार कर करेगा वह मुमुक्षु भव्यजीव उत्तम सुखको अवश्य प्राप्त होगा ॥ २४१ ॥

इसप्रकार पं० आशाधर विरचित जिनयज्ञकल्प द्वितीय नामवाले प्रतिष्ठासारोद्धारमें यागमंडलकी पूजाविधी कहनेवाला तीसरा अध्याय समाप्त हुआ ॥ ३ ॥

॥ चतुर्थोऽध्यायः ॥ ४ ॥



अथो विविक्तदेशस्थः प्रतिष्ठाचार्यकुंजरः। प्रतिष्ठाविधये कुर्यात् परिकर्मेदमादृतः ॥ १ ॥
प्रागेकां सुखसंचार्यां प्रातिहार्यादिशालिनीम्। पुरोधाय सुरम्यार्च्यां प्रतिष्ठेयं निरूपयेत्॥२॥

शस्ताशस्तात्मभावार्जितदृपत्रजिनच्छेददृप्यत्परा यः
स्वर्गाच्छ्भ्रादथैत्य त्रिजगदुपकृतिव्यक्तिमाहात्म्यसंपत् ।
शक्राद्यैर्यातिरागादहमहमिकया सेव्यते सिद्ध्यधीशः
पश्यंत्यज्ञास्तदर्चां स्वचितामिह नये स्थाप्यतेर्हत्स तेभ्यः ॥ ३ ॥

अब चौथा अध्याय कहते हैं। याग मंडलकी पूजाके बाद उत्तम प्रतिष्ठाचार्य एकांतस्थानमें प्रतिष्ठा विधिके लिये इस आगे कहेजानेवाली क्रियाको करे ॥ १ ॥ सबसे पहले एक प्रतिमाको लावे। जोकि अच्छीतरह अपनेपर चल सके, प्रातिहार्य आदि सहित हो और देखनेमें बहुत अच्छी हो ॥ २ ॥ " शस्ता " आदि श्लोकोंमें जैसा प्रतिमाका वर्णन किया है वैसी प्रतिमाको [illegible]

कल्याणैः श्रितभूतभाविसुनयत्रित्वैभयैः पंचाभि-
श्चित्तं वित्तमशेषमोहमथनाद्धासत्यविद्याभिदि ।
प्रत्यग्ज्योतिषि तीर्थकृत्वनियतं निर्बीजयोगे स्फुरद्
ध्यात्वार्चां स्थिरचित्क्षणाष्टकपदे यो क्षेत्रबीजाक्षरम् ॥ ४ ॥

द्रव्यैः स्वैः सुनयार्जितैर्जिनपतेर्बिम्बं स्थिरं वा चलं
ये निर्माप्य यथागमं सुदृपदाद्यात्मनान्येन वा ।
लग्ने वाल्गुनि लंभयंति तिलकं पश्यंति भक्त्या च ये
ते सर्वेपि महोदयांतमुदयभव्यां लभंतेऽद्भुतम् ॥ ५ ॥

प्रतिष्ठेयनिरूपणा । अथ सकलीकरणम् । अत्रादावनेन मंत्रेण स्वहस्तौ पवित्रयेत् । ओं णमो अरहंताणं णमो केवलिणे सुअंगदेवि पसत्थ हत्थेहिं हुं फट् स्वाहा । हस्तद्वयपवित्रकरणमंत्रः । ततः

भव्यजीव उत्तमपदको पाते हैं ॥ ३ । ४ । ५ । यह प्रतिमाका वर्णन हुआ । अब सकलीकरण क्रिया कहते हैं । उसमें पहले " ओं णमो " इत्यादि मंत्रसे अपने हाथ पवित्र करे । उसके बाद सुरभिमुद्रा धारण करके इस आगेकी पवित्र विद्याको सात बार चिंतवन करे । वह विद्या "ओं णमो" से लेकर स्वाहा तक कही है। उसके बाद अंगन्यास करे वह [illegible]

सुरभिमुद्रां धृत्वा इमां शुचिविद्यां सप्तवारान् न्यसेत्। ओं णमो अरहंताणं णमो सिद्धाणं णमो आगासगामीणं णमो विज्झायाणं णमो सव्वोसहिपत्ताणं णमो सयं बुद्धाणं णमो केवलिणे स्वाहा । इमा च। ओं अर्हन्मुखकमलवासिनि पापात्मक्षयंकरि श्रुतज्वालासहस्रप्रज्वलिते सरस्वति मम पापं हन हन क्षां क्षीं क्षु क्षौं क्षः क्षीरधवले अमृतसंभवे वं वं हूं स्वाहा । शुचीकरणमंत्रौ । ततः सकलीकुर्यात् । ओं अं नमः सुहृदये, ओं सिं स्वाहा शिरसि, ओं आं वषट् शिखायां, ओं ओं घे घे कवचं, ओं सां हूं फट् स्वाहा अस्त्रं, ओ ह्रौं वषट् नयनयोः । पुनः ओं ह्रां णमो अरहंताणं स्वाहा हृदये, ओं ह्रीं णमो सिद्धाणं स्वाहा ललाटे, ओं ह्रूं णमो आइरियाणं स्वाहा शिरोदक्षिणे, ओं ह्रौं णमो उवज्झायाणं स्वाहा पश्चिमे, ओं ह्रः णमो लोए सव्वसाहूणं स्वाहा वामे । पुनस्तान्येव पदानि ललाटे मूर्ध्नि दक्षिणे पश्चिमे वामे चेति न्यसेत् । सकलीकरणमंत्रः । ततः ।

ओं " उसहाइजिणं पणमामि सया अमलो विरजो वरकप्पतरु ।
सवकामदुहा मम रक्ख सदा पुरु विज्जणही पुरु विज्जणिही ॥ ६ ॥

"ओं" इत्यादि पहला मंत्र बोलकर हृदय स्थानको स्पर्श करे । दूसरेसे मस्तकको, तीसरेसे चोटीको चौथेसे कवचको पांचवेंसे अस्त्रको. और छठेमंत्रसे नेत्रोंको छुए। अथवा "ओं ह्रीं" इत्यादि पहले मंत्रसे हृदयका स्पर्श करे, दूसरेसे मस्तकका, तीसरेसे शिरके दाहिनी तरफका, चौथेसे पश्चिमकी तरफका, पांचवेसे बांई तरफका स्पर्श करे। इन्हीं पदोंको बोलकर मस्त-

ओं " अट्ठेव य अट्ठसया अट्ठसहस्सा य अट्ठकोडीओ ।
रक्खंतु ते सरीरं देवासुरपणमिया सिद्धा ॥ ७ ॥ स्वाहा ।

अनेन स्वस्यांगप्रत्यंगपरामर्शः कार्यः । ततः ओं धनु धनु महाधनु । स्वाहा । इमां धनुर्विद्यां वामकरांगुलिपर्वसु विन्यस्य प्रतिमाग्रे वामपादांगुष्ठेन सरेफाग्रपुरस्सरं धनुरालिख्य वामपादेनाक्रम्य कायोत्सर्गेण स्थितः सन् ओं णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं णमो उवज्झायाणं णमो लोए सव्वसाहूणं थंभेइ जल जलण चिंतियमित्तेण पंचणमोकारो अरि मारि चोर राउल घोरुवसग्गं ह्रां ह्रीं ह्रूं ह्रौं ह्रः विणासेइ स्वाहा । इदं सप्तवारान् हृद्युच्चार्य अष्टोत्तरशतं धनुर्विद्यामावर्तयेत् । इति सकलीकरण विधानं । अथ प्रतिष्ठा ।

कके दक्षिण पश्चिम और वांयें भागमें स्थापन करे ॥ यह सकलीकरण मंत्रकी क्रिया हुई । उसके बाद छठे सातवें दो श्लोकमंत्र पढकर अपने अंग उपांगोंको छुए ॥ ६ ॥ ७ ॥ उसके पीछे "ओंधनु" इत्यादि धनुपविद्याको वांयें हाथकी उंगलियोंके पोरुओंमें स्थापनकर प्रतिमाके आगे वांयें पैरके अंगूठेसे रेफ सहित बाणयुक्त धनुपको लिखकर बांये पैरसे आच्छादितकर खड्गासनसे "ओं णमो" इत्यादि स्वाहा पर्यंत मंत्रको सातवार मनमें बोलकर एकसौ आठवार धनुपमंत्रको जपै । इसतरह सकलीकरण क्रियाका कथन किया । अब प्रतिष्ठा करनेकी विधि कहते हैं;—सकलीकरणादि कर्म करनेके बाद प्रतिष्ठाचार्य वेदीके पूर्वसिंहासनके

कृतकर्माधुनावेदीं प्राँच्यपीठाग्रभूतले । इह गंधांबुसंसेकसत्पुष्पप्रकारांचिते ॥ ८ ॥
भद्रासनं निवेशयात्र विश्वकर्मसमक्षतः । गर्भावतारकल्याणं स्थापयापीदमर्हताम् ॥ ९ ॥

ॐ मूलवेद्याः पूर्वस्यां दिशि जयादिपीठस्य पुरस्ताद्भद्रासनं निवेशयामीति स्वाहा । भद्रासननिवेशनम् ।

वंशक्षायिकदृक्सामिद्धसुधियां योस्मिन्मनूनामभू-
द्ये चेक्ष्वाकुकुरुग्रनाथहरियुग्वंशाः पुरोवेधसा ।
आधानादिविधिप्रबंधमहिताः सृष्टास्तदुत्थार्यभू-
भर्तृस्वामिकजीविता सुकुलजा जैन्यो जयंत्यंबिकाः ॥ १० ॥

भूत्यादित्रयदृग्विशुद्ध्यनुगचित्सत्कर्मणोआगम-
द्रव्यो गोतमगोत्रभागभिजनो नेमिस्तथा सुव्रतः ।
तद्वत्काश्यपगोत्रिणस्तदितरे णोकर्मनोआगम-
द्रव्योत्रेष्वभवन् स्वयं यदुदरेष्वंबाः प्रसीदंतु ताः ॥ ११ ॥

आगेकी जगहको गंधोदकसे छिडककर पुष्पोंको क्षेपण कर उस जगह पर कारीगरके सामने उत्तम सिंहासन रखे और "मैं अर्हत्प्रभुका गर्भकल्याणक स्थापन करता हूं" ऐसा कहे। उस समय "ॐ मूल" इत्यादि मंत्र बोलना चाहिये ॥ ८ ॥ ९ "वंश" इत्यादि दो श्लोक बोलकर जिनमाताओंकी स्तुती करे ॥ १० ॥ ११ ॥ अब जिनमाताओंके नाम कहते है;—

मरुदेवीं वृषस्यांबा विजयामजितस्य च । सुषेणां संभवेशस्य सिद्धार्थां नंदनप्रभोः ॥१२॥
सुमंगलाह्वां सुमतेः सुसीमां पद्मरोचिषः । वसुंधरां सुपार्श्वस्य लक्ष्मणां चंद्रलक्ष्मणः॥१३॥
रामां श्रीपुष्पदंतस्य सुनंदां शीतलार्हतः । विष्णुश्रियं श्रेयसश्च वासुपूज्यप्रभोर्जयाम् ॥१४॥
सुशर्मलक्ष्मीं विमलार्हतोऽनंतस्य सुव्रताम् । ऐरिणीं धर्मनाथस्य कमलां शांत्यधीशिनः १५
सुमित्रां कुंथुनाथस्य अरभर्तुः प्रभावतीम् । मल्लेः पद्मावतीं वप्रां सुव्रतस्य मुनीशिनः॥१६॥
विनतां नमिनाथस्य शिवां नेमिजिनेशिनः। देवदत्तां च पार्श्वस्य वीरस्य प्रियकारिणीम्॥१७॥
चतुर्विंशतिमप्येताः सवित्रीस्तीर्थकारिणाम् । स्थापयामीह तद्गर्भपवित्रितजगत्त्रयाः ॥ १८ ॥

ऋषभनाथकी मरुदेवी अजितकी विजया, संभव नाथकी सुषेणा, अभिनंदनकी सिद्धार्था, सुमतिजिनकी सुमंगला, पद्मप्रभकी सुसीमा, सुपार्श्वकी वसुंधरा, चंद्रप्रभकी लक्ष्मणा, पुष्पदंतकी रामा, शीतलनाथकी सुनंदा, श्रेयांसनाथकी विष्णुश्री और वासुपूज्य प्रभुकी जया है ॥ १२ ॥ ॥१३॥१४॥ विमलनाथकी सुशर्मलक्ष्मी, अनंतनाथकी सुव्रता, धर्मनाथकी ऐरिणी, शांतिनाथकी कमला, कुंथुनाथकी सुमित्रा, अरनाथकी प्रभावती, मल्लिनाथकी पद्मावती, सुव्रतप्रभुकी देवदत्ता और महावीरप्रभुकी प्रियकारिणी—इन चौवीस जिनमाताओंकी स्थापना इस जगह करता हूं। इन्हींके गर्भसे तीन जगत पवित्र होता है । १५।१६।१७।१८॥ "ओं"

ओं मरुदेव्यादिजिनेंद्रमातरोत्र सुप्रतिष्ठिता भवंत्विति स्वाहा । जिनमातृस्थापनार्थं भद्रपीठस्योपरि पुष्पांजलिं क्षिपेत् ।

षण्मासान् भुवमेष्यतां नवदिवश्चाजग्मुपामर्हतां
पित्रोः सौधमपीद्धमुत्सृजति या रैदो महेंद्राज्ञया ।
स्वर्णा गावधुतामरद्रुमफलासारभ्रमं कुर्वतीं
व्यक्तुं तामिह रत्नवृष्टिमुचितं मुंचामि पुष्पोच्चयम् ॥ १९ ॥

ओं धनाधिपते अर्हत्पितासौधे रत्नवृष्टिं मुंच मुंचेति स्वाहा । कनकशलाका रत्नपंचकविमिश्रचित्रकुसुमांजलिं भद्रपीठस्याग्रतः प्रकिरेत् । रत्नवृष्टिस्थापनं ।

सर्वर्तुकामिवरवस्त्रफलप्रसूनशय्यासनाशनविलेपनमंडनानि ।
तत्तत्क्रियोपकरणानि तथेप्सितानि तीर्थेमशातुरुपदीकुरुतां धनेशः ॥ २० ॥

इत्यादि बोलकर जिनमाताओंकी स्थापनाके लिये सिंहासनके ऊपर पुष्पोंको क्षेपण करे। "षण्मासान्" इत्यादि तथा "ओं" इत्यादि बोलकर सोनेकी सलाई पांच तरहके रत्न—इनसे मिले हुए पुष्पोंको सिंहासनके आगे बखेरै। इस तरह रत्नवर्षाका स्थापन हुआ॥१९॥ "सर्वर्तु" इत्यादि तथा "ओं" इत्यादि बोलकर उत्तम कपड़े अंगूठी हार फल पत्र पुष्प आदिको सिंहासनके आगे रखे। इन सब वस्तुओंको शिल्पी ग्रहणकरे ॥ २० ॥ उसके बाद

ओं निधीश्वर जिनेश्वरमात्रे भोगोपभोगांगान्युपनयोपनयेति स्वाहा । चारुवस्त्रमुद्रिकाहारफल-पत्रपुष्पादिकं पीठाग्रे प्रतिष्ठयेत् । तच्च सर्वं विश्वकर्मा गृह्णीयात् ।

माताको सोलह स्वप्नोंका देखना।गर्जताहुआ सफेद ऐरावत हाथी १ बैल २ सिंह ३ देव हस्तियोंसे स्नान कराई गई लक्ष्मी ४ लटकतीं दो फूलोंकी मालायें ५ चांदनीयुक्त पूर्णचंद्रमा ६ ऊगता हुआ सूर्य ७ कमलोंसे ढके हुए सुवर्णमई कलशे ८ सरोवरमें क्रीडा करता मछलियोंका जोड़ा ९ दिव्य सरोवर १० चंचल लहरोंवाला समुद्र ११ रत्नजड़ा सिंहासन १२ मणियोंसे जटित विमान १३ नागेंद्रका भवन १४ प्रकाशमानरत्नोंकी राशि १५ धूमरहित जलती हुए अग्नि १६—ये सोलह स्वप्न हैं इनको देखकर माताको जगना । उसके बाद अपने पतिसें स्वप्नोंका फल सुनना । वह इस तरह है—पहले स्वप्नमें सफेद ऐरावत हाथी देखनेसे उत्तम पुत्रका होना, बैलके देखनेसे तीन लोकका गुरु होना, सिंह देखनेसे अनंत बलसहित होना, स्नान कराई गई लक्ष्मीके देखनेसे इंद्रोंकर सुमेरु पर्वतपर अभिषेक होना, पुष्पमाला देखनेसे धर्मतीर्थका प्रवर्तक होना, पूर्णचंद्रमा देखनेसे संसारको आनंदित करना, सूर्यके देखनेसे तेजस्वी होना, दो सुवर्णके घड़े देखनेसे रत्नादिकी खानिका स्वामी होना, मछलियोंका जोड़ा देखनेसे बहुत सुखी होना, सरोवर (तालाव) देखनेसे शुभलक्षणों सहित होना, समुद्रके देखनेसे केवलज्ञानी होना, सिंहासनके देखनेसे बड़े भारी राज्यका अधिकारी होना, विमान देखनेसे स्वर्गसे आकर जन्म होना, नागेंद्रका भवन देखनेसे अवधिज्ञानी

मंद्रं गर्जतमैन्द्रं द्विपमुडुपशयं तत्सगंधं गवेंद्रं
सिंहं शैलेन दंतं जलरुहि कमलां स्नाप्यमानां सुरेभैः ।
दाम्नी खे लंबमाने भ्रमदलिपटले चंद्रिकाकीर्णदिकं
चंद्रं प्रद्योतमर्कं सरसि झषयुगं क्रीडदन्योन्यरक्तम् ॥ २१ ॥
कुंभौ हेमौ सुधाद्यौ स्फुटकमलमुखौ छन्नमच्छाप्सरोब्जै-
श्चंचद्रत्नोर्मिमब्धिं तडिदुचितमरुच्चापजित्सिंहपीठम् ।
कांत्यान्योन्यं हसंत्या सुरफणिसदने द्यां करै रंजयंतं
रत्नौघं प्रज्वलंतं ज्वलनमपि निशातुर्ययामे द्विरष्टौ ॥ २२ ॥
स्वप्नान् दृष्ट्वा प्रबुद्धा झटिति घटितमुच्छृण्वती तूर्यनादान्
पत्युः प्रीतात्तदुक्त्या सुतनु सुतमिभस्ते स तादृग्महांतम् ।
सूते विश्वाग्रिमं गौः करिकुलकपितानंतवीर्यं स्मेंद्रै-
र्मेरौ स्नाप्य द्विमालं वृषसमयकरग्लौः प्रजाह्लादहेतुम् ॥ २३ ॥
भास्वान् दीप्रं विशारिद्वयमतिसुखिनं कुंभयुग्मं निधीशं
कासारो लक्ष्मसारं परविदमुदधिर्विष्टरं प्राज्यराज्यम् ।

होना, रत्नराशिके देखनेसे अनेक गुणोंका खजाना होना, निर्धूम अग्निके देखनेसे कर्मरूपी इंधनका जलाना—ये स्वप्नोंको फल है ॥ २१ । २२ । २३ । २४ ॥ स्वप्नोंको देखना स्थापन

घरेतारं सुरौकः फणिगृहमवधिज्ञानिनं सद्गुणाब्धिं
रत्नौघोद्दीप्तमग्निः स्तमितिविदितसतत्फलैर्पार्हदंवा ॥ २४ ॥

षोडश सत्पुष्पाणि तावंत्येव च सत्फलानि पारिवर्त्य पीठाग्रतः स्थापयेत् । स्वप्नावलोकनस्थापनम् ।

श्री ह्री धृते कीर्तिमती च लक्ष्मि शांते च पुष्टे च सहैत्य जिष्णोः ।
आज्ञानियोगेन तथा स्वभक्तया पित्रे निवेद्यात्ततदभ्यनुज्ञाः ॥ २५ ॥
विशोध्य गर्भं सुपवित्रदिव्यद्रव्यैर्यथास्थाननियोगमेनाम् ।
सुभक्तया गूढमुपास्यमानां शच्या भजध्वं पुरुदिक्कुमार्यः ॥ २६ ॥

ओं दिक्कुमार्यो जिनमातरमुपेत्य परिचरत परिचरतेति स्वाहा । सद्वस्त्रालंकारा अष्टौ वरकुमारीर्मंगलतांबूलहस्ताः संनिधाप्य पीठं परितः सकुंकुमरंजितपुष्पाक्षतं क्षिपेत् । गर्भशोधनपूर्ववद्दिक्कुमारीपरिचर्यास्थापनं ।

करनेकेलिये सोलह उत्तम पुष्पोंको तथा सोलह उत्तम फलोंको सिंहासनके आगे स्थापन करे । श्री ह्री धृति कीर्ति बुद्धि लक्ष्मी शांति पुष्टि—इन देवियोंकर गर्भ शोधन करना ॥ २५ । २६ ॥ आठ कुमारी कन्यायें स्वच्छ वस्त्र आभूषणोंको पहनके हाथमें फल आदि मंगलीक द्रव्य लेकर सिंहासनके पास आके केशर मिले हुए पुष्प अक्षतोंको क्षेपण करे । य-

सर्वौषधिचंदनपंचमृद्भिर्विलिप्य तीर्थोदकपंचकेन ।
विशोध्य पीठं जिनमब्जगर्भे गर्भोपमेस्मिन्नवतारयामि ॥ २७ ॥

तामेव रहसि पुरा निरूपितप्रतिष्ठेयामर्हत्प्रतिमां नूतनासितनासितसद्वस्त्रप्रच्छादितां पुरस्सरटंकिकाकरविश्वकर्मसौधर्मेन्द्रौ महोत्सवेनानीय सुविशुद्धभद्रासनगर्भपद्मे निवेशयेतां ।

यो गंगांबुसुरत्नपुष्पकृतभूपस्कारामिंद्रासन—
द्रकूपं प्रमदाकुलीकृतजगद्गर्भे प्रविश्योत्तमे ।
लग्ने त्रामातिरंजयन् रविरिह प्राची परानुग्रह-
ग्राहाद्यन्वृतिवर्द्धतेस्म सुदृशां सोऽयं जिनस्तन्मुदे ॥ २८ ॥

ओं णमोर्हते केवलिने परमयोगिने शुक्लध्यानाग्निनिर्दग्धकर्मेन्धनाय सौम्याय शांताय वरदाय

ह गर्भशोधन और दिक्कुमारियोंकी सेवाविधि स्थापन कीजाती है । सर्वौषधि चंदन आदिसे सिंहासनको पवित्र करके कारीगर और सौधर्मेंद्र दोनों उत्तम वस्त्रसे ढकी हुई प्रतिष्ठेय प्रतिमाको महान उच्छवके साथ लाकर शुद्ध सिंहासनके भीतर कमलपत्रमें स्थापित करें ॥ २७ ॥ उसके वाद " यो गंगां " इत्यादि तथा " ओंणमो " इत्यादि बोलकर कुंकुसे रंगे हुए चमेलीके पुष्प तथा अक्षतोंको मूलनायक और दूसरी प्रतिमाओंके ऊपर क्षेपण करें ॥ २८ ॥ गर्भावतार विधि कहते हैं । "दृक् " इत्यादि दो श्लोक बोलकर

अष्टादशदोपविवर्जिताय स्वाहा । जात्यकुंकुमपिंजारितजातिपुष्पाक्षतं तस्या अन्यासा च प्रतिष्ठेयमाना-नामुपरि क्षिपेत् । गर्भावतारणं ।

दृक्शुद्धयादिविशेषवद्धसुकृतस्कंधप्रसर्गांगिक-
स्फूर्जच्छुष्मणि विश्वकर्माणि निजव्यापारयोग्यं वपुः ।
सद्गुमस्तभरास्त्रिबोधरुचिभागास्येन योर्काब्दवद्
गर्भे मातुरिभाकृतिर्वसति वै सोत्रावतीर्णः प्रभुः ॥ २९ ॥
इत्युक्त्वा प्रणतामहत्तरिकया निर्दिश्यमाना पृथक्
स्थानाख्यादिभिदा जिनेंद्रजननीमभ्यर्च्य नुत्वा स्फुटं ।
नाथं पत्रमुदाभिनीय पितरं चापृच्छ्य जग्मुः पदं
स्वं शक्राः स जयत्ययं जिनपतेर्गर्भावतारोत्सवः ॥ ३० ॥

जिनमातृपूजनार्थं भद्रासनगर्भनिवेशितप्रतिमाग्रे पुष्पांजलिं क्षिपेत् ।

अथेंद्रैः सिद्धचारित्रशांतिभक्तिभिरादरात् । गर्भावतारकल्याणक्रिया तत्यास सूरिभिः॥३१॥

जिनमाताके पूजनके लिये सिंहासन (भद्रासन) में स्थापित प्रतिमाके आगे पुष्पांजलि क्षेपण करे ॥ २९।३० ॥ उसके बाद वे इंद्र सिद्धभक्ति चारित्रभक्ति शांतिभक्ति—इन तीनोंको करके गर्भावतार कल्याणकी समाप्ति करें ॥ ३१ ॥ इस तरह गर्भावतार कल्याणककी विधि

इति गर्भावतारकल्याणस्थापना । अथ जन्मकल्याणस्थापना ।

देवानां नमयन् शिरांसि समनांस्याकंपयन्नासना-
न्यभ्रं निर्मलयन् सदिक्सुमनसो देवद्रुमैर्वर्षयन् ।
जन्यन् शीतसुगंधिमंदमनिलं यः सिंधुमुद्वेल-
माधुन्वन् स धराधरां च निरगात् कुक्षेः शुभेद्धोपसः ॥ ३२ ॥

वस्त्रापनयनम् ।

किं तां सवित्रीमिह वर्णयामि किं चर्चये लग्नमथास्पदं तत् ।
यदेष देवो भुवनत्रयैकगुरुः स्वयं स्वप्रसवेधिचक्रे ॥ ३३ ॥
पुण्याहमद्याद्य मनोरथा नः पूर्णा जगंत्यद्य सनायकानि ।
प्रमोदते कोद्य न चेतनोस्मिन्नृजेपि जन्मात्ययिदं प्रपन्ने ॥ ३४ ॥

जिनजन्मस्थापनाय तस्या अन्यासां च प्रतिष्ठेयप्रतिमानामुपरि पुष्पाक्षतं क्षिपेत् ।

पूर्ण हुई । अब जन्मकल्याणककी स्थापना कहते हैं । "देवानां" इत्यादि श्लोक पढ़कर वस्त्रको अलग कर देना ॥ ३२ ॥ "किं तां" इत्यादि दो श्लोक बोलकर जिन भगवानके जन्मकी स्थापना करनेके लिये मूलप्रतिमा तथा अन्य प्रतिष्ठेय प्रतिमाओंके ऊपर पुष्प अक्षतोंको क्षेपण करे ॥ ३३।३४ ॥ पसेवरहित शरीर १ मलरहित शरीर २ सम चतुरस्र

निःस्वेदत्वमनारतं विमलता संस्थानमाद्यं शुभं
तद्वत्संहननं भृशं सुरभिता सौरूप्यमुच्चैः परम् ।
सौलक्षण्यमनंतवीर्यमुदितिः पथ्याप्रियासृक्य यः
शुभ्रं चातिशया दशेह सहजाः संत्वर्हदंगानुगाः ॥ ३५ ॥

सनवव्यंजनशतैरष्टाग्रशतलक्षणैः । विचित्रं जगदानंदि याज्जिनांगं तदस्त्विदं ॥ ३६ ॥

सहजदशातिशयस्थापनार्थं प्रतिमोपरि दशपुष्पीमावपेत् ।

भृंगाराब्दातपत्रोज्ज्वलचमररुहाण्युद्वहंत्योष्टशो या
द्वात्रिंशद्दिक्कुमार्यो जिनजनुषि भजंत्यंबिकायाश्चतस्रः ।

संस्थान ३ वज्रवृषभनाराच संहनन ४ सुगंधमय शरीर ५ अत्यंत सुंदर शरीर ६ शुभ एक हजार आठ लक्षणवाला शरीर ७ अतुल बल ८ हितमित वचन ९ दूधके समान सफेद लोहू १० ये दश अतिशय जन्मके साथ स्वभावसे ही उत्पन्न होते हैं ॥ ३५ ॥ जिनेंद्रका शरीर नौसौ व्यंजन और एकसौ आठ लक्षण सहित होता है वह यही है ॥ ३६ ॥ ऐसा कहकर स्वभावसे उत्पन्न दश अतिशयोंकी स्थापनाकेलिये प्रतिमाके ऊपर दस पुष्प रखे । "भृंगारा" इत्यादि तथा " ओं रुचक " इत्यादि कहकर भद्रासनपर विराजमान प्रतिमाके चारों तरफ कुंकुसे रंगे हुए पुष्प अक्षतोंको बखेरै ॥३७॥ यह विजयादि देवताओंका सत्कार स्थापन

गेहं विद्युत्कुमार्यो रुचकवरनगाग्रास्पदा द्योतयंते
या चाष्टौ जातकर्मा दधाति तदनुगास्ताः स्फुरंत्वत्र धरन्याः ॥ ३७ ॥

ओं रुचकवरागिरींद्राशिखरानिवासिन्यो विजयादिदेव्यो यथास्वमर्हत्प्रभुमिहेदानीं परिचरंत्विति स्वाहा । पीठस्थप्रतिमां सर्वतः कुंकुमरंजितपुष्पाक्षतं विकिरेत् । विजयादिदैवतोपास्तिस्थापनं ।

दिव्यद्रव्यविशुद्ध एव जठरे यो रत्नवृष्टिं क्षण—
प्रीतायाः पयसीव पद्मयमवसन्मातुः स्वयं शुद्धिमान् ।
यन्नामापि विशुद्धयेस्ति जगतो ध्यायंति यं योगिन—
स्तस्याप्याकरशुद्धिमेप विधिरित्यातन्वतां देवताः ॥ ३८ ॥

आकरशुद्धिविधानख्यापनार्थं तीर्थोदकाप्लुतपुष्पाणि प्रतिमोपरि निदध्यात् ।

घंटासिंहासनकजलरुहां निःस्वनैरदेयोस्त्रै—
ज्ञात्वातुल्यजिनजनिमुपेत्योच्चकैः स्वस्वभूत्या ।

किया । " दिव्य " इत्यादि श्लोक पढकर आकरशुद्धिकी विधि दिखलनेकेलिए तीर्थ जलसे धोयें हुए पुष्पोंको प्रतिमाके ऊपर क्षेपण करे ॥ ३८ ॥ " घंटा " इत्यादि श्लोक बोलकर इंद्र और यजमान आदिकोंके ऊपर उन अमुक नामवाले इंद्रादि भावोंको स्थापनकेलिए सौधर्म प्रतिष्ठाचार्य पुष्प और अक्षतोंको क्षेपण करे ॥ ३९ ॥ उसके वाद " अयं "

कल्पज्योतिर्वनभवनगीर्वाणनाथाः स्वयं यत्
तत्कल्याणं यथुरभिनयत्यत्रतं नाम तेमी ॥ ३९ ॥

इंद्रयजमानादिषु तत्तदिंद्रादिभावस्थापनाय सौधर्मः पुष्पाक्षतं क्षिपेत् ।

अयं शच्या गुप्तं कृतवति नुतिं छद्मशयना—
न्निमील्यांबा मायातनयमुपहृत्यार्हति ते ।
समागत्यश्च्यादित्रजमनुव्रजंत्याक्षिकरणीः
शिरो निधानाद्यैः सफलयति सेंद्रोभ्रगगजः ॥ ४० ॥

इंद्राण्या भद्रासनादुद्धृत्य समर्थमाणां प्रतिमां जय जयेति वदन् प्रणतिशिराः करकमलाभ्यां गृहीत्वा सर्वसंघसमन्वित इमानि वृत्तानि पठन्नुत्तरवेदीं नीत्वा जन्माभिषेकोत्सवाय स्नपनपीठे निवेशयेत् ।

यः श्रीमदैरावणवाहनेन निवेशितोंके विधृतातपत्रः ।
ईशानशक्रेण सनत्कुमारमाहेंद्रसच्चामरवीज्यमानः ॥ ४१ ॥

इत्यादि श्लोक बोलकर इंद्राणी भद्रासनसे प्रतिमाको उठाकर जय जय शब्द करती हुई मस्तक नवाकर हस्तकमलोंपर रखती हुई सब जनसंघके साथ आगे कहे जानेवाले श्लोकोंको पढती हुई उत्तर वेदीपर ले जाकर जन्माभिषेक उत्सव करनेके लिए स्नान करनेके आसनपर रखे ॥ ४० ॥ फिर “ यः श्री ” इत्यादि आठ श्लोकोंको तथा “ ओं ह्रीं ” इत्यादिको

शच्यादिभिः श्र्यादिभिरप्युदारं देवीभिरात्तोज्ज्वलमंगलाभिः ।
पुरस्सरंतीभिरिवाप्सरोभिरग्रे नटंतीभिरुपास्यमानः ॥ ४२ ॥
शेषैस्तु शक्रैर्जय जीव नंद प्रसीद श्वश्वत्प्रतप क्षिपारीन् ।
इत्यादि वागुल्वणितप्रमोदैर्मुहुः प्रसूनैरुपहार्यमाणः ॥ ४३ ॥
सुरैः स्फुटास्फोटितगीतनृत्यवादित्रहास्योद्धुतवालितानि ।
समंगलाशीर्धवलस्तुतीनि स्वैरं सृजद्भिः परिचार्यमाणा ॥ ४४ ॥
अहो प्रभावस्तपसां सुदूरमपि व्रजित्वा प्रतिमास्त्रपीक्ष्यः ।
यः सैष साक्षाद्ध्रुवमीक्षितोर्हन्नभेद्यनादिः स्वयमात्मवंधः ॥ ४५ ॥
सविस्मयानंदमिति ब्रुवाणैरालोक्यमानोभिमुखागतैः खे ।
देवार्षिभिः स्पर्धितदेवयुग्मं नभोगयुग्मैरपि सेव्यमानः ॥ ४६ ॥
प्रदक्षिणाध्वव्रजनेन नीत्वा पूर्वोत्तरस्यां दिशि मेरुशृंगम् ।
निवेश्य तत्रत्यशिलोग्रपीठे क्षीरोदनीरैः स्नापितः सुरेन्द्रैः ॥ ४७ ॥
तं देवदेवं जिनमद्य जातं शय्यास्थितं लोकपितामहत्वम् ।
इमं निवेश्योत्तरवेदिपीठे प्राग्वत्क्रमस्मिन् विधिनाभिषिंचे ॥ ४८ ॥

बोलकर पांडुकशिलाके ऊपर सिंहासनपर विराजमान करे ॥ ४१।४२।४३।४४।४५।४६।४७।
४८ ॥ उसके बाद आकर शुद्धिके अभिषेक स्वरूप जन्मभिषेकको दिखलाते हैं । "रत्न"

ओं ह्रीं अर्हं श्रीधर्मतीर्थाधिनाथ भगवान्निह पांडुकाशिलापीठे तिष्ठ तिष्ठेति स्वाहा । उत्तरवेदिकास्नपनपीठे प्रतिमानिवेशनमंत्रः। अथातः आकरशुद्ध्यभिषेकरूपेण जन्माभिषेकमनुक्रमिष्यामः।

रत्नस्वर्णमयोत्तरीयरसनासंव्यानमौलिप्रभै—
मेरुर्भाति वनैः सहस्ररहितं यो योजनान्युच्छ्रितः ।
लक्षं सोयमियं च पांडुकशिला दीर्घा शतं स्फाटिकी
साष्टौ चार्धशतं तात्र सुरभिः श्रेष्टार्द्धचंद्राकृतिः ॥ ४९ ॥
सोत्रायं पृथुमंडपोप्युपकृतो देव्योर्घहस्ता इमा—
स्तास्तान्याप्सरसाममूनि नटितान्यास्येतता योजनम् ।
निम्नाश्चाष्ट सुरैः पयोर्णवजलैर्भृत्वार्णमाणा इमे
ते कुंभाः स जिनोऽयमस्मि स हरिस्तत्काप्यहो संभृतिः ॥ ५० ॥

अभिषेकप्रकरणसज्जीकरणाय समंतात्पुष्पाक्षतं विकिरेत् । प्रस्तावना । ओं ऋषभादिदिव्यदेहाय सद्योजाताय महाप्रज्ञाय अनंतचतुष्टयाय परमसुखप्रतिष्ठिताय निर्मलाय स्वयंभुवे अजरामरपदप्राप्ताय चतुर्मुखपरमेष्टिने अर्हते त्रैलोक्यनाथाय त्रैलोक्यपूज्याय अष्टदिव्यनागप्रपूजिताय देवाधिदे-

---

इत्यादि दो श्लोक कहकर अभिषेक आरंभकी तयारी करनेके लिये चारों तरफ पुष्प अक्षत बखेरे ॥ ४९।५० ॥ " ओं ऋषभा " इत्यादि " स्वाहा " तक मंत्र बोलकर प्रतिमाके अंग

वार्ये परमार्थसन्निहितोस्मि स्वाहा । अनेन प्रतिमाया अंगप्रत्यंगानि परमामृशन् सप्तवारानभिमंत्र्य सकलीं कुर्यात् । ततो दशापि लोकपालानावाहनादिविधिनोपचरेत् । तथाहि ।

इंद्रा मिथाद्धदेवा शरपतिवरुणाधाररे देशनाग्रे धिष्णोशा दिशु वेद्या ? ॥५१॥

इंद्रादिदिक्पालानामावाहनादिपुरस्सराघ्यंपणाय समस्तहव्यद्रव्यं जुहोमीति स्वाहा ।

अथ पृथगिष्टिः ।

दिगीशाः शब्दये युष्मानायात सपरिच्छदाः । अत्रोपविशतैतान्वो यजे प्रत्येकमादरात्॥५२॥

दिक्षु पुष्पाक्षतं क्षिपेत् । अत्र रूप्याद्रिस्पर्द्धीत्यादि वृत्ताष्टकं प्रागुक्तमेव वक्ष्यमाणमंत्रोपेतं प्रयुंजीत । तथाहि ।

उपांगोंको छूकर सातवार मंत्रितकर सकलीकरण क्रिया करे । उसके बाद दश लोकपालोंका आवाहन आदि विधिसे सत्कार करे । वह इस तरहसे है–" इंद्रा " इत्यादि तथा " इंद्रादि " बोलकर हवन करनेकी सामग्रीसे अवाहनादि पूर्वक इंद्रादिका सत्कार करे ॥ ५१ ॥ अब वेदीपूजा कहते हैं । " दिगीशा " इत्यादि श्लोक बोलकर दिशाओंमें पुष्प अक्षत क्षेपण करे ॥ ५२ ॥ यहांपर " रूप्याद्रि " इत्यादि पहले कहे हुए आठ श्लोकोंका मंत्र पूर्वक प्रयोग करे । वह इस प्रकार है । " रूप्याद्रि " इत्यादि तथा " हे इंद्र " इत्यादि

रूप्याद्रि.............................. ॥ ५३ ॥

हे इंद्र आगच्छागच्छ इंद्राय स्वाहा, इंद्रपरिजनाय स्वाहा, इंद्रानुचराय स्वाहा, अग्नये स्वाहा, अनिलाय स्वाहा, वरुणाय स्वाहा, सौमाय स्वाहा, प्रजापतये स्वाहा ओं स्वाहा भूः स्वाहा स्वः स्वाहा, ओं इंद्राय स्वगणपरिवृताय इदमर्घ्यं पाद्यं गंधं पुष्पं दीपं धूपं चरुं वलिं स्वस्तिकं यज्ञ-भागं च यजामहे प्रतिगृह्यतां प्रतिगृह्यतामिति स्वाहा ।

रुक्मारु.............................. ॥ ५४ ॥

हे अग्ने आगच्छगच्छ अग्नये स्वाहा............ ।

कल्पांताः.............................. ॥ ५५ ॥

हे यम आगच्छागच्छ यमाय स्वाहा............ ।

आरूढं.............................. ॥ ५६ ॥

हे नैऋत्य आगच्छागच्छ नैऋत्या स्वाहा.......... ।

मंत्र बोलकर इंद्रको जल आदि अष्ट द्रव्य चढावे ॥ ५३ ॥ "रुक्मारु" इत्यादि तथा "हे अग्ने" इत्यादि बोलकर अग्निकुमारदेवोंको जल आदि द्रव्य चढावे ॥ ५४ ॥ "कल्पांता" इत्यादि तथा "हे यम" इत्यादि बोलकर यमदेवको जल आदि चढावे ॥ ५५ ॥ "आरूढं" इत्यादि तथा "हे नैर्ऋत्य" इत्यादि बोलकर नैर्ऋत्य दिक्पालको अर्घ चढावे ॥ ५६ ॥

नित्यांभ .... ॥ ५७ ॥

हे वरुण आगच्छागच्छ वरुणाय स्वाहा.................... ।

वलाच्छ.. ॥ ५८ ॥

हे पवन आगच्छागच्छा पवनाय स्वाहा.................... ।

हंसौघे.. ॥ ५९ ॥

हे धनदागच्छागच्छ धनदाय स्वाहा........................ ।

साञ्नावा.. ॥ ६० ॥

हे ईशान आगच्छागच्छ ईशानाय स्वाहा.................. ।

वक्षौजस्तर्जिपृष्ठश्वसनसमतरः कूर्मराजाधिरूढं

क्षुद्रछीवेभकुंभाक्रमणचणसृणिस्फारणव्यग्रपाणिम् ।

"नित्यांभ" इत्यादि श्लोक तथा "हे वरुण" बोलकर वरुणको जल आदि द्रव्य चढावे ॥ ५७ ॥ "वलाच्छं" इत्यादि तथा "हे पवन" इत्यादि बोलकर पवन कुमारको जल आदि द्रव्य चढावे ॥ ५८ ॥ "हंसौघे" इत्यादि तथा "हे धनद" इत्यादि बोलकर कुवेरको अर्घ चढावे ॥ ५९ ॥ "साञावा" इत्यादि तथा "हे ईशान" इत्यादि बोलकर ईशानको जलआदि आठ द्रव्य चढावे ॥ ६० ॥ "वक्षौज" इत्यादि तथा "हे धरणेंद्र"

सांश्लिष्टं दृक्सहस्राद्वितयघृणिफणारत्नरुक्त्वाल-
व्रश्लौघापीडमर्हंच्छ्रितमहि यमधौर्चामि पद्मासमेतम् ॥ ६१ ॥

हे धरणेंद्र आगच्छागच्छ धरणेंद्राय स्वाहा........................ ।

वैरिस्तंवेरमास्रोल्लसदरुणसटाटोपशुभ्रांगभीक्—
द्रालेंदुस्पर्द्धिदंष्ट्रोत्क्रमखरनखरारक्तदृक् सिंहसंस्थम् ।
कुंतास्त्रं रोहिणीष्टं कुवलयसुमनः स्रक् श्रितां शंभयुक्तं
ज्योत्स्ना पीयूषवर्षं यज यजनपरं सोममर्घं महामि ॥ ६२ ॥

हे सोम आगच्छागच्छ सोमाय स्वाहा............................. ।

एवं सत्कृत्य दिक्पालानेभ्यो मंत्रैः पुनर्ददे । अप्कुंडे सप्तशः सप्तधान्यमुष्टिभिराहुतिः ॥६३॥

ओं आं क्रौं इंद्राय स्वाहा । अनेन जलपूर्णकुंडे सप्तमे सप्तधान्यमुष्टिभिरिंद्राहुतिं दद्यात् ।

इत्यादि बोलकर धरणेंद्रको अर्घ चढावे ॥ ६१ ॥ " वैरिस्तं " इत्यादि तथा " हे सोम " इत्यादि बोलकर सोम दिक्पालको जलआदि अष्ट द्रव्य चढावे ॥ ६२ ॥ " एवं " इत्यादि तथा " ओं आं " इत्यादि बोलकर जलसे भरे हुए कुंडमें सातवार सात धान्योंकी मुठी भरकर आहुतियां दे ॥ ६३ ॥ इसीतरह अग्नि आदिके कुंडमेंभी जानना । उसके बाद फिर

एवमन्यादिभ्योपि । अथ पुनस्तामेव प्रतिमां जिनमंत्रेण सप्तवारानाभिमंत्र्याकरशुद्धिं विदध्यात् । जिनमंत्रो यथा । ओं अर्हद्भ्यो नमः, पादानुसारिभ्यो नमः, कोष्ठबुद्धिभ्यो नमः, बीजबुद्धिभ्यो नमः । सावधानिभ्यो नमः,परमावधिभ्यो नमः, ओं ह्रौं वल्गु २ निवल्गु २ महाश्रवण । ओं ऋषभादिवर्धमानेभ्यो वषट् वौषट् स्वाहा ॥ अथाभिषेकः ।

पूरं पूरमयस्तदावाधिपयः सिंधोपसृत्यामरै—
र्हस्ताहस्तिकयार्पितैर्गलल्लुलन्मुक्ताफलस्रग्भरैः ।
श्रीखंडद्रवचर्चितैः परिदिनश्रीकर्मणा भर्मणात्
कृष्णैः साष्टसहस्रमानकलितैः कुंभैः सिताब्जाननैः ॥ ६४ ॥
आतोद्यध्वनिगीतमंगलरवैः सहर्षहर्षप्लुतां
देवानां नटदप्सरोगणवपुः श्रीभिश्च कीर्णांबरे ।
पार्श्वेन्द्रासनभासि पांडुकशिलासिंहासने प्राङ्मुखं
सौधर्मप्रमुखा निवेश्य जिनपं जन्मन्यासिंचत् किल ॥ ६५ ॥

उसी प्रतिमाको जिनमंत्रसे सातवार मंत्रित करके आकरशुद्धि करे । वह जिनमंत्र " ओं अर्हं " यहांसे लेकर " स्वाहा " तक है ॥ अब अभिषेक वर्णन करते हैं । " पूरं " इत्यादि तीन श्लोक पढकर कलशोंपर पुष्प अक्षत और जलको क्षेपण करे ॥६४।६५।६६॥ "गोवृषं"

धूलीपल्लवमंगलौषधिफलत्वग्मूलसर्वौषधी
संपृक्ताखिलतीर्थवारिसुभृतैर्मंत्रातिपूतैः कुटैः ।
अष्टाभिः स्वपदे स्थितं स्थिर मुदा वेद्यांचलं चारु तद्
बिंबं चाकरशुद्धिसेचनमिदं तज्जातकर्मार्पये ॥ ६६ ॥
एतत्रयं पठित्वा कलशेषु पुष्पाक्षतोदकं क्षिपेत् ।
गोवृंदशृंगतो गजपतेर्दंतान्महातीर्थतः
शैलेंद्रा नृपतोरणादुरुसरित्तीराच्च पद्माकरात् ।
आनीताभिरुपस्कृतेन शुचिभिर्मृद्भिः सुतीर्थांभसा
पूर्णेन स्नपयामि हेमकलशेनार्च्यां जिनार्चां मुदा ॥ ६७ ॥
शिल्प्यादीन् संमान्य सूत्रधारेण धूलीकलशाभिषेकः । कुल्याभिषेकः ।
कुल्याभिः शुचिभिः सतोः स्वसुरपो पित्रोश्च पत्यात्मजैः
संयुक्ताभिरशल्पिकाभिरनिशं सक्ताभिरर्हन्मते ।

इत्यादि बोलकर कारीगर आदिका सत्कार करके शुद्धवालू आदिसे अभिषेक करे ॥ ६७ ॥ " कुल्याभिः " इत्यादि बोलकर उत्तम कुलकी स्त्रियोंसे प्रोक्षण (जलसे अभिषेक) करावे ॥ ६८ ॥ इन्हीं स्त्रियोंसे प्रतिमा योग्य उवटना करावे । वेल, ऊमर, चंपा, आम, वकुल,

सिद्धार्थाक्षतसत्फलोद्गमनिशादूर्वादिमैत्रीयुषा
काडमुखोद्धृतेन जिनपं संप्रोक्षयामि श्रियै ॥ ६८ ॥

प्रोक्षणकप्रणयनम् । एताभिरेव च स्त्रीभिः प्रतिष्ठायोग्यमूलादिवर्तनं कारयेत् ।

बिल्वोदुंबरचंपकाम्रबकुलन्यग्रोधनीपार्जुन—
प्लक्षाशोकपलाशपिप्पलदलप्रच्छादितश्रीमुखैः ।
पुण्याशोष्यसरित्तडागसरसीपूर्वोक्ततीर्थाम्बुभिः
पूर्णैः पूर्णमनोरथैरिव कुटैः कुर्वे निषेकं विभोः ॥ ६९ ॥

ओं णमो अरहंताणं सव्वसरीरावच्छिदे महाभूप आय २ गिण्ह २ स्वाहा । एष मंत्र उत्तरत्रापि योज्यः । द्वादशपल्लवाभिषेकः ।

दूर्वापद्मकदनागुरुयवश्रीखंडवर्हिस्तिलै—
र्नंद्यावर्तकजातिकुंदकुसुमैः स्वर्णार्जुनव्रीहिभिः ।
भूम्यप्राप्तपवित्रगोमयनदीकूलोद्यमृद्रोचना—
सिद्धार्थैश्च समं भृतैः सुपयसा कुंभैः प्रभुं स्नापये ॥ ७० ॥

वड़, कदंब, अर्जुन, पाकर, अशोक, ढाक, पीपल इन बारह वृक्षोंके पत्तोंसे ढके हुए जलके कलशोंसे "ओं णमो" इत्यादि मंत्र बोलकर अभिषेक करे ॥ ६९ ॥ यह द्वादश पल्लवका

अष्टादशमंगलद्रव्याभिषेकः ।

श्यामाशमींदीवरभृंगविष्णुक्रांतागुडूची सह देविकाभिः ।
मिश्रैः पवित्रैः सलिलैः सुपूर्णरौप्यैर्जिनार्चां स्नपयामि कुंभैः ॥ ७१ ॥

सप्तौषधस्नपनम् ।

लवंगभल्लातकविल्वजातीफलाम्रकाम्रामलवारिपूर्णैः ।
शुभ्रैर्घटैरिष्टफलाप्तिहेतोः संस्नापये स्नातकनाथबिंबम् ॥ ७२ ॥

फलपंचकस्नपनम् ।

उदुम्बराश्वत्थशमीपलाशन्यग्रोधकल्कव्यातिकीर्णमर्णः ।
तैर्थं वहद्भिः कलशैर्वलक्षैर्भक्त्याभिषिंचामि जिनेंद्रमूर्तिम् ॥ ७३ ॥

अभिषेक हुआ । " दूर्वा " आदि बोलकर दूब आदि अठारह मंगलीक वस्तुओंसे मिले हुए जलके घड़ोंसे अभिषेक करे ॥ ७० ॥ यह मंगल द्रव्याभिषेक हुआ । " श्यामा " इत्यादि बोलकर उसमें कथित श्यामा आदि सात वनस्पतियोंसे मिले हुए जलपूर्णकलशोंसे अभिषेक करे ॥ ७१ ॥ " लवंग " इत्यादि बोलकर उसमें कहे हुए लवंग, भल्लातक, बेल, जायफल, आम-इन पांच उत्तम फलोंसे मिश्रित निर्मल जलसे भरे हुए घड़ोंसे प्रतिमाका अभिषेक करे ॥ ७२ ॥ यह फलपंचक स्नपन हुआ ॥ " उदुंबरा " इत्यादि बोलकर उसमें कथित

वल्लिपंचकस्नपनम् ।

> व्याघ्री गुडूची सहदेवि सिंही वरी कुमारी शतमूलिकानाम् ।
> मूलैर्बलायाश्च युतेन सर्वैः कुंभांभसाहं स्नपये जिनार्चाम् ॥ ७४ ॥

दिव्यौषधिमूलाष्टकस्नपनम् ।

> कत्कूलैला जातिपत्रलवंगश्रीखंडोग्रा कुष्ठसिद्धार्थमध्या ।
> सर्वौषध्यावासितैस्तीर्थतोयैः कुंभोद्गीर्णैः स्नापयाम्यर्हदर्चाम् ॥ ७५ ॥

सर्वौषधिस्नपनम् । एवं जन्माभिषेकस्थानीयमाकरशुद्ध्यभिषेकं विधायानेन मंत्रेण जिनार्चामधिवासयेत् । ओं णमो भयवदो वड्ढमाणस्स रिस्सहस्स जस्स चक्कुजलंतं गच्छइ आयासं पायालं लोयाणं भूयाणं जूए वा विवादे वा रणांगणे वा गयंगणे वा थंभणे वा मोहणे वा सव्वजीवसत्ताणं अपराजिदो भवदु मे रक्ख रक्ख रक्ख स्वाहा । श्रीवर्धमानमंत्रः ।

ऊमर, पीपल, शमी, ढाक, वड़–इन पांचोंकी छालसे मिश्रित जलसे पूर्ण कलशोंसे स्नपन करे ॥ ७३ ॥ “ व्याघ्री ” इत्यादि बोलकर उसमें कथित व्याघ्री (एरंड) गिलोइ, आदि आठ उत्तम औषधियोंके मूलसे मिश्रित जलसे पूर्ण कलशोंसे अभिषेक करे ॥ ७४ ॥ “ कत्कूलै ” इत्यादि बोलकर उसमें कही गई औषधियोंसे मिश्रित जलसे पूर्ण कलशोंसे

यस्योन्मील्य निसर्गजे श्रवणयोर्वज्रेण रंध्रे हरिः
शच्यासेचनकं वपुस्त्रिजगतां भक्त्याभिसंस्कारयेत् ।
त्रैवर्ण्योज्ज्वलसूत्रदृब्धयवमात्सिद्धार्थरत्नाश्रिय—
श्चर्चा चारुभुजेस्य भूषणमयं बध्नंतु ताः कंकणम् ॥ ७६ ॥

इंद्रकरहीरकक्तकर्णवेधादनंतरं प्रोक्षणकाधिकृतनारीभिर्जात्यकुंकुमश्रीखंडागरुकर्पूरचर्चनपूर्वकं दक्षिणभुजे षोडशाभरणात्मककंकणविधानम् ।

गृह्णंति यस्य समयामृतधौतचित्ता नामानि कोटिमृषयः कलुषक्षयाय ।
मेरौ महेंद्र इव संव्यवहारहेतोस्तं व्याहरेहमिह यष्टमतेन नाम्ना ॥ ७७ ॥

अभिषेक करे । यह सर्वौषधिस्नपन विधि हुई ॥ ७५ ॥ इसीप्रकार जन्माभिषेकके स्थानरूप आकार शुद्धिका भी अभिषेक करके आगे कहे जानेवाले मंत्रसे जिन प्रतिमाका संस्कार करे ॥ " ओं णमो " इत्यादि " स्वाहा " तक श्रीवर्धमानमंत्र है । " यस्यो " इत्यादि बोलकर कर्णवेध करके स्त्रियोंसे केशर चंदन अगुरु कपूरकर लेप किये गये सोलह आभूषणोंके साथ दाहिनी भुजाकी तरफ कंकण बांधे ॥ ७६ ॥ " गृह्णंति " इत्यादि बोलकर प्रभुका नाम रखनेके लिये कुंकुसे रंगे हुए पुष्प अक्षतोंको प्रतिमाके ऊपर क्षेपण करे ॥७७॥

नामकरणार्थं कुंकुमाक्तपुष्पाक्षतं प्रतिमोपरि क्षिपेत् । अथानंदस्तवः ।

जय देव प्रसिद्धेन स्वनाम्ना गां पुनीहि मे । जय शुद्ध नय स्वांतं स्वभक्त्या मेऽनुरंजय ७८
जय दिव्यांगगात्राणि स्वनत्या मे कृतार्थय । जय तेजोनिधे स्वामिन् नेत्राब्जे मे विनिद्रय ७९
यद्दर्शनविशुद्ध्यादिभावना दैवतं विभो । तपस्तप्त्वा जगज्ज्योतिस्तज्ज्योतिस्ते तानिण्यति ८०
यात्वयज्ञा हतैः पुण्यैस्तद्रागद्वारसंगतैः । त्वयि प्रयुज्यते कोपाल्लक्ष्मीस्तान्येव हंति सा॥८१॥
सा चेयं च विभूतिस्ते कापीश जगतां दृशः। लब्ध्वा विशुद्ध्या तद्वृद्ध्या स्वस्याह्नान्वयशुद्धताम्॥
भुंजानोभ्युदयं चार्हन् जनैर्भोगीव लक्ष्यते । बुधैर्योगीव तत्त्वं तु जानाति त्वादृगेव ते॥८३॥
नमस्तेऽचिंत्यचरित नमस्ते त्रिजगद्गुरो । नमस्ते त्रिजगन्नाथ नमस्तेत्यंतानिस्पृह ॥ ८४ ॥
नमस्ते केवलज्ञान नमस्ते केवलेक्षण । नमस्ते परमानंद नमस्तेऽनंतविक्रम ॥ ८५ ॥
एवमानंदतः स्तुत्वा शक्रः पूर्ववदादरात् । जन्माभिषेककल्याणक्रियां कृत्वा स्फुटं नटेत् ॥८६॥

उसके बाद आनंदस्तुतिका पाठ "जय देव" इत्यादिसे लेकर पचासीवें श्लोकतक पढे ॥७८॥ ७९।८०।८१।८२।८३।८४।८५॥ इसप्रकार वह इंद्र आनंदसे भक्तिपूर्वक स्तुतिकरके और जन्माभिषेक कल्याणकी क्रिया करके अच्छीतरह तांडवनृत्य करे ॥ ८६ ॥ यह जन्माभिषेककी

इति जन्माभिषेकविधानम् ।

अथोद्धृत्य निजस्कंधे तामर्हत्प्रतिमां मुदा । आरोप्य व्यंजयन्निंद्रस्तमैंद्रं परमोत्सवम् ॥८७॥
संधेन महता युक्तः प्राप्य तां मूलवेदिकाम् । त्रिःपरीत्य पठन्मंत्रमिमं न्यस्येत्तदासने ॥८८॥

ओं " एतद्राजांगणं तत्सुरकृतसुपमं सिंहपीठं तदेतत्
देवोयं जातकर्मोद्यत इयममरीसेव्यमाना प्रबोध्य ।
देवी साचोपनीता प्रमदवरवशा सेवमानास्तथैते
देवाः सर्वेर्हतीमं परिकरमयमेवेत्यमुं स्थापयेऽस्मिन् ॥ ८९ ॥

ओं नमोर्हते केवलिने परमयोगिने अनंतविशुद्धपरिणामपरिस्फुरच्छुक्लध्यानाग्निनिर्दग्धकर्मबीजाय प्राप्तानंतचतुष्टयाय सौम्याय शांताय मंगलाय वरदाय अष्टादशदोषरहिताय स्वाहा । मूलवेदीमध्यस्थापितभद्रासने प्रतिमानिवेशनमंत्रः । अथ जिनमातृस्नपनम् ।

विधि हुई । उसके बाद इंद्र उस अर्हत्प्रभुकी प्रतिमाको हर्षके साथ अपने कंधेपर रख परम उत्सवको दिखाता हुआ बहुत साधर्मियों सहित उस मूलवेदीमें लेजाकर तीन परिक्रमा देके इस आगे कहे जानेवाले मंत्रको पढता हुआ उस सिंहासन पर विराजमान करे ॥८७॥८८॥ वह मंत्र " ओं एतद्रा " इत्यादि श्लोकसे लेकर स्वाहा तक है । इससे मूलवेदीके भद्रासनपर

अंव प्रसीद दृशमेषु चतुर्निकायगीर्वाणभर्तृषु निधेहि सनम्रवत्सु।
एतास्वर्पद्रिदयितासु ललाटघृष्टपादाग्रभूषु मुदमुल्वणयस्मितेन ॥ ९० ॥
नित्याश्रियेभ्युदयदुर्मदिनां त्वयीशे त्वज्ज्योतिरेतदपि नः परमक्तवत्याम् ।
कर्मस्विहाभ्युदयिकेषु प्रतीति कोत्र प्राच्याशयोस्तमयपाक्युदयार्कसूतेः ॥९१॥
मग्नाः निमज्जंति जगंत्यमूनि मंक्ष्यंति वा मोहार्णवे कः।
इहोपगृह्णाति भवादृशीदृक् सर्वज्ञवीजं यदि न प्रसूते ॥ ९२ ॥
त्वं कल्याणी त्रिभुवनजनन्येकमूरव्यासि त्वं
कीर्तिज्योत्स्नां किरयति सदा क्षालयंती जगत्ते ।
स्त्रीसर्गेग्रे गणयति शिवांगेष्वपि स्वं त्वमेव
त्वत्पूताः स्मो नियतमधुना विश्वमान्ये नमस्ते ॥ ९३ ॥
पीठिकायां कुंकुमाक्तकुसुमानि क्षिप्त्वा प्रणमेत् ।

जिनदेवीं जिनाभ्यर्णां स्तुत्वा दिव्यांवरादिभिः। प्रसाद्यानंदनाट्येन स्वयं चाराध्य तं पुनः ९४

प्रतिमाको रखा जाता है ॥ ८९ ॥ अब जिनमाताके अभिषेककी विधि कहते हैं– " अंव प्रसीद " इत्यादिसे लेकर तिरानवै तक श्लोक बोलकर वेदीमें कुंकुमसे मिले हुए फूलोंको डालकर प्रणाम करे ॥९०।९१।९२।९३॥ उसके वाद जिनदेवीको उत्तम वस्त्रादिसे पूज तथा

रक्षायां तस्य दिग्नाथान् देवताः परिकर्मणि । भोगसंपादने श्रीदं क्रीडने शक्रपुत्रकान् ९५
अंगुष्ठे चामृतं स्तन्यलौल्यच्छेदाय वासवः । यद्वदस्थापयत्तद्वदर्चायां स्थापयाम्यहम् ॥९६॥

दिव्यवस्त्रगंधभूषणस्वस्तिकशाल्यक्षीरान्नविचित्र-भक्ष्यपक्वान्नदुग्धदधिघृतशर्कराचारुपुष्पफलपत्र-दीपधूपादि भोज्यवस्तुजातं कांचनभाजने विरचय्य शिलायां निवेशयेत् ।

सिद्धयुद्वाह महोत्सुकोपि तदलंकर्माणकालाप्तये
निर्ग्रंथं परपर्वनृत्यविधिना धर्मेण शासद्धराम् ।
यः सम्राडिति लक्ष्यते त्रिजगतीनाथोसतीवेश्वरं
यो भक्तेति कुमार एव च भजन् भोगान्यसाम्यत्र तम् ॥ ९७ ॥

स्तुतिकर प्रभुकी रक्षाके लिये दिक्पालोंको, देवताओंको सेवाके लिये, भोगादि सामग्रीके लिये कुवेरको, खेलनेकेलिये इंद्रपुत्रोंको, दूध पीनेकी लालसाको दूर करनेकेलिये अंगूठेमें अमृतको जैसे पहले इंद्रने प्रभुके पास रखा था उसी तरह मैं भी इस प्रभुकी प्रतिमाके सामने स्थापित करता हूं ॥ ९४।९५।९६ ॥ ऐसा कहकर उत्तम वस्त्र सुगंधित पदार्थ आभूषण (गहने) सातिया खीर अनेक पकान्न दूध दही घी मिश्री उत्तम फूल फल पत्ते दीप धूप आदि भोगोंकी सामग्री सोनेके पात्रमें रखकर शिलापर रखे । " सिद्धयु " इत्यादि बोलकर पुण्यके उदयसे प्राप्त राज्य संपदा आदि उपभोगोंकी स्थापना करनेके

पुण्यविपाकसंपादितसौराज्यसंपदुपभोगस्थापनाय कुंकुमारुणितपुष्पाणि प्रतिमोपरि विकिरेत् ।

एवं वैषयिकैः सुखैः सुरनराधीशामपि पार्थितैः
शश्वत्तीतमनाः सुराधिपनृपैः राज्ञार्थिभिः सेवितः ।
कालैकक्षपणीयमोहमहिमाव्याधृतिसंसूचक—
प्रेक्षातंकिततीर्थकृच्छिवरतोप्यास्ते द्वितीयाश्रमे ॥ ९८ ॥

देवोपनीतभोगोपभोगानुभवनाय प्रतिमोपरि पुष्पांजलिं क्षिपेत् । इति जन्मकल्याणस्थापना ॥ २ ॥ अथ निष्क्रमणकल्याणं ।

प्राप्ते सामज्वरवदणुता वृत्तमोहे विवेक—
ज्योतिष्युद्यत्यथ किमपि तत्कारणं वीक्ष्य मंक्षु ।
निर्विण्णोर्हत्समरससुधास्वादनोकः सहैत्य
प्रीत्यानत्य सततदुपथीनभ्यनंदत्सुरर्षीन ॥ ९९ ॥

लिये केशरसे रंगे हुए पुष्पोंको प्रतिमाके ऊपर बखेरै ॥ ९७ ॥ "एवं" इत्यादि श्लोक बोलकर देवोंसे लाये गये भोग उपभोगोंका अनुभव दिखानेके लिये प्रतिमाके ऊपर पुष्पोंको क्षेपण करे ॥ ९८ ॥ इस प्रकार जन्मकल्याणकी स्थापना हुई ॥ (२) ॥ अब तपकल्याणकका वर्णन करते हैं । "प्राप्ते" इत्यादि श्लोक बोलकर शमसुखके एक स्वादी होनेकी स्थापनाके

प्रशमसुखैकरासिकत्वस्थापनार्थं जिनोपरि पुष्पांजलिं क्षिपेत् ।

विजयस्व जिनाधीश स्वयंभूरद्य खल्वसि। वाक्ति स्वायंभुवं ज्योतिः शिवप्रस्थानमेव नः१००
दुग्धां कामामियं चित्तं सुद्रव्यादिचतुष्टयी। एनामेवेयमन्वेतु सुष्ठूत्साहोयमेधताम् ॥ १०१ ॥
जृंभतां तत्परं ज्योतिः प्रीयंतां प्राणिनोऽखिलाः। भव्यात्मानः प्रबुध्यंतां छिद्यंतां कर्मशृंखलाः
निर्मलोन्मुद्रितानंतशक्तिचेतयितृत्वतः। ज्ञानं निःसीमशर्मात्मन् विंदन् प्रतपत्पदे ॥ १०३ ॥
इमं विधिं नियोगेन साधर्मप्रणयेन वा। वाचालयेमहि कृत्ये तु त्वादृशो जाग्रयुः स्वयम् १०४
इति स्तुतो शिवोद्योगं लौकांतिकसुरैः सुरैः। कृतनिःक्रमकल्याणं स्थापयाम्यत्र तं प्रभुम् १०५

निःक्रमणकल्याणोपक्रमस्थापनाय चंदनालुलितपुष्पाक्षतं प्रतिमोपरि क्षिपेत् ।

न्यग्रोधो मदगंधि सर्जमुशनश्यामे शिरीषोर्हता-
मेते ते किल नागसर्जजटिनः श्रीतिंदुकः पाटलः ।
जंब्वश्वत्थकपित्थनंदकविठाम्रावंजुलश्चंपको
जीयासु र्बकुलोत्र वांशिकधवौ शालश्च दीक्षाद्रुमाः ॥ १०६ ॥

लिये भगवानके ऊपर पुष्पोंकी अंजलि क्षेपण करे। ९९ ॥ उसके बाद प्रभुके वैराग्य होनेके समय लौकांतिक देवोंकर " विजयस्व " इत्यादि छह श्लोकोंसे स्तुति करना। १००।१०१ १०२।१०३।१०४।१०५ ॥ फिर तपकल्याणका आरंभ स्थापन करनेके लिये चंदनसे मिश्रित

ओं णमो अरहंताणं जिनदीक्षावनवृक्षा अत्रावतरंत्विति स्वाहा । जिनदीक्षावनवृक्षस्थापनाय मूलवेद्या प्रत्याग्निवेशितायाः प्रतिष्ठेयमहाप्रतिमायाः पुरस्तात्पुष्पाणि प्रकिरेत् ।

कल्पांतार्णववीचिविभ्रमनिपानाक्रांतदिकं प्रभुः
शक्रैरेत्य कृता स्तवादिकाविधिः स्वं वर्गमापृच्छ्यमां ।
त्यक्त्वा भूपखगामरोढशिबिकामारुह्य गत्वा वनं
पर्यंकस्य उदग्मुखो नतशिवो वा प्राङ्मुखः प्रव्रजेत् ॥ १०७ ॥
सोयं मुक्तिपुरीं प्रयान् विजयतां स्तादस्य पंथाःशिवो
नंद्यादस्य मनो विशुद्धिरनिशं सैद्धा गुणाः पात्वमुम् ।
क्रोधादिप्रतिरोधिनोस्य सुतपःशस्त्रैः पतंतु क्षताः
संतश्चैनमनारतं परिचरंत्वेतत्पदं प्रेप्सवः ॥ १०८ ॥

पुष्प अक्षतोंको प्रतिमाके ऊपर क्षेपण करे । " न्यग्रोधो " इत्यादि तथा " ओं णमो " इत्यादि बोलकर भगवानके वड़ सप्तपर्ण आदि दीक्षावनवृक्ष स्थापन करनेकेलिये मूलवेदीके पश्चिमकी तरफ स्थापित प्रतिष्ठेय महाप्रतिमाके आगे पुष्पोंको क्षेपण करे ॥ १०६ ॥ " कल्पांता " इत्यादि श्लोक बोलकर मूलवेदकि सिंहासनसे प्रतिमाको उठाकर उत्तम पालकीमें वैठाकर महान उच्छवके साथ लेजाकर पहले स्थापनकिये गये दीक्षावन वृक्षके

एतत्पठन् मूलवेदीपीठात् प्रतिमामुत्क्षिप्य दिव्यशिविकामारोप्य महोत्सवेन नीत्वा पूर्वस्थापितदीक्षावनवृक्षतले निवेशयन्निमं मंत्रं पठेत् । ओं नमो सिद्धाणं भगवान् स्वयंभू रत्न सुनिविष्टो भवत्विति स्वाहा । अनेनैव मंत्रेण शेषप्रतिमास्वपि निष्क्रमणकल्याणस्थापनाय पुष्पाणि क्षिपेत् ।

स्वस्त्यस्मै वनशाखिने हृपदियं स्ताचांद्रकांती मुदे ।
ये दीक्षांगमिनो न्यधान्नम इमान् राज्ञः समं दीक्षितान् ।
शक्रः सतत्स्वधियोधिरत्नपटलौ प्रत्यग्रहीत्तत्कचा-
स्तीर्थेषु प्रतपत्वलं तदुपदा हृक्षोर्णवः पंचमः ॥ १०९ ॥
ममेद्महमस्येति मतिं भित्वार्हतोज्झिताः ।
पुनंतु विश्वस्त्रग्वस्त्रभूषाः संपूजिताः सुरैः ॥ ११० ॥

ओं नमो भगवतेर्हते सद्यः सामायिकप्रपन्नाय कंकणमपनयामीति स्वाहा । कंकणमपनीय दीक्षाविस्थापनाय प्रतिमादिषु पुष्पाणि क्षिपेत् । वनप्रस्थानप्रव्रज्याग्रहणाविस्थापनं ।

नीचे स्थापन करे और उस समय " ओं णमो " इत्यादि स्थापनमंत्र बोले ॥ १०७।१०८ ॥ इसी मंत्रसे अन्य प्रतिमाओंमें भी तपकल्याण स्थापन करनेकेलिये पुष्पोंको क्षेपण करे " स्वस्त्यस्मै " इत्यादि दो श्लोक तथा " ओं नमो " इत्यादि बोलकर कंकणादिको उतार कर दीक्षास्थापनकेलिये प्रतिमाके ऊपर पुष्पोंको क्षेपण करे । इस तरह वनमें जाना,

स्वामीसिद्धप्रभुगुणरतः सर्वसावद्ययोग-
व्यावृत्तात्मा स्खलितविमुखस्तत्क्षणादुद्धतेन ।
तस्मिं बोधत्रय इव मनःपर्ययेणोपगूढो
व्युत्कृष्टांगः स्वरसविलसद्भावनो देदिवीति ॥ १११ ॥

मतिश्रुतावधिमनःपर्ययाख्यसम्यग्ज्ञानचतुष्टयख्यापनाय चतुर्वर्तिदीपावतारणं विदध्यात् ।

अथेंद्राः सिद्धचारित्रयोगशांतिभक्तिभिः। जिननिष्क्रमणकल्याणक्रियां कुर्युः ससूरयः११२

स्वं विंदन् स्वतया परंपरतया तीव्रैस्तपोभिर्भवान्
कृष्ट्वा पाकमवाप कष्ट्यनिशं कर्मांशतः शातयन् ।
आकैवल्यपदाग्रयोत्तरविशुद्ध्युद्धिद्यमानात्मवित्
सांद्रानंदरसं स्वयं पिवति यः सोयं जगत्त्रायताम् ॥ ११३ ॥

दीक्षा ग्रहण करना, केशलोंच करना आदिका स्थापन हुआ ॥ १०९।११० ॥ " स्वामी " इत्यादि बोलकर मतिश्रुत अवधि मनःपर्यय-इन चार ज्ञानोंको वतलानेके लिये चार वत्तियोंवाला दीपक जलावे ॥ १११ ॥ उसके वाद वे इंद्र सिद्ध चारित्र शांति आदि भक्तिको करके भगवानके तपकल्याणकी क्रियाको करें ॥ ११२ ॥ " स्वं विंदन् " इत्यादि बोलकर

विशिष्टतपोनुष्ठानप्रतिष्ठार्थं प्रतिमोपरि पुष्पांजलिं क्षिपेत् ।

ततोर्चां तां पुनर्वेदीं नीत्वा ताभिः सद्यांजसाऽध्यानावतारितजिनां योजयेत् तिलकादिना ११४

एप क्रमश्चलार्चानां विस्तरेण प्ररूपितः। स्थिराणांतु यथास्थाने सर्वमेनं प्रकल्पयेत्॥११५॥

किंच — गर्भावतारादिविधिः समस्तं स्थानस्थिता चाल्याजिनेन्द्रबिंबे ।
संकल्प्य सिंहासनपादपीठमध्येस्य हैमीं निदधे शलाकाम् ॥ ११६ ॥

श्रीपादपीठसिंहपीठयोर्मध्ये सुवर्णशलाकानिवेशनम् । इति निःक्रमणकल्याणस्थापना । अथातस्तिलकदानविधानं । तत्रादौ तावकल्याणपंचकरोपणमनुवर्णयिष्यामः ।

यद्गर्भावतरे गृहे जनयितुः प्रागेव शक्राज्ञया
षण्मासान्नव चानु रत्नकनकं वित्तेश्वरो वर्षति ।

विशेषतपस्या स्थापन करनेकेलिये प्रतिमाके ऊपर पुष्पांजलि क्षेपण करें ॥ ११३ ॥ उसके वाद उस प्रतिमाको वेदीपर लेजाकर तिलकादि क्रियासे युक्त करे ॥ ११४ ॥ यह क्रम चल प्रतिमाओंका विस्तारसे कहा गया है परंतु स्थिर प्रतिमाओंका उसी स्थान पर कल्पना करे ॥ ११५ ॥ "गर्भाव" इत्यादि बोलकर भद्रासनोंके मध्यमें सोनेकी सलाई रक्खे। यह निष्क्रमण कल्याणकी स्थापना हुई ॥ ११६ ॥ अब तिलकदानविधि कहते हैं । उसमें सबसे पहले पांच कल्याणोंका स्थापन कहते हैं। जिस प्रभुके गर्भमें आनेके पहलेही छह

भर्त्तुर्वा माणिगर्भिणी सुरसरिन्नीरोक्षिता पोडश-
स्वप्नेक्षामुदितां भजंति जननीं श्रीदिक्कुमार्योसि सः ॥ ११७ ॥
प्रच्छन्नं जननीमुपास्य शयनादानीय शच्यार्पितं
यं तत्वास चतुर्णिकायविबुधः श्रीमत्करींद्राश्रितः ।
सौधर्मांकनिवेशितं सुरगिरिं नीत्वाभिषिंच्यावया
संयोज्योपचरत्यजस्रमसमैर्भोगैः स भास्येप नः ॥ ११८ ॥
किं कुर्वाण सुरेंद्ररुद्रविषयानंदाद्विरक्तस्तुतो
यो लौकांतिकनाकिभिः शिविकया निःक्रम्य गेहान्महैः ।
दिव्यैः सिद्धनतीद्धयावनतरुं पूत्वा परादीक्षया
भुंक्ते शुद्धनिजात्मसंविदमृतं स त्वं स्फुरस्येप नः ॥ ११९ ॥

महिने तथा आनेके वाद नौ महीने इस तरह पंद्रह महीने इंद्रकी आज्ञासे कुवेरने पिताके घर रत्न आदिकी वर्षा की तथा सोलह उत्तम स्वमोंके देखनेसे हर्षित जिनमाताकी दिक्कुमारियां सेवा करती हुईं ॥ ११७ ॥ जिसके जन्म कल्याणकमें इंद्राणीने माताको निद्रामें मग्न करके प्रभु वालकको लाकर इंद्रको सौंप दिया, फिर उसे ऐरावत हाथीपर विठाके सुमेरु पर ले जाकर इन्द्रादिने अभिषेक किया, उसके वाद राज्यसंपदा आदि भोगोपभोगकी दिव्य सामग्रीसे शोभायमान हुए ॥ ११८ ॥ उसके वाद किसी

सम्यग्दृष्टिकृशाकृशव्रतशुभोत्साहेषु तिष्ठन् क्वचित्
धर्मध्यानबलादयत्नगलिताभायुस्त्रयः सप्त यः ।
दृष्टि प्रभकृती समातपचतुर्जातित्रिनिद्रा द्विधा
श्वभ्रस्थावरसूक्ष्मतिर्यगुभयोद्योतान् कषायाष्टकम् ॥ १२० ॥
क्लैव्यं स्त्रैणमथादिमेन नवमे हास्यादिषट्कं नृतां
क्षित्वोदींच पृथक्क्रुधादिदशमे लोभं कषायाष्टकं ।
निद्रा सप्रचलामुपांत्यसमये दृग्धीमविघ्नाश्चतु-
र्द्विः पंच क्षिपते परेण चरमे शुक्लेन सोऽर्हन्नसि ॥ १२१ ॥

निमित्तको पाकर भोगोंसे वैराग्यरूप हुए, उससमय लौकांतिक देवोंने आकर स्तुति की फिर दिव्य पालकीमें बैठाकर वनमें लेगये वहां पर दीक्षावृक्षके नीचे बैठके प्रभुने सिद्धोंको नमस्कार कर आप ही दीक्षा धारण की, केशलोंच करके ध्यानमें मग्न शुद्ध निजस्वभावामृतका स्वाद लेते हुए। ऐसे प्रभु हमारे कल्याण कर्त्ता हो ॥ ११९ ॥ जिस प्रभुने धर्मध्यान और शुक्लध्यानके बलसे अनायासमें ही गुणस्थान क्रमसे कर्म प्रकृतियोंका क्षय किया। यह क्रम कर्मकांडमें विस्तारसे लिखाहुआ है। विस्तारके भयसे यहां नहीं लिखा। क्षयके क्रमसे चार घातिया कर्मोंका नाशकर केवलज्ञान आदि अनंतच-

र्थव्यंजनमंगगीरापि पृथक्त्वेनापि संक्रामता ।
कर्मांशानव स्थितेन मनसा मोदार्भकोत्साहवत्
कुंठेन द्रुमिवाणुशः परशुना छिंदन् यतिप्वध्यासि ॥ १२२ ॥
क्षुण्णे मोहरिपौ भजन्नुरुयथाख्याताभिराज्याश्रियं
शुद्धस्वात्मनि निर्विचारविलसत्पूर्वोदितार्थश्रुतः ।
स्वच्छंदो छळदुत्कलोज्ज्वळचिदानंदैकभावो लस-
च्छेपारिव्रजवैभवः स्फुटमसि त्वं नाथ निर्ग्रंथराट् ॥ १२३ ॥
विश्वैश्वर्यविघातिघातिदितिजो छेदो गतानंतदृक्
संविद्वीर्यसुखात्मिकां त्रिजगदाकीर्णे सदस्या स्थितः ।
जीवन्मुक्तिमूर्पीद्रचक्रमहितस्तीर्थं चतुस्त्रिंशता
कुर्वाणोतिशयैः पुनात्यपि परान् संप्रातिहार्याष्टकैः ॥ १२४ ॥

उदय पाकर सयोगकेवली हुए। उससमय इंद्रने समवसरणकी रचना की। उसी समय चौंतीस अतिशय आठ प्रतिहार्य तथा पूर्वोक्त अनंतज्ञानादि चार—इसतरह छयालीस गुण मंडित हुए दिव्यध्वनिद्वारा तिर्यंचों आदि जीवोंका कल्याण करते हुए॥ १२०। १२१।१२२ १२३। १२४॥ उसके वाद प्रभुने योगोंको रोककर शुक्लध्यानके वलसे मोक्षअवस्थाके

देवव्यक्तिविशेषसंव्यवहृतिव्यक्त्युल्लसल्लांछन-
श्रीमत्त्वत्क्रमपद्मयुग्मसततोपास्तौ नियुक्तं शुभैः ।
यक्षद्वंद्वमवश्यमेतदुचितैः प्राच्यैरिदानींतनै-
र्देवेंद्रैरपि मान्यते शिवमुदोप्येष्यद्भिरीशिष्यते ॥ १२५ ॥
द्वौ गंधौ रसवर्णबंधनवपुः घातकान् पंचशः
षट् षट् संहननाकृतीः शुभगतिः स्वस्वानुपूर्व्यामुभे ।
खत्रय्ये परघातकागुरुलघूच्छ्वासोपघाता यशो
नादेयं शुभसुस्वरस्थिरयुगैः स्पर्शाष्टकं निर्मितम् ॥ १२६ ॥
त्र्यांगोपांगमपूर्णदुर्भगयुगे प्रत्येक नीचैः कुले
वेद्यं चान्यतरद्द्विसप्ततिमुपांत्ये सूरयोगं क्षणे ।
आदेयं सनिजानुपूर्व्यनृगतिं पंचाक्षयोऽतिशयः
पर्याप्तत्रसबादराणि सुभगं मर्त्यायुरुच्चैः कुलम् ॥ १२७ ॥

अंतके दो समयोंमेंसे पहले समयमें पचासी कर्म प्रकृतियोंमेंसे बहत्तर प्रकृतियोंका क्षय किया और अंतसमयमें अवशेष तेरह प्रकृतियोंका नाशकर कर्मोंसे मुक्त हुए तीनलोकके शिखरपर जा विराजे ॥ १२५ । १२६ । १२७ । १२८ । १२९ ॥ इसप्रकार पूर्वोक्त श्लोकोंको

वेद्येनान्यतरेण तीर्थकृमार अष्टादशाप्यंतिमे
निष्कृत्यप्रकृतीरनुत्तरसमुच्छिन्नाक्रियध्यानतः ।
यः प्राप्तो जगदग्रमेकसमयेनोर्ध्वंगमात्माष्टभिः
सम्यक्त्वादिगुणैर्विभाति स भवानत्रार्थितोच्यांज्जगत् ॥ १२८ ॥
मुक्तिश्रीपरिरंभनिर्भरचिदानन्देन येनोज्झितं
देहं द्राक् स्वयमस्तसंहतितडिद्वामेव मायामयम् ।
कृत्वाग्नींद्रकिरीटपावकयुतैः श्रीचन्दनाद्यैर्मुदा
संस्कृत्याभ्युपयांति भस्म भुवनाधीशाः स जीयात् प्रभुः ॥ १२९ ॥

एतत्पठित्वा प्रतिमोपरि पुष्पांजलिमापयेत् । इति कल्याणपंचकारोपणविधानं । अथ संस्कारमालाधिरोपणम्।

न्यस्यामथेह विंबेष्ट चत्वारिंशतमर्हतः । संस्कारान् दृष्टिलाभादिशिवांतपदगोचरान्॥१३०॥

पढकर प्रतिमाके ऊपर पुष्पोंकी अंजलि क्षेपण करे । यह कल्याणपंचककी आरोपणाविधि हुई । अब संस्कारमालाकी आरोपण विधि कहते हैं । "न्यस्या" इत्यादि श्लोक बोलकर सम्यग्दर्शनप्राप्तिके संस्कारसे लेकर मोक्षप्राप्तितक संस्कार स्थापनेकी प्रतिज्ञा करे ॥ १३० ॥

सद्दर्शनस्य संस्कारः स्फुरत्वयमिहार्हति । संज्ञानस्यैव सद्वृत्तस्यैप सत्तपसोप्ययम् ॥१३१॥
एप वीर्यचतुष्कस्य मात्रष्टतयमंडले । प्रवेशस्यायमेपोष्टशुद्ध्यवष्टंभनिष्ठिते ॥ १३२ ॥
परीपहजयस्यायं त्रियोगासंयमच्युतेः । शीलमस्यायमेप त्रिकरणासंयमारतेः ॥ १३३ ॥
अयं दशा संयमोपरमस्यैपोक्षनिर्जितेः । अयं संज्ञानिग्रहस्य दशधर्मधृतेरयम् ॥ १३४ ॥
अष्टादशसहस्राणां शीलानामयमेपकः । चतुरभ्यधिकाशीतिगुणलक्षसमाश्रयः ॥ १३५ ॥
विशिष्टधर्मध्यानस्य अयमेपोतिशायिनः । अप्रमत्तयमस्यायं सुदृढश्रुततेजसः ॥ १३६ ॥
अकंपमकरणश्रेण्यारोहणस्यापुकोसकौ । अनंतगुणशुद्धेश्चाप्यामप्रत्तकृतेरयम् ॥ १३७ ॥
अयं पृथक्त्ववीतर्कवीचारप्रणिधेरयम् । अपूर्वकरणस्यैपो निवृत्तिकरणस्य च ॥ १३८ ॥
बादराणां कपायाणामयं किट्टिकृतेरयम् । सूक्ष्माणामेप पूर्वेपां किट्टिनिर्लेपनस्य च॥१३९॥
एपोन्येपामयं सूक्ष्मकपायचरणस्य च । प्रक्षीणमोहनस्यायं यथाख्यातविधेरयम् ॥ १४० ॥
अयमेकत्ववीतर्कवीचारध्यानभूरयम । घातिघातस्य कैवल्यज्ञानदृष्ट्युद्यतेरयम् ॥ १४१ ॥
तीर्थप्रवर्तनस्यायमेप सूक्ष्मक्रियस्य च । शैलेशीकरणस्यायं परसंवरवत्यसौ ॥ १४२ ॥
योगकिट्टिकृतेरेष तन्निर्लेपनगाम्यसौ समुच्छिन्नक्रियस्यायं श्रितोयं निर्जरां पराम् ॥१४३॥

"सद्दर्शन" इत्यादि एकसौ पैंतालीस तक श्लोक बोलकर अभिप्राय मनमें धारण करके प्रतिमाके ऊपर पुष्पांजली क्षेपण करे ॥ १३१ से १४५ ॥ इसप्रकार अडतालीस संस्कारोंकी

सर्वकर्मक्षयस्यायमनादिभवपर्ययः । विनाशस्याशुकोनंतसिद्धत्वादिगतेरयम् ॥ १४४ ॥
आदेयसहजज्ञानोपयोगैश्वर्यचार्यसौ । एष देहसाद्दात्येक्षोपयोगैश्वर्यगोचरः ॥ १४५ ॥

एतदर्थारोपणपरायणांतःकरणः पठित्वा प्रतिमोपरि पुष्पांजलिं क्षिपेत् । इत्यष्टचत्वारिंशत्संस्कारमालारोपणविधानम् । अथ मंत्रन्यासविधानम् ।

विश्वोद्भासि परब्रह्मव्यंजकं स्यात्पदांकितम्। शब्दब्रह्मेति मंत्रालीं न्यस्यामीह जिनेशिनः१४६

मंत्रन्यासप्रतिज्ञानाय प्रतिमोपरि पुष्पांजलिं क्षिपेत् ।

भालनेत्रश्रवोनासाकपोलरदपंक्तिषु । स्कंधयोर्मूर्ध्नि जिह्वाग्रे ओंमायार्हं रमोत्तरान् ॥ १४७॥

स्थापनाका विधान हुआ । अब मंत्रन्यास विधि कहते हैं—मैं स्यात्पदसे चिन्हित, जगतका प्रकाशक और परब्रह्मको कहनेवाले ऐसे शब्दब्रह्म इस मंत्रको अर्थात् ब्रह्म नामको जिनेश्वरमें स्थापित करता हूं ऐसा कहकर मंत्रन्यासकी प्रतिज्ञा प्रगट करनेकेलिये प्रतिमाके ऊपर पुष्पोंकी अंजलि चढावे ॥ १४६ ॥

उसके बाद "भाल" इत्यादि चार श्लोक बोलकर ओं ह्रीं अर्हं श्रींपूर्वक अकारादि वर्णोंको शरदऋतुके निर्मल चंद्रमाके समान चिंतवन करे तथा प्रतिष्ठेय प्रतिमामें हाथसे स्थापन करे। वह इसतरह हैं—"ओं" इत्यादिको ललाटमें दाहिनी वांई तरफ स्थापन करे, इसीप्रकार 'इई' को नेत्रोंमें, उऊको कानोंमें, ऋॠ को नाकमें, ऌॡको गालोंपर, एऐ को दांतोंमें, ओ औ को कंधेके दोनों भागोंमें, अं को मस्तकमें, अःको जीभके अगाड़ीके भागपर, कवर्गको दाहिनी

स्वरान् द्विशः पृथक्कद्वाक्षोर्दक्षिणवामयोः । कचवर्गौ तथा कुक्ष्योष्टतवर्गौ पृथक् पफौ ॥ १४८ ॥
ऊर्वोर्ब गुह्यके नाभ्यां भं मं मांसलतापदे । देहे य मूर्ध्नि रं लं पृष्टेऽधिसंधि वं ॥ १४९ ॥
शं जानुनोर्गुल्फयोः पं पादयोः संनिवेश्य हं । सर्वप्राणपदे साक्षाज्जिनमेपोऽवतारये ॥ १५० ॥

ओं ह्रीं अर्हं श्रीं एतत्पूर्वकानकारादिवर्णान शरच्चंद्रगौरान् यथोक्तस्थानेषु मनसा ध्यात्वा प्रतिष्ठेयप्रतिमासु करेण विन्यसेत् । तथाहि । ओं ह्रीं अर्हं श्रीं अ आ ललाटे दक्षिणतः प्रभृति न्यसेत्, ओं ह्रीं अर्हं श्रीं इई दक्षिणेतरनेत्रयोः । एवं सर्वत्र । उऊ कर्णयोः ऋ ॠ नासापुटयोः, ऌ ॡ गंडयोः, ए ऐ ऊर्ध्वाधो दंतपंक्त्योः, ओ औ स्कंधयोः, अं मस्तके, अः जिह्वाग्रे, क ख ग घ ङ दक्षिणभुजे, च छ ज झ ञ वामभुजे, ट ठ ड ढ ण दक्षिणकुक्षौ, त थ द ध न वामकुक्षौ, प दक्षिणोरौ, फ वामोरौ, ब गुह्ये, भ नाभिमंडले, म स्फिजोः, य शरीरस्थाने उदरे, र ऊर्ध्वरोमांचे मस्तकादिकेशेष्वित्यर्थः, ल पृष्ठे, व ग्रीवाकक्षादिसंधिषु, श जानुयुग्मे, ष गुल्फमूलयोः, स पदयोः ह सर्वप्राणस्थाने हृदये । इति मंत्रन्यासविधानं । अथ प्रतिष्ठातिलकदानं ।

भुजामें, चवर्गको बांई बांहमें, टवर्गको दाहिनी कूखमें, तवर्गको बांई कूखमें, प दाहिनी जांघमें, फ बांई जांघमें, ब गुह्यस्थानमें 'भ नाभिस्थानमें, म चूतड़ोंमें, य उदरमें, र शिरके केशोंमें, ल पीठमें, व गले कांख आदिकी संधिओंमें, श घुटनोंमें, ष पैरोंमें, हकारको हृदयस्थानमें, स्थापन करे ॥ १४७ । १४८ । १४९ । १५० ॥ यह मंत्रन्यास विधि हुई । अब प्रति-

प्रीत्यै पिंगा प्रियंगूफलमचिरफलं मंगलार्थं दधि स्यात्
सिद्धार्था वांछितार्थान् ददाति सुमनसः सौमनस्यं महायुः ।
दूर्वा श्रीखंडलोहप्रभृतिसुरभितामृद्धिमृद्धिश्च वृद्धिं
वृद्धिः शैत्यं तुषारो क्षतविशदयशांस्यक्षताश्चेत्यमीभिः ॥ १५१ ॥
शुच्या कौसुंभवस्त्राभरणघुसृणसन्माल्यभाजा चतुष्के
तिष्ठंत्या भर्तृवस्त्रांचलयुतवसनप्रांतया यव्दपत्या ।
कोणोद्भासि प्रदीपामलजलपवित्ताभ्यर्चितायां शिलायां
पिष्टैर्दत्वा गुडार्द्रांस्तिलकयतु कृतावाहनादिर्जिनार्चाम् ॥ १५२ ॥
चत्वारि मंगलं स्वाहेत्यंतेन प्रणवादिना । प्रियंगुः स्थापकैर्जप्त्वा धार्या हैमादिपात्रगा ॥१५३

तिलकद्रव्यसज्जीकरणं । अत्र स्थापनानिक्षेपेण यमाश्रित्याबाहनादिमंत्राः कथ्यंते तद्यथा । ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः असिआउसा एहि २ संवौषट् आवाहनं, ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः असि आउसा तिष्ठ २ ठ ठ स्थापनं, ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः असिआउसा अत्र सन्निहितो भव २ वषट् सन्निधीकरणं

प्रातिलकदानकी विधि कहते हैं ॥ हरताल आदि तिलक द्रव्य सोनेके पात्रमें रखकर "सि-द्धार्था" इत्यादि तीन श्लोक तथा "ओं" इत्यादिसे आवाहनादि करके जिन प्रतिमामें तिलक लगावे अथवा उसके आगे तिलक द्रव्य चढावे ॥ १५१ ।१५२। १५३ ॥ इसप्रकार वह इंद्र

कृत्वैवं कर्म शक्रोर्चां पूरकेण जिनं स्मरन् । सुलग्ने रेचकेनांतः प्रियां वा तत्पदं न्यसेत् ॥ १५४ ॥

तिलकमंत्रः । इति तिलकदानाविधानं । अथाधिवासनाविधानं ।

गंधाक्षतस्रग्वस्त्रान्नयवालीकंकणेषुभिः । चरुधूपारार्तिकफलैर्विरूढकयवारकैः ॥ १५५ ॥

सवर्णपूरेक्षुवालिवार्तिभृंगारकैरिमैः । मंत्राभिमंत्रितैश्चित्तैः सार्घस्वस्त्ययनैः क्रमात् ॥ १५६ ॥

एष निष्पतिघो देव्यस्केवलज्ञाननिर्वृतिम् । प्रतिष्ठितमहार्चायां जिनेंद्रमधिवासये ॥ १५७ ॥

स्वासन्नीकृतचंदनाद्यधिवासनद्रव्येषु पुष्पाक्षतं प्रक्षिप्य तत्कालप्रतिष्ठिताहर्त्प्रतिमां नमस्कुर्यात् ।

कर्पूरगकलवंग एला कररंवितं चंदनौघैः ।
दूरं स्फुरत्परिमलैर्जिनभर्तुराराद् विद्राणसौरभमदैरपि चर्चयेंघ्रीन् ॥ १५८ ॥

ॐ नमोर्हते सर्वशरीरावस्थिताय पृथु २ गंधं २ गृहाण स्वाहा ।

पूरक प्राणायामसे जिनेंद्र देवका स्मरण करता हुआ रेचक प्राणायामसे चरणकमलोंमें तिलकद्रव्य चढावे ॥ १५४ ॥ यह तिलकदान विधि हुई । अब अधिवासनाविधि कहते हैं– केवलज्ञान कल्याणसे प्रतिष्ठित हुई महान् अर्हंत प्रतिमामें अर्हत्प्रभुको स्थापित करके चंदन अक्षत आदिसे पूजा करे ॥ १५५ । १५६ । १५७ ॥ वह पूजा इसप्रकारसे है–पहले आवाहन-नादि करके पुष्प अक्षत क्षेपण करे । फिर "कर्पूर" इत्यादि श्लोक तथा "ओं नमो" इत्यादि बोलकर चंदन चढावे ॥ १५८ ॥ "शुंभत" इत्यादि तथा "ओं" इत्यादि बोलकर अक्षत

शुंभच्छारदपार्विकेंदुसुहृदामामोदनर्मोल्वण-
घ्राणप्राणितचेतसां द्युतटिनीतोयाभिषिक्तात्मनाम् ।
अच्छेदार्जितसाधुशीलयशसां शाल्यक्षतानां चयै-
राचारैरिव पंचभिः सुरचनैरर्हत्पदाब्जे यजे ॥ १५९ ॥

ओं नमोर्हते सर्वशरीरावस्थिताय पृथु २ अक्षतानि गृहाण २ स्वाहा ।

सौरभ्यसांद्रमकरंदपरागजाती मंदारमल्लिकमलादिमयेन दाम्ना ।
कल्याणपंचकरुचिं शरपंचकेन प्रव्यंजता जिनपते रचयामि पूजाम् ॥ १६० ॥

ओं नमोर्हते जय सर्वतो मेदिनीपुष्प वरपुष्पाणि गृहाण २ स्वाहा । पंचशरमालारोपणम् ।

जल्पच्छुक्लतया परां विमलतां तात्कालिकीं लभ्यतां
नव्यत्वेन लसद्दशापरिचयेनोत्कर्षपर्याप्तता ।
माहार्घेण महर्घतां च परमध्यानस्य दुर्लक्ष्यतां
सूक्ष्मत्वेन ददे जिनस्य वदने वस्त्रं प्रनष्टाहते ॥ १६१ ॥

चढावे ॥ १५९ ॥ "सौरभ्य" इत्यादि तथा "ओं" इत्यादि बोलकर पुष्प चढावे ॥ १६० ॥
"जल्प" इत्यादि दो श्लोक तथा "ओं नमो" इत्यादि बोलकर वस्त्र और औमाला सहित सात

ओं नमो अर्हं सर्वतो दह २ तेजोधिपतये सहभूताय धूपं गृहाण गृहाण स्वाहा । अष्टासु दिक्षु धूपघटाष्टकानिवेशनम् ।

स्फूर्जज्ज्योतिः सज्जितैः कज्जलांहो दाहं दाहं स्नेहमेभिर्वहद्भिः ।
दीपैः शुद्धज्ञानरोचिः कलापमख्यैरर्हं देवमाराधयामः ॥ १६७ ॥

ओं नमोर्हते सर्वतः प्रज्वल २ अमिततेजसे दीपं गृहाण स्वाहा ।

श्रीमद्दाडिममोचचोचरुचका क्षौटा मघोटा शिवा
जंबूजंभलनागरंगपनसद्राक्षाकपित्थादिजैः ।
छायागंधरसप्रमाकृतिदशाभेदैर्मनोहारिभिः
साक्षात्पुण्यफलैर्जिनेंद्रचरणावभ्यर्चयामः फलैः ॥ १६८ ॥

ओं नमोर्हते सहभूताय फलानि गृहाण गृहाण स्वाहा ।

मुद्गाद्यशेषाद्विदलप्रसूतैर्वालांकुराक्षिप्तगुणप्ररोहैः ।
विरूढकैः प्रौढविशुद्धभावं यजे जिनं भव्यशुभोद्भवाय ॥ १६९ ॥

॥ १६६ ॥ "स्फूर्ज" इत्यादि तथा "ओं" इत्यादि बोलकर दीपक चढावे ॥ १६७ ॥ "श्रीमद्दा" इत्यादि तथा "ओं" इत्यादि बोलकर फल चढावे ॥ १६८ ॥ "मुद्रा" इत्यादि बोलकर दो द-लवाले धान्यके अंकुरे शुभउदय होनेके लिये चढावे ॥ १६९ ॥ "यवादि" बोलकर जौका

विरूढकस्थापनम् ।

यवादिजैर्मंगलदानदक्षैर्यावारकैः कांतिजिताश्मगर्भैः ।
जगत्पतेः सिद्धवधूविवाहवेदीमिमां भूमिमलंकरोमि ॥ १७० ॥

यवारकस्थापनम् ।

सहानवस्थानहतान स्वपंचवर्णोन्वयेन द्युविमानवर्णान् ।
आक्षिप्यतोभि प्रभु वर्णपूरान स्ववासिपुण्याय निवेशयामि ॥ १७१ ॥

वर्णपूरकस्थापनम् ।

व्याहारान् जिनवाक्यवन्मधुरताशैत्यप्रसादोद्धुरै-
रिक्षन् स्वादुविपाकवद्भिरितरान् मत्यादिशक्ती रसैः ।
स्थूलैरायतिशालिभिः कलयुतं कोदंडकृप्त्यै ।
प्रभारिष्टरसोन्मुखं जिनपतिः पुंड्रेक्षुभिः प्रार्चये ॥ १७२ ॥

इक्षुस्थापनम् ।

वस्तुं सभाभुवि मनोज्ञफलप्रवालपुष्पावलीरुपहृता द्युवनश्रिये वा ।
चित्रामपिष्टमयपुष्पफलप्रवालरूपास्तनोमि वलिवर्तिततीर्जिनाग्रे ॥ १७३ ॥

आटा स्थापन करे ॥ १७० ॥ "सहान" इत्यादि बोलकर पांच रंगोंको चढावे ॥ १७१ ॥ "व्याहारान्" इत्यादि बोलकर पोंडा चढावे ॥ १७२ ॥ "वस्तु" इत्यादि बोलकर घीकी वत्ती

स्वीकार्यापि शिवाय सद्वृत्तमिमे कूर्मोवतार्यार्तिकं
तस्योत्क्षिप्य च धूपमध्वमघहृत्तच्छ्रीमुखोद्घाटनम् ॥ १८३ ॥

ॐ उसहादिवड्ढमाणाणं पंचमहाकल्लाणसंपण्णाणं महइ महावीरवड्ढमाणसामीणं सिज्झउ मे महइ महाविज्जा अट्ठमहापाडिहेरसहियाणं सयलकलाधराणं सज्जोजादरूवाणं चउतीसातिसयविसेससंजुत्ताणं बत्तीसदेविंदमाणिमउडमत्थयमहियाणं सयललोयस्स संतिपुट्ठिकल्लाणाओ आरोगाकराणं बलदेववासुदेवचक्कहररिसिमुणिजदिअणागारोवगूढाणं उहयलोयसुहयफलयराणं थुइसयसहस्सणिलयाणं परापरपरमप्पाणं अणाइणिहणाणं बलिवाहुबालिसाहिदाणं वीरवीरे ओं हां क्षां सेणवीरे वड्ढमाणवीरे हंसं जयंते पराइएवज्जसियलंममयाणं सस्सदवंभपइट्ठियाणं उसहाइवीरमंगलमहापुरिसाणं णिच्चकालपइट्ठियाणं इत्थ साण्णिहिदा मे भवंतु मे भवंतु ठ ठ क्ष क्ष स्वाहा । श्रीमुखोद्घाटनमंत्रः ।

येनोन्मील्य समस्तवस्तुविशदोद्भासोद्भटं केवल-
ज्ञानं नेत्रमदर्शिमुक्तिपदवी भव्यात्मनामृव्यथा ।
तस्यात्रार्जुनभाजनार्पितसिता क्षीराज्यकर्पूरयुक्
वक्रस्वर्णशलाकया प्रतिकृतौ कुर्वे दृगुन्मीलनम् ॥ १८४ ॥

बाबन विधि हुई । अत्र केवलज्ञान कल्याणका स्थापन करते हैं–"इत्यध्रु" इत्यादि श्लोक तथा ओं उसहा" इत्यादि श्रीमुखोद्घाटन मंत्र बोलकर भगवानके मुखको उघाड़े ॥ १८३ ॥ "येनो" इत्यादि तथा "ओं नमो" इत्यादि नेत्रोन्मीलनमंत्र बोलकर नेत्रोंको उघाड़े ॥१८४॥

ओं नमो अरहंताणं अमियरसायणं विमलतेयाणं संति तुट्ठि पुट्ठि वरद सम्मादिट्ठीणं वृपभं अमयवरसणं स्वाहा । नेत्रोन्मीलनमंत्रः । अथ गुणाध्यारोपणं ।

यत्सामान्यविशेषयोः सह पृथक् स्वान्यत्वयोर्दीपव—
च्चित्तं द्योतकमर्हतः समुदभूत्ते दृक् चिदो ये च यत् ।
तद्व्यापारनिबंधि वीर्यमपि यत्सौख्यं तदव्याकुली—
भावोऽनंतचतुष्टयं तदिह तद्बिंबे न्यसाम्यांतरम् ॥ १८५ ॥

अनंतज्ञानादिचतुष्टयप्रतिष्ठार्थं प्रतिमोत्तमांगे चतुःपुष्पीमारोपयेत् ।

सौभिक्षं भवतिस्म योजनशतं यत्संसदं सर्वतः
सार्धक्रोशयुगोज्झितक्षितितलं यत्रे स्पृहं सद्गतम् ।
यश्चेष्टास्वसितांगसंगवशतोप्यप्राणघातोंगिनां
या तावत्यपि विग्रहस्य कवलाहारं विनैव स्थितिः ॥ १८६ ॥
हुंडामप्यवसर्पिणीं प्रतिवदन् यो नोपसर्गोद्भव—
स्तैजोवैभवतश्चतुर्मुखतया वीक्ष्यैकमुख्योपि या ।

अब गुणोंकी आरोपणविधि कहते हैं—"यत्सामान्य" इत्यादि बोलकर अनंतज्ञान आदि अनंत चतुष्टयकी स्थापनाकेलिये प्रतिमाके मस्तकके ऊपर चार पुष्प चढावे ॥ १८५ ॥ "सौ-

निद्रास्वप्यखिलासु यः परिदृढीभावो दृढः सर्वदा
यच्छायाविरहस्तिरश्चरदिनेऽप्यंगे क्षिपेयेपि च ॥ १८७ ॥
पक्ष्मस्पंदविपर्ययोऽनिशमृते व्याधेः प्रयत्नाच्च यो
यो मूर्तेर्नखकेशवृद्ध्युपरमो मर्त्यप्रकृत्यत्ययात् ।
ते घातिक्षयजा दशाप्यतिशया वाह्याश्च चेतश्चमत्-
कारोद्रेककृतो जिनस्य निहिता बिंबे मयात्राधुना ॥ १८८ ॥
घातिक्षयजदशातिशयस्थापनार्थं पीठिकायां दश पुष्पाणि क्षिपेत् ।
धूलीशालोऽतः क्षितौ चैत्यगेहप्रासादालयो नाट्यशालाः सरांसि ।
मानस्तंभाश्चाथिदिग्वीथ्यतोर्णः पूर्णं खेयं वेदिरस्यं विदिक्षु ॥ १८९ ॥
वेदीभूपा पुष्पवाट्यस्ततोंतो नाट्याशोकाद्याश्च भूहर्म्यशाला ।
वेदीरुद्धाश्च ध्वजोर्वीशतारमाकारांतो नाट्यकल्पद्रुमोर्वी ॥ १९० ॥
वेदीरुद्धातः स्तूपदिव्यालयोर्वीयत्पार्श्वतः सनाथार्कशाला ।
तन्मध्येऽर्हन्गंधकुट्यासने भागवास्यानां नापिह स्थापयामि ॥ १९१ ॥

"निद्रा" इत्यादि तीन श्लोक बोलकर केवलज्ञानके समय होने वाले दस अतिशयोंके स्थापन करनेके दस फूलोंको वेदीपर चढावे १८६ । १८७ । १८८ ॥ "धूली" इत्यादि तीन

समवसरणस्थापनार्थं प्रतिमायाः समंतात् पुष्पाक्षतं क्षिपेत । इति समवसरणस्थापनम् ।

उपानीयं यतोदेवैर्देवदेवातिशायिनः । चतुर्दशाद्भुता भावाः स्थापयामीह तानपि ॥ १९२॥
ब्रुवतोर्द्धार्द्धसर्वांगि मागधोक्तिमयी प्रभोः । सभायामन्वकार्यंत मागधैर्वागिहास्तु सा॥१९३
जातिकारणवैरैकधस्मरेप्याश्रमे पुष्यन । यया प्रीतिकरा भर्तृभक्तान् मैत्रीह भातु सा॥१९४
सर्वर्तुसंपद्भ्राजिष्णु द्रुमा रत्नमयी ह्युवत । या गिभाव्दतलासर्जि प्रभुभक्त्यास्तु सा प्रभुः १९५॥
यो विस्रसा विहरति प्रभौ मृद्धतिलोन्ववात् । यश्चाभूतपरमानंदः सर्वेषां तामिहापि तौ॥१९६॥
संमार्जनं योजनं यद्वोर्जिनाग्रेनिलैः कृतम् । या गंधोदकवृष्टिश्च मेघैस्ते भवतामिह ॥१९७॥
यांतं तं सर्वतः पद्माः पंक्तिद्वात्रिंशता तताः । सप्तसोधपदोर्श्वैको यत्तत्पद्मायनं त्विदम् १९८
विभुवैभवनिध्यानहृपिता पुलकानि च । फलभारानतव्रीहिव्याजाद्भूया सा त्विह ॥१९९ ॥
प्रभोर्दिशावसंहर्पाद्यन्नैर्मल्यं दधुर्दिशः । तद्योगादिव यत्खं च प्रसन्नं तद्भवत्विह ॥ २०० ॥
वरमद विभुभक्तुमेतैतेत्यभितो व्यधुः । यद्भावनाः समस्तान्यदेवाञ्वनं तदस्त्विह ॥ २०१ ॥
रत्नरुक् चक्रदीपारसहस्रेण रविं क्षिपन । धर्मचक्रं चचाराग्रे यत्प्रभोस्तत्स्फुरत्विदम्॥२०२॥
छत्रचामरभृंगारकुंभाब्दव्यजनध्वजान् । स्वसुप्रतिष्ठान् यानिंद्रो भर्तुस्तेनेत्र संतु तो ॥२०३॥

श्लोक बोलकर समवसरण स्थापन करनेके लिये प्रतिमाके चारोंतरफ पुष्प और अक्षत फेंके ॥ १८९ । १९० । १९१ ॥ " उपानीयं " इत्यादि बारह श्लोक बोलकर देवकृत अतिशयोंके स्थापन करनेकेलिये वेदीपर चौदह पुष्प चढावे ॥ १९२ से २०३ ॥

चतुर्दशदेवोपनीतातिशयस्थापनार्थं पीठिकायां चतुर्दश पुष्पाणि क्षिपेत् । इति दिव्यातिशय-स्थापनम् ।

स्पृश्याः स्पृशंतो नापद्भिर्यन्नामापि तथापि तम् । येनेंद्रो यष्टभक्त्या तव प्रातिहार्याष्टकं त्विदम्॥

अष्टमहाप्रातिहार्यस्थापनाय पीठिकायामष्टपुष्पी क्षिपेत् ।

रत्नांशुवर्गेन्द्रधनुर्न्यातास्या हरिवाहनम् । यच्चक्रे धर्मैकात्मा सिंहपीठं तदस्त्वदः ॥२०५॥

ओं सिंहासनश्रियै स्वाहा । सिंहासने पुष्पांजलिं क्षिपेत् ।

मनाग्यभेद्यो मेघौघध्वनिजिद्योजनं सद । व्याप्नुवन् यो न केनापि व्याघात्येप सतद्ध्वनिः ॥

ओं ध्वनिश्रियै स्वाहा । सरस्वत्यां पुष्पांजलिं क्षिपेत् ।

यक्षैर्दोधूयमानार्हद्देहं छायाछलाश्रिता । या चामरचतुःषष्टिर्नानटीतिस्म सास्त्वियम्॥२०७॥

ओं चतुःषष्टिचामरश्रियै स्वाहा । चामरधारियक्षयोः पुष्पांजलिं क्षिपेत् ।

चक्षुष्ये पश्यतां सप्त भासयत्यनिशं भवान् । भामंडले त्रुडन् यत्र विश्वतेजोऽस्यदोस्तु तत् ॥

" स्पृश्याः " इत्यादि बोलकर आठ प्रातिहार्य स्थापन करनेकेलिये वेदीमें आठ पुष्प चढा-वे ॥ २०४ ॥ " रत्ना " इत्यादि तथा " ओं " इत्यादि बोलकर सिंहासनके आगे पुष्प च-ढावे ॥ २०५ ॥ " मनाग्य " इत्यादि तथा " ओं " इत्यादि बोलकर सरस्वतीके आगे पुष्प चढावे ॥ २०६ ॥ " यक्षै " इत्यादि तथा " ओं " इत्यादि बोलकर चमर धारण करनेवाले यक्षोंके आगे पुष्पांजलि चढावे ॥ २०७ ॥ " चक्षुष्ये " इत्यादि तथा " ओं " बोलकर भा-

ओं भामंडलश्रियै स्वाहा । भामण्डले पुष्पांजलिं क्षिपेत् ।

रत्नरोचि नदद्भृंगखगोवातचलल्लतः । विश्वाशोकीकृते व्यक्तं योऽशोको नटदेप सः २०९

ओं रक्ताशोकाश्रियै स्वाहा । रक्ताशोके पुष्पांजलिं क्षिपेत् ।

मुक्तप्रारोहमालंवि मुक्त्वा लंबूप लक्षणः । छत्रत्रयं स्मावत् श्रीनिधिं यन्न्यात्यदोस्तु तत् ॥

ओं छत्रत्रयाश्रियै स्वाहा । छत्रत्रये पुष्पांजलिं क्षिपेत् ।

सभ्याः शृण्वंत्वसभ्योक्तीर्मितीवातीव योध्वनत् । सार्धद्वादशकोटयुद्यद्वादित्रोयं स दुंदुभिः ॥

ओं दुंदुभिश्रियै स्वाहा । दुंदुभौ पुष्पांजलिं क्षिपेत् ।

गंगांभः सुभगे गुंजद्भृंगौघा सुमनस्तमे । सुमनोभिः सुमनसां वृष्टिर्या सर्जे सास्त्वसौ २१२

ओं पुष्पवृष्टिश्रियै स्वाहा । मालाविद्याधरयोः पुष्पांजलिं क्षिपेत् ।

इत्यष्टौ प्रातिहार्याणि प्रतिमायां जिनेशिनः । स्थापितानि च निघ्नंतु भाक्तिकानां सदापदः ॥

मंडलके आगे पुष्पांजलि चढावे ॥ २०८ " रत्न " इत्यादि तथा " ओं " इत्यादि बोलकर लाल अशोकके आगे पुष्पांजलि क्षेपण करे ॥ २०९ ॥ " मुक्त " इत्यादि तथा " ओं " इत्यादि बोलकर तीन छत्रोंकेलिये पुष्पांजलि क्षेपण करे ॥ २१० ॥ " सभ्या " इत्यादि तथा " ओं " इत्यादि बोलकर दुंदुभिवाजेकेलिये पुष्पोंको क्षेपण करे ॥ २११ ॥ " गंगांभ " इत्यादि तथा " ओं " इत्यादि बोलकर पुष्पमाला धारण करनेवालोंके आगे पुष्पोंको क्षेपण करे ॥ २१२ ॥ " इत्यष्टौ " इत्यादि बोलकर प्रतिमाके आगे आठ पुष्पोंको चढावे ॥

प्रतिमाग्रेष्टपुष्पीं क्षिपेत् । इत्यष्टमहाप्रातिहार्यस्थापनम् ।

वंशे जगत्पूज्यतमे प्रतीतं पृथग्विधं तीर्थकृतां यदत्र ।
तल्लांछनं संव्यवहारसिद्ध्यै बिंबे जिनस्येदमिहोल्लिखामि ॥ २१४ ॥

लांछने पुष्पांजलिं क्षिपेत् ।

शक्रेण सत्कृत्य सुभाक्तिकत्वात् त्रातुं नियुक्तो जिनशासनं यः ।
कामान् दुहन्नीश जुषां यथास्वं प्रतिष्ठितस्तिष्ठतु सैष यक्षः ॥ २१५ ॥

यक्षोपरि पुष्पांजलिं क्षिपेत् ।

तद्वत्स्वपूर्वेष्वतिवत्सलत्वान्निवारयंती दुरितानि नित्यम् ।
यथोचितं शासनदेवतेति न्यस्तात्र यक्षी प्रतपत्वसह्यम् ॥ २१६ ॥

शासनदेवतोपरि पुष्पांजलिं क्षिपेत् ।

येनेह दर्शनविशुद्ध्यधिदैवतेन विश्वोपकाररसिकेन दिवीव गर्भम् ।
न्यूपे प्रमोदरसवर्षणपर्वणैव सर्वाणि सैष निहताद् दुरितानि नोऽर्हन् ॥ २१७ ॥

॥ २१३ ॥ " वंशे " इत्यादि बोलकर चिन्हके आगे पुष्पांजलि क्षेपण करे ॥ २१४ ॥ " शा-
क्रेण " इत्यादि बोलकर यक्षके ऊपर पुष्पांजलि क्षेपण करे ॥ २१५ ॥ " तद्वत " इत्यादि
बोलकर शासनदेवताके ऊपर पुष्पांजलि चढावे ॥ २१६ ॥ " येने " इत्यादि पांच श्लोक

आधीभिराधिभिरवाविपर्यीकृताया निर्गत्य मातुरुदराज्जनयन् मुदं यः ।
लोकोत्तराणि बुभुजेत्र सुखान्यजस्रं श्रेयांसि स जयतु न सदायम् ॥ २१८ ॥

समयाधिगमास्तमोहतंद्रे स्वयमुद्बुध्य झटित्यपास्तसंगम् ।
प्रशमैकरसो चरत्तपो यः स जिनोयं हरतां भवज्वरं नः॥ २१९ ॥

यः सम्यक्त्वरमावगाढदृगुपष्टंभात्समं वेदिता
द्रष्टा विश्वमुपेक्षितात्मपरमानंदोऽध्यतिष्ठद्विरम् ।
स्फूर्जत्तीर्थकरत्वनामसुकृतोद्रेकादनुमाणतीं
दिव्यां सभ्यसमीहितार्थकथनीं नस्तत् स्फुरत्वेष नः ॥ २२० ॥

योष्टादशशीलसहस्रसंयुक्तश्चतुरशीतिगुणलक्षः ।
परिणम्य कृत्स्नकर्मच्युतोष्ट भजते गुणान् सचेहास्ताम् ॥ २२१ ॥

एतत्पंचकं पठित्वा कल्याणपंचकस्थापनाभिव्यक्तये प्रतिमायां पुष्पांजलिं क्षिपेत् ।

इति सिद्धामरसाक्षाज्जीवन् मुक्तिश्रियं स्वसात्कृत्य ।
भजतो जगतो पत्युः कंकणमिह मोक्षयाम्येषः ॥ २२२ ॥

बोलकर पांचकल्याणोंके प्रगट करनेकेलिये प्रतिमाके आगे पुष्पांजलि चढावे ॥ २१७ से २२१ ॥ " इति " इत्यादि श्लोक तथा " ओं " इत्यादि बोलकर प्रतिमाके आगे पुष्प क्षेपण

ओं " सत्तक्खरसक्कारं अरहंताणं णमोत्ति भावेण । जो कुणइ अणण्णमणो सो गच्छइ उत्तमं ठाणं " ॥ कंकणमोक्षणं । ॐ "केवलणाणदिवायरकिरणकलावप्पणासियण्णाणो । णव केवलल्द्धुग्गमसुजणियपरमप्पववएसो" असहायणाणदंसणसहिओ इदि केवली हु जोएण। जुत्तोत्ति सजोगिजिणो अणाइणिहणारिसे उत्तो" ॥ इत्येषोऽर्हत्साक्षादत्रावतीर्णो विश्वं पात्विति स्वाहा। प्रतिमोपरि पुष्पांजलिं क्षिपेत् । अर्हद्देवसाक्षात्करणविधानम् । ओं " खवियघणघाइकम्मा चउतीसातिसयपंचकल्लाणा । अट्ठवरपाडिहेरा अरहंता मंगलं मज्झ " भूयासुरिति स्वाहा ॥ परमोत्सवेन महार्घमवतारयेत् ।

सिद्धश्रुतचारित्रर्षिशांतिभक्तिभिरन्विताः । केवलज्ञानकल्याणक्रियां कुर्वंतु याजकाः ॥२२३॥

इति केवलज्ञानकल्याणकस्थापनविधानम् ।

न्यस्य निर्वाणकल्याणं सूत्रोक्तविधिना ततः । सिद्धश्रुतचारित्रर्षिशिवशांतीन् स्तुवंतु ते॥२२४॥

इति निर्वाणकल्याणस्थापनम् ।

करे ॥ २२२ ॥ यह अर्हंत प्रभुका साक्षात्करण हुआ । " ओं " इत्यादि स्वाहातक बोलकर महान् उत्सवके साथ महार्घ चढावे ॥ इसप्रकार प्रतिष्ठा करनेवाले सिद्ध श्रुत चारित्र ऋषि शांति भक्तियां सहित केवलज्ञानकल्याणकी क्रिया करें । । २२३ ॥ इसतरह केवलज्ञानकल्याणकी स्थापना विधि हुई ॥ उसके बाद वे इंद्र शास्त्रकथित विधिसे निर्वाण कल्याणका स्थापन करके सिद्ध श्रुत चारित्र ऋषि शिव शांति स्तुतिका पाठ करें ॥२२४॥ जिसतरह

तथा सामान्यतोबिंबे गुणाद्यारोप्यमर्हताम् । यथास्वं च पृथक्कूल्यं स्वर्गावतरणादिकम् २२५

अप्यंगुष्टमितामनेन विधिना जैनीं प्रतिष्ठाप्य ये
शास्त्रोक्तां प्रतिमां भजंति विधिवन्नित्याभिषेकादिभिः ।
तेऽर्हद्भक्तिदृढानुरंजितधियो भुक्त्वा शिवाधर-
श्रामण्योभ्युदयावलीरनुभवंत्यात्यंतिकीं निर्वृतिम् ॥ २२६ ॥

इत्याशाधरविरचिते प्रतिष्ठासारोद्धारे जिनयज्ञकल्पापरनाम्नि जिनप्रतिष्ठाविधानीयो नाम चतुर्थोऽध्यायः ॥ ४ ॥

स्वर्गसे अवतार लेना आदि क्रियायें हुई हैं उसीतरह अर्हतके प्रतिबिंबमें गुणादिकी स्थापना करनी चाहिये ॥ २२५ ॥ इसतरह निर्वाण कल्याणकी स्थापनाका विधान हुआ । जो अंगुष्ठप्रमाण शास्त्रोक्त जिन प्रतिमाको भी इसी पूर्वकथित विधिसे प्रतिष्ठित करके हमेशा अभिषेकादि विधिसे पूजते हैं वे मुमुक्षु इस लोकमें उत्कृष्ट भोगोंको भोगकर बादमें अनंतसुखरूप मोक्षको पाते हैं ॥ २२६ ॥

इसप्रकार पं० आशाधर विरचित जिनयज्ञकल्प द्वितीय नामवाले प्रतिष्ठासारोद्धारमें अर्हतप्रतिष्ठाकी विधिको कहनेवाला चौथा अध्याय पूर्ण हुआ ॥ ४ ॥

शश्वच्चेतयते यदुत्सवमिमं ध्यायंति यद्योगिनो
येन प्राणिति विश्वमिंद्रनिकरा यस्मै नमस्कुर्वते ।
वैचित्री जगतो यतोस्ति पदवी यस्यांतरप्रत्ययो
मुक्तिर्यत्र लयस्तनोतु जगतां शांतिं परं ब्रह्म तत् ॥ ३ ॥

अनेन जिनाग्रे शांतिधारा प्रकल्प्येत्थं बलिं दद्यात् । ओं अर्हद्भ्यो नमः सिद्धेभ्यो नमः सूरिभ्यो नमः पाठकेभ्यो नमः सर्वसाधुभ्यो नमः । अतीतानागतवर्तमानत्रिकालगोचरानंतद्रव्यगुणपर्यायात्मकवस्तुपरिच्छेदकसम्यग्दर्शनसम्यग्ज्ञानचारित्राद्यनेकगुणगणाधारपंचपरमेष्ठिभ्यो नमः । ओं पुण्याहं २ प्रीयंतां २ ऋषभादि महति महावीर वर्धमानपर्यंतपरमतीर्थंकरदेवान् तत्समयपालिन्योऽप्रतिहतचक्रचक्रेश्वरीप्रभृतिचतुर्विंशतिशासनदेवताः गोमुखयक्षप्रभृतिचतुर्विंशतियक्षा आदित्यचंद्रमंगलबुधबृहस्पतिशुक्रशनिराहुकेतुप्रभृत्यष्टाशीतिग्रहाः वासुकिशंखपालककर्कोटपद्मकुलिकानंततक्षकमहापद्मजयविजयनागाः देवनागयक्षगंधर्वब्रह्मराक्षसभूतव्यंतरप्रभृतिभूताश्च सर्वेप्येते जिनशासनवत्सलाः

कर परब्रह्मका मनमें ध्यान करे ॥ २ ॥ यह देवताविसर्जनकी विधि हुई । "शश्व" इत्यादि बोलकर जिनदेवके आगे शांतिधारा छोड़के इसप्रकार पूजन करे ॥ ३ ॥ "ओं अर्ह" इत्यादि बोलकर पुष्प क्षेपण करे । इसमें राजा प्रजा कुटुंब आदि सब जीवोंके कल्याण होनेका चिंतवन किया जाता है । इसीको पुण्याहवाचन भी कहते हैं "ये सामग्री" इत्यादिसे अर्हंतसे

ऋण्यार्यिकाश्रावकश्राविकायष्टृयाजकराजमंत्रिपुरोहितसामंतारक्षिकप्रभृतिसमस्तलोकसमूहस्य शांति-वृद्धिपुष्टितुष्टिक्षेमकल्याणम्वायुरारोग्यप्रदा भवंतु । सर्वसौख्यप्रदाश्च संतु । देशे राष्ट्रे पुरे च सर्वदैव चौरारिमारीतिदुर्भिक्षावग्रहविघ्नौघदुष्टग्रहभूतशाकिनीप्रभृत्यशेषानिष्टानि प्रलयं प्रयांतु, राजा विजयी भवतु प्रजासौख्यं भवतु, राजप्रभृतिसमस्तलोकाः सततं जिनधर्मवत्सलाः पूजादानव्रतशीलमहामहोत्सव-प्रभृतिपूद्यता भवंतु, चिरकालं नंदंतु । यत्र स्थिता भव्यप्राणिनः संसारसागरं लीलयोत्तीर्यानुपमं सिद्धिसौख्यमनंतकालमनुभवंति तच्चाशेषप्राणिगणशरणभूतं जिनशासनं नंदत्विति स्वाहा ।

ये सामग्रीविशेषदृढिमभरहृयात्क्षिप्तदुर्वारवैरि-
व्रातप्रेष्यत्पताकासततपरिचितज्ञानसाम्राज्यलीलाः ।
भूतार्थोच्छेदकंदव्यवहरणघटोद्भिन्नपृक्तोक्तियुक्ति-
क्षिप्तार्तं मन्यमाना जगदतिपुनते ते जिनाः पांतु विश्वम् ॥ ४ ॥
स्फूर्जच्छलश्रुदर्चिर्भरमसितदशासाकृतेनःपतंगाः
स्वांगाकाराक्षरैकक्षणस्मरनिराकारसाकारचित्काः ।
व्योम्नो विश्वैकधाम्नः कृततिलकरुचः मष्टमारंभरीणां
व्यंजंतः स्वं सदान्याज्जिनसमयजुषाः संतु सिद्धाः शिवाय ॥ ५ ॥

कल्याण होनेका चिंतवन है ॥ ४ ॥ "स्फूर्ज" इत्यादि बोलकर सिद्धोंसे कल्याण प्रार्थना॥५॥

भ्राजिष्णुशक्तिविभवा भवसिंधुसेतुसर्वज्ञशासनविभासनबद्धकक्षाः ।
याः पूजयंति विविधाद्भुतसिद्धिकामास्ताश्चाष्टविघ्नमवंतु जयादिदेव्यः ॥ १६ ॥
शक्रादेशात्तीर्थकृद्देवमातुर्याः सेवंते स्वस्वयोग्यैर्नियोगैः ।
ताः सर्वज्ञाराधनातत्पराणां संत्वष्टापि श्रेयसे श्र्यादिदेव्यः ॥ १७ ॥

अन्येपि दौवारिकलोकपालग्रहोरगानाहृतयक्षमुख्याः ।

देवा यथास्वं प्रतिपत्तिहृष्टा निघ्नंतु विघ्नान् जिनभाक्तिकानाम् ॥ १८ ॥

तद्द्रव्यमव्ययमुदेतु शुभः प्रदेशः संतन्यतां प्रतपतु प्रततं स कालः ।
भावः स नंदतु सदा यदनुग्रहेण प्रस्तौति तत्त्वरुचिमाप्तगवी नरस्य ॥ १९ ॥
किं बहुना ।

शांतिः स तनुतां समस्तजगति संगत्वतां धार्मिकैः

श्रेयःश्री परिवर्द्धतां नयधुराधुर्यो धरित्रीपतिः ।

योंसे इष्ट प्रार्थना करे ॥ १५ ॥ " भ्राजिष्णु " इत्यादि बोलकर जया आदि आठ देवियोंसे इष्ट प्रार्थना करे ॥ १६ ॥ " शक्रा " इत्यादि बोलकर श्री आदि आठ देवियोंसे इष्ट प्रार्थना करे ॥ १७ ॥ " अन्येपि " इत्यादि बोलकर इनके सिवाय अन्य देवताओंसे प्रार्थना ॥ १८॥ " तद्द्रव्य " इत्यादि बोलकर द्रव्य क्षेत्र काल भावोंके शुभ मिलनेकी प्रार्थना ॥ १९ ॥ बहुत कहनेसे क्या, सब जगतमें शांति रहे, धर्मात्माओंकी संगति मिळे, कल्याण करनेवाली लक्ष्मी

सद्विद्यारसमुद्गिरंतु कवयो नामाप्यघः स्यात्तु मा
प्रार्थ्यं वा कियदेक एव शिवकृद्धर्मो जयत्वर्हताम् ॥ २० ॥

एतेत्मार्थपरा शक्राः छत्रचामरशालिनीम् । भृंगारहस्ता मुक्तांबुधारापूतपुरो धराम् ॥२१॥
जिनार्चामनुयांतोग्रे प्रनृत्यत्कलशांगनाः । महान् तूर्यस्वनैर्भव्यजयकोलाहलोल्बणैः ॥ २२ ॥
पूरयंतो दिशः सप्तधान्यपुष्पाक्षतादिभिः । कल्पयंतो बलिं शांत्यै त्रिःपरीयुर्जिनालयम् २३

इति बलिविधानम् ।

अथाचार्योऽभिषेक्तव्यः फलपुष्पाक्षतद्युतः । जिनगंधांबुकुंभेन यष्ट्रे दद्यात्तदाशिषम् ॥२४॥

तद्यथा ।

आयुस्तन्वंतु तुष्टिं विदधतु विधुनंत्वापदो घ्नंतु विघ्नान्
कुर्वंत्वारोग्यमुर्वीं वकयाविलासितां कीर्तिवल्लीं सृजंतु ।

बढे, न्यायमार्गपर चलनेवाला राजा हो, कविजन उत्तम विद्यारसको प्रगट करें, पापका नाम भी न रहे, अन्य विशेष प्रार्थना क्या करें संसारमें एक मोक्षको दाता जैनधर्मकी ही जय हो ॥ २० ॥ आत्मकल्याण करनेमें लीन,छत्र चमर लिये हुए,स्वच्छ जलसे भरी झाड़ीको हाथमें लिए हुए, जिनमूर्तिके आगे नृत्य करते हुए इंद्र, सात तरहके धान्य पुष्प अक्षत आदि पूजा द्रव्यसे पूजा करते हुए जिनमंदिरकी तीन परिक्रमा दें ॥ २१।२२।२३ ॥ यह बलिविधान हुआ । उसके बाद प्रतिष्ठाचार्य गंधोदक अक्षत पुष्प फल दीप धूपसे प्रतिष्ठाविधि करनेवाले

धर्मं संवर्धयंतु श्रियमभिरमयंत्वर्पयंत्विष्टकामान्
कैवल्यश्रीकटाक्षानपि जिनचरणाः संजयंतु सदा वै ॥ २५ ॥
आज्ञैश्वर्यमकार्यकार्यविचयैः संतानवृद्धिर्जयः
सौभाग्यं धनधान्यवृद्धिरभयं निःशेषशत्रुक्षयः ।
पांडित्यं कविता परार्थपरता कार्तज्ञमोजस्विता
मानित्वं विनयो जयश्च भवतादर्हत्प्रसादेन वः ॥ २६ ॥
कांताः कांतिकलानुरागमधुराः पुण्यास्त्रिवर्गांकुरा
भृत्याः स्वाम्यनुरक्तिशक्तिरुचिरा श्च्योतन्मदाः कुंजराः ।
वाहास्तर्जितशक्रसूर्यतुरगाः शौर्योद्धताः पत्तयो
भूयासुर्भवतां जिनेंद्रचरणांभोजप्रसादात्सदा ॥ २७ ॥
गांभीर्यंमौदार्यमजर्यमार्यशौर्यं सशौंडीर्यमवार्यवीर्यम् ।
धैर्यं विपद्यार्जवमार्यभक्तिः संपद्यतां श्रीजिनपूजनाद्वः ॥ २८ ॥

इंद्रको आशीर्वाद दे ॥ २४ ॥ वह ऐसे है कि " आयु " इत्यादि ग्यारह आशीर्वाचक श्लोक पढकर यज्ञके शिरपर अक्षत आदिका क्षेपण करे ॥ २५ से ३५ ॥ यह आशीर्वाद विधि हुई । उसके बाद यज्ञ " यज्ञोचितं " इत्यादि बोलकर जनेऊ आदिक यज्ञदीक्षाके

भवतु भवतामर्हद्भक्त्या सदा मुदितं मनो
ग्रहमुपचिता चौरौचित्यं मदासेन परस्परः ।
प्रणयिविवशैः स्वैसंवौसौद्यागयमीहितं
स्थितिरपि चित्ते प्रज्ञापराधपराहतिः ॥ २९ ॥
दृक्संशुद्धिरतोन्यतोस्तु भवतामर्हत्प्रतिष्ठाविधे
जातु क्वापि कथंचिदीपदपि मा शीलं व्रतं म्लायतु ।
दूरादेव शिरस्यधीरमरयो वध्नंतु देवांजलिं
प्रेम्णा सद्गुणसंपदा च सुहृदः श्लिष्यंतु पुष्णंतु च ॥ ३० ॥
यष्टृणां याजकानां प्रतिनुतिकृतामभ्यनुज्ञायकानां
भूयस्यांतःपुरस्य क्षितिपतनुभुवां मंत्रिसेनापतीनाम् ।
सामंतानां पुरोधः पुरविषयवनादिस्थवर्णाश्रमाणां
सर्वेषामस्तु शांत्यै सततमयमिह स्थापितो विश्वनाथः ॥ ३१ ॥
विचित्रैः स्वैर्द्रव्यं प्रतिसमयमुच्चाद्विपदपि
स्वरूपादुल्लोलैर्जलमिव मनागप्यविचलम् ।

जिन्होंको गुरु (आचार्य) के चरण कमलोंके आगे रखकर नमस्कार करे । यह यज्ञदीक्षा

अनेहो माहात्म्याहितनवनवीभावमखिलं
प्रणिण्वाणाः स्पष्टं युगपदिह ते पांतु जिनपाः ॥ ३२ ॥
संभुज्यार्थिभिः संविभज्य च यथाविध्येवमेवाथवा
निर्विण्णास्तृणवद्विसृज्य कमलां स्वं स्वं स्वयं केऽपि ये ।
संवेद्यामलकेवलाचलचिदानंदे सदैवासते
ते सिद्धाः प्रथयंतु वः प्रति शिवश्रीसद्विलासान् सदा ॥ ३३ ॥
ज्ञात्वा श्रद्धाय तत्त्वं भजति समरसास्वादमानान्यनीहा-
वृत्त्या प्राणानुसर्पन्मरुदनु च कचानष्टमे ब्रह्मरंध्रे ।
भृश्यत्यज्ञाय मोहो मृतिमयति मनः केवलं चापि माया-
च्छून्यध्यानेन येषां प्रमदभरमिमे योगिनस्तन्वतां वः ॥ ३४ ॥
नार्पत्यान् विस्मयांतर्हितपतनरुजो दत्तझंपान्वितन्वन्
निःश्रेणीकृत्य भोगं वलयितपृथुतन्मूलमाद्राहितांघ्रि ।
श्रीकुंडद्रंगगृह्यावनितरुशिखरा द्यौवतीर्णः स्ववर्ण-
स्यासंगं संगमस्य व्यथितबहुमहाः वीरनाथः स वोऽव्यात् ॥ ३५ ॥

विसर्जनकी विधि हुई ॥ ३६ ॥ उसके बाद गुरुकी आज्ञासे शांति पाठ करके कार्यको

एता आशिषः पठित्वा यष्टुः शिरस्यक्षतान् क्षिपेत् । इत्याशीर्वादविधानम् ।

यज्ञोचितं व्रतविशेषकृतो प्रतिष्ठन् यष्टा प्रतींद्रसहितः स्वयमे पुरावत् ।
एतानि तानि भगवज्जिनयज्ञदीक्षाचिन्हान्यथैष विसृजामि गुरोः पदाग्रे ॥ ३६ ॥

एतत्पठित्वा यज्ञोपवींतादियज्ञदीक्षाचिन्हानि गुरुपादमूले संन्यस्य नमस्येत् । इति यज्ञदीक्षाविसर्जनम् । ततो गुर्वनुज्ञया शांतिभक्त्या निष्ठापयेत् । अथ जिनप्रतिष्ठानिष्ठापनक्रियायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावंदनास्तवसमेतं शांतिभक्तिकायोत्सर्गं करोम्यहं । शेषं पूर्ववत् । ततश्चैशान्यदिशमष्टदलकमलमालिख्य चैत्याभिमुखमेतत्पठित्वा पंचागं प्रणामादिक्पालेभ्यो निजनिजमंत्रपूतयज्ञांगशेषेण सर्वशः पूजां दत्त्वा जिनगंधोदकतीर्थोदककलशैः सर्वशांतयेम्भः संप्लावयेत् ।

ज्ञानतोऽज्ञानतो वाथ शास्त्रोक्तं न कृतं मया तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जिनप्रभोः ॥ ३७॥

ततश्च क्षमापणाविधिमिममनुतिष्ठेत् ।

समाप्त करे । वह ऐसे है कि–" अथ जिन " इत्यादि " करोम्यहं " तक बोलकर समाप्ति विधि करे । उसके बाद समाधि भक्ति करे । उसके बाद ईशानदिशामें आठ पत्रोंवाला कमल बनाकर प्रतिमाके सामने " ज्ञानतो " इत्यादि श्लोक पढकर पंचांग प्रणाम करे । फिर पूजाकी बची हुई सामग्री सबको चढानेकेलिये देकर कलशोंसे जलधारा सब विघ्नोंकी शांतिके लिये चढावे । " ज्ञानतो " इत्यादिका अर्थ–हे जिनेंद्र मैंने जानकर अथवा अज्ञानसे शास्त्रकथितरीतिसे जो क्रिया नहीं की है वह सब आपके प्रसादसे समाप्त ही हो

चतुर्विधमहासंघं संतर्प्याहारभेषजैः । योग्योपकरणं दत्वा यष्टा संपूजयेत्स्वयम् ॥ ३८ ॥
अत्र ये द्रष्टुमायाता प्रतिष्ठाव्यापृताश्च ये । तांबूलगंधपुष्पाद्यैस्तान संमान्य विसर्जयेत् ॥ ३९ ॥
प्रतिष्ठाचार्यमानम्य तस्यात्मानं समर्प्य च । वस्त्राभरणाद्यैश्च संपूज्य क्षमयेत्ततः ॥ ४० ॥
संमान्य सूत्रधारादीन् स्वर्णवस्त्रान्नभूषणैः । गांधर्वनर्तकादींश्च यथार्हं तत्समर्पयेत् ॥ ४१ ॥
सार्वकालिकपूजार्थं भूसुवर्णार्पणादिकम् । वित्तानुसारतो दद्यात्पूजोपकरणानि च ॥ ४२ ॥

इति क्षमापना ।

॥३७॥ उसके वाद क्षमा करानेकी विधि करे । वह इस तरह है—प्रतिष्ठा करानेवाला यजमान जिनकल्याणक महोत्सवके वाद आहार औषध दानसे मुनि अर्जिका श्रावक श्राविका—इन चारों संघोंको संतुष्ट करके और उनके योग्य धर्मसाधनके उपकरण (शास्त्र वगैरः) देकर आप उनकी पूजा करे ॥ ३८ ॥ उसके वाद जो प्रतिष्ठा देखनेकेलिये आये हों अथवा प्रतिमाकी प्रतिष्ठा करानेके अभिप्रायसे आये हों उन सबको पान सुपारी फूलोंकी माला आदिसे सत्कार करके जानेको कहे ॥ ३९ ॥ उसके वाद प्रतिष्ठाचार्यको नमस्कार कर उसको कुछ भेंट देकर कपड़े और आभूषण आदिसे संमानकर क्षमा करावे ॥ ४० ॥ प्रतिष्ठाके सहायक तथा गंधर्व व नृत्यकरनेवालोंको वस्त्र अन्न आभूषण और कुछ धन योग्यताके अनुसार दे ॥ ४१ ॥ उसके वाद जिनप्रतिमाकी हमेशा पूजा होनेके लिये जमीन रुपया या कुछ जायदाद आमदनीके अनुसार दे कि जिसमें मंदिर पूजा हमेशा होती रहे और पूजाके उपकरण (वर्तन आदिक)

इत्यर्हत्प्रतिमान्यासविधिर्व्यासेन वर्णितः । तादृक्सामग्र्यभावेसौ मध्यवर्त्यपि कल्पितः ४३

तद्यथा ।

कृत्वा पुराकर्म कृतमंडपादिप्रतिष्ठितिः । मंत्रैरेवार्चयित्वा च मंडलान्यखिलान्यपि ॥ ४४ ॥
प्रतिष्ठेयां निरूप्यार्चां प्रयुक्तसकलक्रियः। संस्कृत्याकरशुद्ध्याथ वेदीपीठे निवेशयेत् ॥४५॥
कृत्वा कल्याणसंस्कारमालामंत्रादिरोहणम् । दत्वा तिलकमंत्राधिवासना संप्रकाशने ॥४६॥
सन्नेत्रोन्मीलने कृत्वा कृत्वा चाभिषवादिकम्। संक्षेपेणाथ शक्तिश्चेन्नुभक्तः स्थापयेत्प्रभुम्४७
तत्रैकमेव सज्जायाग्रर्चयेद्यागमंडलम् । द्वास्थानंतरमथैव यजेच्च श्र्यादिदेवताः ॥ ४८ ॥

वनवाके दे ॥ ४२ ॥ यह क्षमावनीकी विधि समाप्त हुई ॥ इसप्रकार अर्हंतकी प्रतिमाकी स्थापना विधि विस्तारसे वर्णन की गई है । यदि उतनी सामग्री न हो तो मध्यमरीतिसे भी स्थापना होसकती है ॥४३॥ वह इसतरह है । मंडपादि वनवाकर मंडलादिकी रचना कर उन सबको केवल मंत्रोंसे ही पूजकर प्रतिष्ठा होनेवाली जिन प्रतिमाको आकर शुद्धि आदि कही गई विधिसे संस्कारित करके वेदीके सिंहासन पर विराजमान करे ॥ ४४ । ४५ । ४६ ॥ फिर पांच कल्याण संस्कारमालारोपण तिलक अभिषेकादि करे ॥ यह मध्यमरीति है । जिसकी थोड़ी शक्ति हो वह दो वार भोजनकी प्रतिज्ञा कर प्रभुकी स्थापना करे ॥ ४७ ॥ उसके वाद एक यागमंडलकी पूजा करे फिर द्वारपाल और श्री आदि देवताओंकी पूजा करके मंडपके वाहर शुद्ध स्थानमें ऊंचे आसनपर मूर्तिको विराजमान करके अभिषेक करे ।

ततो मंडपवाह्यैकोदेशेर्चाया सुसंस्कृते । कुर्यादाकरशुद्धिं तां शेषं मध्यवदाचरेत् ॥ ४९ ॥

इति मध्यमसंक्षिप्तप्रतिष्ठानुष्ठानविधानम् ।

प्रासादस्य ध्वजं चिन्हं तेनासौ शोभते यतः । शुभप्रदश्च सर्वेषां तस्मात्तमधिरोपयेत् ॥ ५० ॥
हस्तत्रिभागविस्तीर्णैरर्धहस्तायतैर्दृढैः । वस्त्रोत्तमसुसंश्लिष्टैर्ध्वजं निर्मापयेच्छुभम् ॥ ५१ ॥
सितं रक्तं सितं पीतं सितं कृष्णं पुनः पुनः । यावत्प्रासाददीर्घत्वं तावत्संघट्टयेत् क्रमात् ५२
चंद्रार्धचंद्रमुक्तास्रक्किंकिणीतारकादिभिः । नाना सद्रूपयुग्मैश्च चित्रैः पत्रैर्विचित्रयेत् ॥ ५३ ॥
अधश्छत्रत्रयं मूर्धस्तस्याधः पद्मवाहनम् । तस्याधः कलशं पूर्णं पार्श्वयोः स्वस्तिकं लिखेत् ५४
दीपदंडौ लिखेत्स्वस्ति शिखायाः पार्श्वयोस्तथा । पार्श्वयोरातपत्रस्य श्वेतचामरयुग्मकम् ॥५५॥

और वाकी क्रियाओंको अर्थात् क्षमावनी आदिको पूर्वकथित रीतिसे करे ॥ ४८ । ४९ ॥ यह मध्यम और संक्षेपरीतिसे प्रतिष्ठाकी विधि कही गई है ॥ उसके वाद जिन मंदिरके शिखरपर धुजाको चढावे उससे मंदिरकी शोभा होती है और सबको कल्याण देता है ॥ ५० ॥ बारह अंगुल लंबी और आठ अंगुल चौड़ी मजबूत उत्तम कपड़ेकी धुजा बनवावे ॥ ५१ ॥ धुजाका कपड़ा सफेद लाल सफेद पीला सफेद काला फिर सी क्रमसे रंगवाला तयार करावे ॥ ५२ ॥ धुजामें चंद्रमा माला घंटरियां तारे इत्यादि अनेक चिन्ह बनाके चित्रित करे ॥ ५३ ॥ कलश सातिया दीपदंड छत्र चमर धर्मचक्र लिखकर धुजाके ऊपर जिनबिंबका आकार बनावे। उसमें एक छत्र लगावे। उस धुजामें

मूर्धाधो धवलच्छत्रे ध्वजे वा यक्षमालिखेत् । श्यामं चतुर्भुजं हस्तयुग्मेन रचितांजलिम् ५६
पराभ्यां दधतं मूर्ध्नि धर्मचक्रमृजुस्थितम् । जिनबिंबोर्धमूर्धाने श्वेकछत्रसमान्वितम् ॥ ५७ ॥
दीपदंडादिसंयुक्तं नानालंकरणान्वितम् । हस्तिपृष्टसमारूढं सर्वज्ञाख्यममुं लिखेत् ॥ ५८ ॥
अशोकासननिर्यासचंपकाम्रकदंबकाः । पूगवंशादयोन्येपि दंडस्य भवभूरुहाः ॥ ५९ ॥
सादायायाममानार्धं त्रिभागं वा चतुर्थकम् । ध्वजदंडस्य मानं तद्यथाशोभं प्रकल्पयेत् ॥६०॥
प्रासादस्योर्ध्वतुर्यांशे वेदिका वेदिकस्थितम् । आधारं धनदंडस्य यथोक्तं परिकल्पयेत्॥६१॥
अथ मंडलमभ्यर्च्य संक्षेपाद् ध्वजदेवता । प्रतिमाप्यानादिसिद्धमंत्रेणाष्टोत्तरं शतम् ॥ ६२ ॥
स्वधिवास्य ध्वजं स्तुत्वा तन्मंत्रेण घृतादिभिः । अशोकाश्वत्थवत्राद्यदर्भमालाभिवेष्टितम् ६३
ध्वजदंडं समभ्यर्च्य ध्यात्वा रत्नत्रयात्मकम् ।तच्चूलिकां तथैवाभिषिच्य धीशक्तिरूपिणीं६४
संचिंत्य मंडपपुरो गर्ते शाल्यादिपूरिते । पूजिते दधिदूर्वाद्यैस्तदूर्ध्वं स्थापयेद् दृढम् ॥ ६५॥

अशोक चंपा आम कदंब सुपारी वंश आदिके वृक्ष चिन्हित करे ॥ ५४ से ५९ ॥ धजाके दंडेका प्रमाण शोभाके अनुसार होना चाहिये ॥ ६० वह प्रमाण मंदिरकी ऊंचाईसे चौथाई हो तो अच्छा है । और वेदीके ऊपर भी धुजा चढाना चाहिये ॥ ६१ ॥ उसके बाद धुजाके मंडल और प्रतिमाकी स्तुतिकरके अनादिमंत्र (णमोकार मंत्र)को एकसौ आठवार जपकर धुजाको दंडमें लगाके " ॐ नमो " इत्यादि ध्वजारोपणमंत्रको बोल शुभ लग्नमें शिखरमें

मंत्रमुच्चार्य तं दर्पणप्रतिबिंबितयक्षं तज्जलैरभिषिंच्य गंधादिभिश्चार्चयित्वा मुखवस्त्रं दत्वा नयनोन्मीलनं सुमुहूर्ते कुर्यात् । इति ध्वजदेवताप्रतिष्ठाविधानम् ।

एवं कृत्वा ध्वजारोहं पुण्यं प्राप्याद्भुतं कृती । भुक्त्वा तथादिसुभगः श्रेयोनिर्वृतिमश्नुते ॥७८॥

इति ध्वजारोपणविधानम् ।

प्रासादप्रतिमे अनेन विधिना ये कारयित्वार्हतां

भक्त्यानिहुतशक्तयो विदधते नित्याभिषेकादिकान् ।

वेदीके नीचे पूर्व दिशामें धुजाको रख उसमें चिन्हित यक्ष देवको इसप्रकार प्रतिष्ठित करे। "ओं" इत्यादि बोलकर आवाहन स्थापन सन्निधीकरण करे । उसके बाद सर्वौषधीसे मिलेहुए जलाशयके जलसे भरे कलशोंको आगे रख अमृतादि पूर्व कथितमंत्रसे उस जलको मंत्रितकर धुजाके आगे लिखे हुए पत्तेको रख चंदन अक्षत पुष्पोंसे " ओं ह्रीं " इत्यादि मंत्र बोलता हुआ दर्पणमें स्थित यक्षके आकारकी पूजा शुभ मुहूर्तमें करे । यह धुजाकी प्रतिष्ठाविधि कही गई है ॥ इस रीतिसे धुजारोहण करता हुआ बुद्धिमान पुरुष महान पुण्यका उपार्जन करके तथा पुण्यफल भोगके मोक्षसुखको पाता है ॥ ७८ ॥ यह धुजा चढानेकी विधि पूर्ण हुई । मोक्षके इच्छुक जो भव्यजीव अर्हंत जिनका मंदिर और प्रतिमाको तयार कराके अपनी

पूजाज्ञा विभवाधिपत्यमहिमोदग्राः शिवाशाधरा-
स्ते भुक्त्वा पदवीर्भजंति परमानंदैकसांद्रं पदम् ॥ ७९ ॥

इत्याशाधरविरचिते प्रतिष्ठासारोद्धारे जिनयज्ञकल्पापरनाम्नि अभिषेकादिविधानीयो नाम पंचमोऽध्यायः ॥ ५ ॥

शक्तिको न छिपाकर भक्तिसहित प्रतिदिन अभिषेक पूजा करते हैं वे उत्तम भोगोंको भोगकर परमानंद स्वरूप मोक्ष पदको पाते हैं ॥ ७९ ॥

इसप्रकार पं० आशाधर विरचित प्रतिष्ठासारोद्धारमें अभिषेका विधिको कहनेवाला पांचवां अध्याय समाप्त हुआ ॥ ५ ॥

षष्ठोऽध्यायः ॥ ६ ॥



अथ सिद्धप्रतिमादिप्रतिष्ठाविधानान्यभिधास्यामः—

आचार्यो मंडपे रम्ये सद्वेद्यां चूर्णसत्तमैः । स्वस्वमंडलमालिख्य संपूज्य तिलकद्रवैः ॥ १ ॥
हेमादिपात्रे हेमादिलेखन्या यंत्रमुद्धृतम् । तन्मध्ये न्यस्य जात्यादिपुष्पैरष्टोत्तरं शतम् ॥ २ ॥
स्वस्वमंत्रेण संजप्य निविश्योत्तरमंडपे । वेद्यास्नपनपीठेर्चां धूलीकुंभेन पूर्ववत् ॥ ३ ॥
स्नपयित्वा मंगलादिद्रव्यसंदर्भगर्भितैः । तीर्थांबुसंभृतैः कुंभैर्मु . ? पल्लवैः ॥ ४ ॥
दधिदूर्वाक्षतकुशस्रक्चित्रैर्मंत्रसंस्कृतैः . प्रापय्याकरशुद्धिं प्राक् यंत्रस्योपरि विष्टरे ॥ ५ ॥
..........कीर्त्य तस्यामारोप्य तद्गुणान् । आवाहनादिकं कृत्वा तां युंज्यात्तन्मयीं स्मरन् ॥

अव सिद्ध आदिकी प्रतिमाकी प्रतिष्ठाविधिको कहते हैं । प्रतिष्ठाचार्य सुंदर मंडपकी सुंदर वेदीमें उत्तम चूर्णसे अपने २ मांडले लिखकर पूजे । फिर घिसे हुए चंदन या कुंकुसे सोनें आदिके पात्रमें सोनें आदिकी सलाईसे यंत्र लिखकर उसमें एकसौ आठ चमेलीके पुष्पोंको रख अपनें २ मंत्रसे मंत्रित करे । फिर उत्तर मंडपमें वेदीके अभिषेकके सिंहासनपर प्रतिमाको रख जलादिसे अभिषेक पहलेकी तरह करे । ॥ १ । २ । ३ । ४ । ५ ॥ उसके वाद उस प्रतिमामें उसके गुणोंका स्थापनकर तन्मयी स्मरण करता हुआ आवाहना-

तिलकेन सुलग्नेधिवास्य व्यक्तास्यलोचनं । ततोऽभिषिंच्य चाभ्यर्चेत्ततः कुर्यात् क्रियाधिकम्

ततो विशेषः ।

स्नानादिविधिमाधाय सिद्धचक्रं यथागमम् । उद्धृत्य वेदिकापीठे न्यस्य श्रीचंदनादिभिः ॥८॥
संपूज्य सिद्धमात्मानं ध्यायन्नष्टोत्तरं शतम् । जातीपुष्पैर्जपेन्मूलमंत्रेण ज्ञानमुद्रया ॥ ९ ॥

ओंकाराधो त्रिभागी वलयनन्यस्तमूर्द्धाग्निमद्दं
ह्रीं पिंडात्मादितौनाहतममृतपृपरस्यांदिनालं लिखित्वा ।
अस्यौसेत्यौ नयो युक् सकलशशिवृतं तद्बहिस्तद्बहिस्तु
संज्ञानालोकचर्या वलतप इति चानादिसंसिद्धमंत्रः ॥ १० ॥
तद्बाथ स्वरोयं वसुदलकमलं चांतरे तद्दलाना—
मों ह्रीं श्रीं र्हं मुखांत्यानिलवियदमुखा शेषवर्गैश्च युक्तम् ।

दि करे ॥ ६ ॥ फिर शुभ लग्नमें तिलकविधि मुखोद्घाटन नेत्रोन्मीलन आदि पूर्वोक्त क्रिया करके अभिषेकपूर्वक पूजा करे ॥ ७ ॥ यहां एक क्रिया विशेष है कि स्नानादिविधि करके शास्त्रके अनुसार सिद्धचक्रको चंदनादिसे वेदीपर लिखकर पूजके सिद्ध आत्माका ध्यान करता हुआ ज्ञानमुद्रासे एकसौ आठ चमेलीके फूलोंसे जाप करे ॥ ८ । ९ ॥ "ओंकारा" इत्यादि तीन श्लोकोंमें कही गई विधिके अनुसार सिद्धचक्र बनावे ॥ १० । ११ । १२ ॥

विन्यस्यानाहतंते शिरसि विरहितं चांतरालेषु चाद्यं
पंचानां सतायनां वलयतु कुशलः क्रौंरुधामा ययांत्रिः ॥ ११ ॥
पत्रांतमंत्रपूर्वैर्जिनवितनुचतुस्तीर्थसमेधचक्र—
पादू वाक्यैर्ण...ततनुमयानाहतग्रंथनाद्यैः ।
स्वस्वस्थानास्थिताशेषमुपरि दधतं सप्तकं वारकं वा
रवर्णा ब्रह्माणं च स नग्रहमवानिष्टतं सत् करि रं करोति ॥ १२ ॥

इति बृहत्सिद्धचक्रोद्धरणम् ।

साम्री सार्धदुशीर्ष अ.................................... ।
पेतोद्यसारं विनयमुखगुरूद्दिष्टवर्णाविशिष्टं
मंत्रेद्धां सैद्धचक्रं विदधतु सुधियोध्यात्ममध्यात्मबुद्धाम् ॥ १३ ॥
ओं ह्रीं श्रीं अर्हं अ सि आ उ सा इदं वारि गंधं................ ।
ऊर्ध्वाधो रयुतं सविंदु सपरं ब्रह्मस्वरावेष्टितं
वर्गापूरितदिग्गतांबुजदलं तत्संधितत्त्वान्वितम् ।

यह बृहत्सिद्धचक्रका उद्धार हुआ । "साम्री" इत्यादि श्लोकमें कथित रीतिसे लघु सिद्धचक्र वनाके "ओं" इत्यादि बोलकर जलादि चढावे ॥ १३ ॥ "ऊर्ध्वाधो" इत्यादिमें

अंतःपत्रतटेष्वनाहतयुतं ह्रींकारसंवेष्टितं
देवं ध्यायति यः स मुक्तिसुभगो वैरीभकंठीरवः ॥ १४ ॥

इति लघुसिद्धचक्रोद्धरणं । अत्रायं मंत्रः । ओं अर्हं अ सि आ उ सा ह्रीं अर्हं स्वाहा । शेषं पूर्ववत् ।

ततोभिषिच्य तीर्थांभःकुंभैःप्रागुक्तकल्पनैः । गुणैरिवार्चामष्टाभिः सिद्धस्तोत्रं पुरो हितम् ॥ १५ ॥
पठित्वा तद्गुणारोपप्रभृत्याप्याद्य तां स्मरन् । साक्षात्सिद्धं तिलकयेच्चंदनेन सहेंदुना ॥ १६ ॥

आकारशुद्धिं कृत्वा यस्यानुग्रहेत्यादि सिद्धस्तोत्रमधीत्य प्रतिमोपरि पुष्पांजलिं क्षिपेत् । ततः—

आकारैर्वियुतं युतं च युगपन्निध्यातृबोद्धृस्फुटं
विश्वं स्वाभिनिवेशसौम्यमसमानंदैकसंवेदनं ।
स्वस्वादक्षसमक्षमाक्षयतमस्थामावगाहोत्तमं
भात्वत्रागुरुलघ्वनंतगुणमप्यष्टात्मसिद्धं वपुः ॥ १७ ॥

कहे गये सिद्धचक्रका उद्धार करके "ओं" इत्यादि मंत्रका जाप करे ॥ १४ ॥ यह लघुसिद्धचक्रका उद्धार हुआ । शेष विधि पहलेकी तरह करे । फिर सिद्ध प्रतिमाका जलसे भरे हुए घड़ोंसे अभिषेक कर आठ गुणोंको स्मरण करता हुआ तिलक विधि करे ॥ १५।१६ ॥ आकारशुद्धि करके "यस्यानुग्रह" इत्यादि पूर्व कथित सिद्ध स्तोत्रका पाठ करके प्रति-

एतत्पठन्नर्चां समंतात् परामृशेत्। गुणारोपणम्। ओं ह्रीं णमो सिद्धाणं सिद्धपरिमेष्ठिभ्यो नमः अत्रागच्छ। ओं ह्रीं तिष्ठ २ ठ ठ स्वाहा। ओं ह्रीं मम सन्निहितो भव २ वषट् स्वाहा। आवाहनादिमंत्रः। अ सि आ उ सा सिद्धाधिपतये नमः। तिलकमंत्रः। आ-
ततश्च मुखवस्त्रादिविधीन् कृत्वाचरेत् क्रियाम्। सिद्धभक्त्यैवमाचार्याद्यर्चान्यासेपि कल्पयेत्॥

ओं ह्रीं सिद्धाधिपतये मुखवस्त्रं ददामीति स्वाहा। मुखवस्त्रमंत्र। ओं ह्रीं सिद्धाधिपतये मुखवस्त्रमपनयामीति स्वाहा। श्रीमुखोद्घाटनमंत्रः। ओं ह्रीं सिद्धाधिपतये प्रबुध्यस्व २ ध्यातृजनमनांसि पुनीहि पुनीहीति स्वाहा। नेत्रोन्मीलनमंत्रः। ओं ह्रीं सिद्धाधिपतिं तीर्थोदकेनाभिषिंचामीति स्वाहा। तीर्थोदकस्नपनम्। ओं ह्रीं पुंड्रेक्षुप्रमुखरसैरभिषिंचामीति स्वाहा। रसस्नपनं। ओं ह्रीं हैयंगवीनघृतेन स्नपयामीति स्वाहा। घृतस्नपनम्। ओं ह्रीं धारोष्णगव्यक्षीरपूरेणाभिषुणोमीति स्वाहा। दुग्धस्नपनं। ओं ह्रीं जगन्मंगलेन दध्ना स्नपयामीति स्वाहा। दधिस्नपनं। ओं ह्रीं दिव्यप्रभूतसुरभिकषायद्रव्यकल्ककाथचूर्णैरुपस्करोमीति स्वाहा। उद्वर्तनादिविधानम्। ओं ह्रीं विचित्रपवित्रमनोरमफलैर-

माके ऊपर पुष्पांजलि क्षेपण करे। उसके बाद "आकारे" इत्यादि बोलकर प्रतिमाका चारोंतरफसे स्पर्श करे॥ १७॥ "ओं ह्रीं" इत्यादि मंत्रसे आवाहनादि करे "असि" इत्यादि तिलकमंत्रसे तिलकदान विधि करे। उसके बाद मुखोद्घाटन नेत्रोन्मीलन सिद्धभक्ति आदि विधी करे। इसीतरह आचार्य आदिकी भी प्रतिमास्थापनामें पूर्वकथित

वतारयामीति स्वाहा । फलावतारणं । ओं परमसुरभिद्रव्यसंदर्भपारिमलगर्भतीर्थांबुसंपूर्णसुवर्णकुंभाष्टकतो-
येन परिषेचयामीति स्वाहा । कलशाष्टकाभिषेकः । एष मंत्र आकरशुद्ध्यभिषेकेपि योज्यः । ओं ह्रीं
परमसौमनस्यनिबंधनगंधोदकपूरेणाप्लावयामीति स्वाहा । गंधोदकस्नपनमंत्रः । ओं ह्रीं असि आ
उ सा सिद्धाधिपतिं लोकोत्तरनीरधाराभिः परिचरामीति स्वाहा । तीर्थोदकमंत्रः । एवं हरिचंदनेप्यूह्यं
मंत्राष्टकम् । हरिचंदन इव कलमक्षतपुंजाष्टकमंदारप्रमुखकुसुमदामार्द्धि विविधसान्नायान्नसारदशामुख-
प्रदीपितदीपकाष्टकसुगंधद्रव्यसंयोजनादिशेषसंभूतध्वजधूपघटाष्टकबंधुरगंधवणरसप्रीणितबहिरंतःकरणम-
हाफलस्तवकाष्टकजलादियज्ञां दूर्वादर्भदधिसिद्धार्थादिमंगमद्रव्यविनिर्तितमहार्घसत्कारोपचारैः परिचरा-
मीति स्वाहा । जलाद्यर्नीतसपर्याविधानम् । ततः क्रियां कृत्वाभिमतप्रार्थनार्थमिदं पठित्वा पुष्पांजलिं
प्रकल्पयेत् ।

आयुर्द्राघयतु व्रतं द्रढयतु व्याधीन् व्यपोहत्वयं
श्रेयांसि प्रगुणीकरोतु वितनोत्वासिंधु शुभ्रं यशः ।
शत्रून् शातयतु श्रियोभिरमयत्वश्रांतमुन्मुद्रय-
त्वानंदं भजतां प्रतिष्ठित इह श्रीसिद्धनाथः सताम् ॥ १९ ॥

क्रिया ५८ ॥ १८ ॥ " ओं " इत्यादि मंत्र बोलकर मुखोद्घाटन नेत्रोन्मीलन जलादि भि-
षेक पूजा आदि क्रिया करनी चाहिये । उसके बाद इष्ट प्रार्थनाके लिये " आयु " इत्यादि

ततश्च पूर्ववद्विसर्जनादिकमनुतिष्ठेत् इति सिद्धप्रतिष्ठाविधानम् । अथाचार्यप्रतिष्ठाविधानम् ।
गणभृद्वलयं वेद्यामभ्यर्च्य स्नपयेच्च तम्। पंचाचारान् स्मरेत्पंच कलशांश्चतुरः पुनः ॥ २० ॥
चतुरोत्रानुयोगांश्च..................निर्त्रीणि तन्मनाः ॥ २१ ॥
ततो महर्षिस्तवनं पठित्वा चतुरो विधीन्। कृत्वा तिलकयेत्साक्षात्सूर्यादीन् प्रतिमां स्मरन्॥२२
मुखवस्त्रादिकर्माणि विधाय च विधिं ततः। क्रियाकांडोदितां कृत्वा यथावद्विधिमाचरेत् ॥२३॥

अथ गणधरवलयमनुशिष्यते । पूर्वं षट्कोणचक्रे क्ष्मावीजाक्षरं लिखेत् तदुपरि अर्हं इति न्यसेत् तस्य दक्षिणतो वामतश्च ह्रीं विन्यसेत् पीठादधः श्रीं न्यसेत् । ततः ओं अ सि आ उ सा स्वाहेत्यनेन श्रीकारस्य दक्षिणतः प्रभृत्युत्तरतो यावत्प्रादक्षिण्येन वेष्टयेत् । ततः कोणेषु षट्स्वपि मध्ये अप्रतिचक्रे फडिति सव्येन स्थापयेत् । तथा कोणांतरालेषु विचक्राय स्वाहेति षड्बीजानि झौंकारोत्तराणि अपसव्ये

श्लोक पढकर पुष्पांजलि क्षेपण करे ॥ १९ ॥ फिर पूर्वकी रीतिसे विसर्जन आदि करे । यह सिद्धप्रतिमाकी प्रतिष्ठा विधि कही गई ॥ अब आचार्यप्रतिष्ठाकी विधि कहते हैं । बुद्धिमान् गणधर वलय (चक्र) को वेदीमें स्थापन कर पांच कलशोंसे स्नपन करे और दर्शनाचार आदि पांच आचारोंको स्मरण करता हुआ उस चक्रकी पूजा करे ॥ २० ॥ फिर चार अनुयोगोंका चिंतवन करके महर्षिस्तवन पढके तिलकादि क्रिया करे ॥ २१।२२ २३ ॥

विन्यसेत् । तद्बहिर्वलयं कृत्वाष्टसु पत्रेषु णमो जिणाणं, णमो, ओहिजिणाणं णमो कुट्ठबुद्धीणं, णमो बीजबुद्धीणं, णमो पदाणुसारीणं—इत्यष्टौ पदानि क्रमेण लिखेत् । ततस्तद्बहिस्तद्वत् षोडशपत्रेषु णमो संभिण्णसोदाराणं, णमो पत्तेयबुद्धाणं, णमो सयं बुद्धाणं, णमो बोहियबुद्धाणं, णमो उजुमदीणं, णमो विउलमदीणं, णमो दसपुव्वीणं, णमो अट्ठंगमहाणिमित्तकुसलाणं, णमो विउव्वणइड्ढिपत्ताणं, णमो सिज्जाहराणं, णमो चारणाणं, णमो समणाणं, णमो आगासगामीणं, णमो आसिविसाणं, णमो दिट्ठिविसाणं—इति षोडशपदानि विलिखेत् । ततस्तद्बहिस्तद्वच्चतुर्विंशतिपत्रेषु णमो घोरगुणपरक्कमाणं, णमो घोरगुणवंभयारीणं, णमो आमोसहिपत्ताणं, णमो खेल्लोसहिपत्ताणं, णमो जल्लोसहिपत्ताणं, णमो विडौसहिपत्ताणं, णमो सव्वोसहिपत्ताणं, णमो मणबलीणं, णमो वचिबलीणं, णमो कायबलीणं, णमो खीरसवीणं, णमो सप्पिसवीणं, णमो महुरसवीणं, णमो अमियसवीणं, णमो अक्खीणमहाणसाणं, णमो वड्ढमाणाणं, णमो लोए सव सिद्धायदणाणं, णमो भयवदो महदि महावीर वड्ढमाण बुद्धिरिसीणं । चतुर्विंशतिपदान्यालिख्य ह्रींकारमात्रया त्रिगुणं वेष्टयित्वा क्रौंकारेण निरुद्ध्य बहिः पृथ्वीमंडलं ह्रीं श्रीं अर्हं असि आउसा अप्रतिचक्रे फट् विचक्राय झ्रौं झ्रौं स्वाहा । अनेन मध्यपूजां विदध्यात् । णमो अरहंताणं णमो जिणाणं इत्यादि ह्रां ह्रीं ह्रूं ह्रौं ह्रः असि आउसा अप्रतिचक्रे झ्रौं

“ अथ ” इत्यादिसे कहे गये गणधरचक्रको बनावे । और पूर्वकी तरह आकरशुद्धि आदि क्रिया करके “ निर्वेद ” इत्यादि महर्षि स्तवन पढता हुआ आचार्य आदिकी प्रतिमाको

झ्रौं स्वाहा। एतेष्ट चत्वारः। अथ पूर्ववदाकरशुद्ध्यादिकं कृत्वा निर्वेदेत्यादि महर्षिस्तवनं पठन्नर्चां समंतात्परामृष्य गुणारोपणं कुर्यात्। ओं ऱ्हूं णमो आइरियाणं आचार्यपरमेष्ठिन्नत्र एहि २ संवौषट् ओं ऱ्हूं तिष्ठ २ ठ २, ओं ऱ्हूं मम सन्निहितो भव २ वषट्। तथा ओं ह्रीं णमो उवज्झायाणं उपाध्यायपरमेष्ठिन्नत्र एहि २ संवौषट् ओं ह्रौं तिष्ठ २ ठ ठ, ओं ह्रौं सन्निहितो भव भव वषट्। तथा ओं ह्रः णमो लोए सव्वसाहूणं साधुपरमेष्ठिन्नत्र एहि २ संवौषट्। ओं ह्रः तिष्ठ २ ठ ठ, ओं ह्रः सन्निहितो भव २ वषट्। इत्याचार्यादीनामावाहनादिमंत्राः। ततश्च ओं ऱ्हूं णमो आइरियाणं धर्माचाराधिपतये नमः इत्यादिमंत्रैः सिद्धप्रतिमावत्तिलकादिविधीन् विदध्यात्। एवमुपाध्यायसाधुपरमेष्ठिनोरपि कल्पः कल्पयेत्॥ इत्याचार्यादिप्रतिष्ठाविधानम्। अथ श्रुतदेवतादिप्रतिष्ठाविधानम्।

वेद्यां सारस्वतं यंत्रं विलिख्य तस्य शोधनम्। अनुयोगैरिवाचार्यैश्चतुर्भिस्तीर्थवार्घटैः॥२४

यंत्रेर्चां न्यस्य गां स्तुत्वा कृत्वा कर्मचतुष्टयम्।........त यन्मूलमंत्रेणान्यं विधिं सृजेत्२५

स्पर्श करके उसमें गुणोंका स्थापन करे। फिर "ओं ह्रं" इत्यादि बोलकर आचार्य उपाध्याय सर्वसाधुका आवाहन आदि करे। उसके बाद "ओं ह्रं" इत्यादि मंत्रसे सिद्ध प्रतिमाकी तरह तिलक आदि विधि करे। यह आचार्य आदि धर्मगुरूकी प्रतिष्ठाविधि हुई॥ अब सरस्वतीकी प्रतिष्ठा विधि करते हैं। प्रतिष्ठाचार्य वेदीमें सारस्वत यंत्र लिखकर उसको सामनेके दर्पणमें प्रतिबिंबित कर चार जलके घड़ोंसे अभिषेक करे। उस यंत्रमें सरस्वतीकी मूर्तिको रख स्तुतिपूर्वक पूजा करे तथा सरस्वतीमंत्रका जाप करे॥ ॥ २४। २५॥

अथ सारस्वतमंत्रमनुशिष्येत् । पूर्वं कर्णिकायां ह्रींकारमालिखेद्बाह्ये हंकारं सविसर्गसकारं च लिखित्वा ओं ह्रीं श्रीं वद २ वाग्वादिनि भगवति सरस्वति ह्रीं नमः इत्यनेन मूलमंत्रेण वेष्टयेत् । तद्बहिः पूर्वादिक्रमेण चतुर्षु ओं वाग्वादिन्यै नमः, ओं भगवत्यै नमः, ओं सरस्वत्यै नमः, ओं श्रुतदेव्यै नमः । इति चतुराख्या लिखेत् । तद्बहिरष्टसु पत्रेषु ओं नंदायै नमः, ओं स्तंभिन्यै नमः इत्यादि चाष्टौ देवीर्लिखेत् । तद्बहिश्च षोडशपत्रेषु ओं रोहिण्यै नमः इत्यादि मंत्रैः षोडश विद्यादेवीः स्थापयेत् । ततः पूर्वाद्यष्टदिक्षु इंद्राय स्वाहेत्यादिमंत्रैरष्टौ दिक्पालान् विन्यसेत् । पूर्वैशानदिशोश्चांतराले ओं अधोनागेभ्यः स्वाहेति नागान् विन्यसेत् । पश्चिमदिक्पालस्योपरिष्टाच्च ओं ऊर्ध्वब्रह्मणे नमः इति परमब्रह्म प्रतिष्ठयेत् । इंद्रादवश्च ओं ह्रीं मयूरवाहिन्यै नमः इति वागधिदेवतां स्थापयेत् । ततस्त्रिर्मायामात्रया क्रौंकारेण निरुध्य तदावेष्ट्य बहिः पृथ्वीमंडलं विलिखेत् इति । अथ ओं ह्रीं श्रुतदेव्यः कलशस्नपनं करोमीति स्वाहा । इत्यनेन कलशानभिमंत्र्याकरं शोधयेत् । ततो बोधेनेत्यादि श्रुतदेवीस्तवनं पठित्वा प्रतिमोपरि पुष्पांजलिं क्षिपेत् ।

बारह अंगं गिज्जा दंसणतिलया चरित्तवच्छहरा ।
चोदसपुव्वहराणं ठावे दव्वाय सुयदेवा ॥ २६ ॥

अब सरस्वतीयन्त्रका उद्धार दिखलाते हैं । पहले कर्णिका (बीचके भाग) में " ह्रीं " लिखे उसके बाहर " हं सः " लिखकर " ओं ह्रीं श्रीं वद २ वाग्वादिनि भग-

आचारं शिरसि सूत्रकृत् वक्त्रांतु कंठिका । स्थानेन समवायागव्याख्याप्रज्ञप्तिदोर्लताम् ॥२७
वाग्देवतां ज्ञातृकथोपासकाध्ययनस्तनी । अंतकृद्दशसन्नाभि मनुत्तरदशां गतः ॥ २८ ॥
सुनितंबां सुजघनां प्रश्नव्याकरणश्रुतात् । विपाकसूत्रदृग्वादचरणांबरां ? ॥ २९ ॥
सम्यक्त्वतिलकां पूर्वचतुर्दश विभूषणाम् । तावत्प्रकीर्णकोदीर्णचारुपत्रांकुरश्रियम् ॥ ३० ॥
आप्तदृष्टप्रवाहौघद्रव्यभावाधिदेवताम् । परब्रह्म पथादृशां स्याद्युक्ति भुक्तिमुक्तिदाम् ॥३१॥
सर्वदर्शनपाखंडदेवदैत्यं खगार्चिता । जगन्मातरमुद्धर्तुं जगदत्रावतारयेत् ॥ ३२ ॥

वति सरस्वति ह्रीं नमः" इस सरस्वतीमंत्रको चारों तरफ वेढै । उसके बाहर पूर्व आदि दिशाके क्रमसे चार पत्तोंपर "ओं वाग्वादिन्यै नमः" इत्यादि चारोंको लिखे । उसके बाहर आठों पत्तोंपर "ओं नंदायै नमः" इत्यादि आठ देवियोंको लिखे । उसके सोलह पत्तोंपर "ओं रोहिण्यै नमः" इत्यादि सोलह विद्यादेवियोंको लिखे । उसके बाहर पूर्व आदि आठ दिशाओंमें "इंद्राय स्वाहा" इत्यादि मंत्रोंसे आठ दिक्पालोंको स्थापन करे । पूर्व और ईशान्य दिशाओंके बीचमें "ओं अधो नागेभ्यः स्वाहा" लिखकर नागकुमारकी स्थापना करे । पश्चिमदिशाके दिक्पालके ऊपर "ओं ऊर्ध्वब्रह्मणे नमः" ऐसा लिखकर परमब्रह्मकी स्थापना करे । इंद्रके नीचे "ओं ह्रीं मयूरवाहिन्यै नमः" लिखकर सरस्वती देवीकी स्थापना करे । उसके बाद तीनवार ईकारसे तथा क्रों से वेढकर बाहर पृथ्वीमंडल लिखे ॥ फिर "ओं ह्रीं" इत्यादि मंत्रसे कलशोंको मंत्रितकर

ओं अर्हन्मुखकमलवासिनि पापानि क्षयं कर श्रुतज्वालासहस्रप्रज्वलिते सरस्वति मम पापं हन २ क्षां क्षीं क्षूं क्षौं क्षः क्षीरवरधवले अमृतसंभवे वं वं हुं स्वाहा । एतत्पठन् प्रतिमायां अंग-प्रत्यंगपरामर्शं कुर्यात् । गुणारोपणं । ओं ह्रीं श्रीं अत्र एहि २ संवौषट्, ओं ह्रीं तिष्ठ २ ठ ठ, ओं ह्रीं सन्निहितो भव वषट् । आवाहनादिमंत्रः । ततो मूलमंत्रेण तिलकं दत्वा पूर्ववदाधिवासनाविधीन् विदध्यात् ।

शुभे शिलादावुत्कीर्य श्रुतस्कंधमपि न्यसेत् । ब्राह्मीन्यासविधानेन श्रुतस्कंधमिह स्तुयात् ३३
सुलेखकेन संलिख्य परमागमपुस्तकम् । ब्राह्मीं वा श्रुतपंचम्यां सुलग्ने वा प्रतिष्ठयेत् ३४

आकरशुद्धि करे । उसके बाद " बोधेन " इत्यादि श्रुतदेवीका स्तवन पढकर प्रतिमाके ऊपर पुष्पांजलि क्षेपण करे । उसके बाद " बारह " इत्यादि सात श्लोक तथा " ओं अर्हं " इत्यादि मंत्र बोलकर सरस्वतीप्रतिमाके अंगोंका स्पर्श करें ॥ २६ से ३२ तक ॥ फिर गुणोंका स्थापन करे । उसके बाद " ओं " इत्यादि मंत्र बोलकर आवाहन आदि करे । उसके बाद मूलमंत्रसे तिलक देकर पूर्वरीतिके अनुसार अधिवासना आदि क्रियाओंको करे । उत्तम शिला आदिमें सरस्वतीकी मूर्ति खुदवाकर स्थापना करके स्तुति करे ॥ ३३ ॥ अथवा परमागमके शास्त्रोंको अच्छे विद्वान् लेखकसे लिखवाकर श्रुतपंचमीके दिन शुभ लग्नमें सरस्वतीप्रतिष्ठा करे ॥ ३४ ॥

संवौषट् स्वाहेत्यादि दिक्कुमारीमंत्रानष्टौ तद्बहिर्वलयांतः, ओं ह्रीं क्रौं यक्षवैश्वानररक्षो नहृतपन्नगासुरकुमारसंविश्वविद्यमालिचमरवैरोचनमहाविद्यमारोविद्येश्वरपिंडभुगभिधानपंचदशतिथिदेवान् संस्थापयामि स्वाहेति तिथिदेवाः पंचदश तद्बहिर्वलयांतः, ओं ह्रीं क्रौं सूर्यसोमांगारकसौम्यगुरुभार्गवशनिराहुकेतून् संस्थापयामि स्वाहेति ग्रहदेवान्नव तद्बहिर्मंडलांतः, ओं ह्रीं क्रौं किंनरेंद्रकिंपुरुषेंद्रमहोरगेंद्रगंधर्वेंद्रयक्षेंद्रराक्षसेंद्रभूतेंद्रपिशाचेंद्रान् संस्थापयामि स्वाहेति विलिखेत् । एवंमंडलं वर्तयित्वा स्वस्वमंत्रैर्यक्षादिदेवान् जलगंधादिभिरभ्यर्च्य कलशाष्टकादिभिर्वेदीं भूपयेत् । अथ स्नपनमंडपे तां प्रतिमामानीय दर्भप्रस्तरे धान्यप्रस्तरे वा स्थापयित्वा क्रमेण स्नापयेत् । ततस्तत्रैव वेदिकायां नवकलशान् सर्वालंकारोपेतान् सर्वौषधिसंमिश्रशुद्धयंत्रमंत्रान्विततीर्थजलपरिपूर्णान् शालिप्रस्तरोपरि लिखितमायावीजां संलेख्य तत्पश्चिमभागे स्नपनपीठं स्थापयित्वा प्रक्षाल्यालंकृत्य तदुपरि भुवनाधिपतिं लिखित्वा अक्षतपुष्पदर्भान् विरचय्य तत्तत्प्रतिमां तत्र संस्थापयित्वा पंचोपचारविधिनाभ्यर्च्य वाहनाष्टकलशैर्मंत्रपूर्वकमभिषिच्य चतुर्नीराजनं कृत्वा पुष्पांजलिपूर्वकमेकादशमभिषेकं मध्यकलेशनामृतमंत्रेण कुर्यात् ।

तेजोमायादिकाख्यानं क्रियान्वितम् । तत्तत्पल्लवसंयुक्तं करोम्यंतपदं स्मरेत् ॥ ४९ ॥

इत्यादिमें कथित विधिसे पूजा करे । अमृतमंत्रसे यक्षप्रतिमाका अभिषेक करे । " तेजो " इत्यादि बोलकर " अथैव " इत्यादिसे कही हुई विधिसे स्थापना करे ॥ ४९ ॥ इसीप्रकार

अथैवमाकारशुद्धिं विधाय मूलवेद्या नवधौतवस्त्रसदर्भाक्षतपुष्पं प्रस्तीर्य तत्र तत्प्रतिमां निवेश्याभ्यर्च्य कांडाग्रदूर्वाग्रेण प्रोक्षणं विधाय शांतिहोमं यक्षमंत्रेण कृत्वा पुण्याहं घोषयित्वा पूर्वोक्तविधिना सुमुहूर्ते तिलकं दद्यात् ततोऽधिमानादिविधिं विधाय वस्त्राभरणमाल्यादिभिरभ्यर्च्य विसर्जनादिकं कुर्यात् । ततः प्रभृति च तानि संपूजयेत् ।

एष एव च शेषाणां यक्षाणां स्थापनाविधिः । यक्षीणां च पितः·········भेदाश्रयौ भवेत ५०
क्षेत्रपालं कर्णिकायां मंत्रपत्रायुधादिभिः । सचूर्णवेद्यामालिख्य पत्रेष्वष्टसु संलिखेत् ॥५१॥
समंत्रान् दिक्पतीनिंद्रादधोभागानुपर्यपि । वरुणस्य लिखेत्सोमं मायोर्वीभ्यां च वेष्टयेत ५२
तत्पद्मं पूजयेद्गंधपुष्पधूपाक्षतादिभिः । अथ तत्प्रतिमां रात्रिमुषितां दर्भसंस्तरे ॥ ५३ ॥
तीर्थांबुस्नपितां तत्र निवेश्यारोप्य तद्गुणान् । आवाहनादि कृत्वा च सूत्रयुक्त्या प्रतिष्ठयेत् ५४

ओं ह्रां क्रौं घोरांधकारसप्रभमंडलगदाधारणव्यग्रोग्रचतुर्भुज अत्र क्षेत्रपालाय संवौषट् स्वाहेति कर्णिकायामालिख्य पूर्वादिदलेष्वष्टसु । ओं ह्रीं इंद्राय स्वाहेत्यादिक्रमेण दिक्पालान् संस्थाप्य इंद्राधः ओं ह्रीं नागेभ्यः स्वाहेति वरुणादूर्ध्वं च ओं ह्रीं सोमाय स्वाहेति विन्यस्य बहिर्मायामात्रया त्रिःपरिक्षिप्य क्रौंकारेण निरुध्य भूमंडलेन वेष्टयेदिति मंडलवर्तनम् ।

यक्षी क्षेत्रपाल वरुण आदिकी प्रतिमा "एष" इत्यादि पांच श्लोकोंमें कथित रीतिसे

एनं सम्यगधीत्य ये गुरुमुखाद्बुध्वा तदर्थं क्रिया
निर्मास्यंति सुमेधसो बुधनताः प्राप्स्यंति ते निर्वृत्तिम् ॥ ६५ ॥

इत्याशाधरविरचिते प्रतिष्ठासारोद्धारे जिनयज्ञकल्पापरनाम्नि सिद्धादि-
प्रतिष्ठाविधानीयो नाम षष्ठोऽध्यायः ॥ ६ ॥

विधिको कहनेवाले जिनयज्ञकल्प द्वितीय नामवाले प्रतिष्ठासारोद्धार ग्रंथको मुझ " आशाधरने " कल्याण होनेकेलिये किया है। जो भव्यजीव गुरुके मुखसे इसको पढकर इसकी क्रियायें करेंगे वे बुद्धिमान देवोंसे पूजित हुए परंपरासे मोक्षको पायेंगे ॥ ६५ ॥

इसप्रकार पं० आशाधर विरचित जिनयज्ञकल्प दूसरे नामवाले प्रतिष्ठासारोद्धारमें
सिद्ध आदिकी मूर्तिप्रतिष्ठाको कहनेवाला छठा अध्याय समाप्त हुआ ॥ ६ ॥



ग्रंथकर्तुः प्रशस्तिः ।

श्रीमानस्ति सपादलक्षविषयः शाकंभरीभूषण-
स्तत्र श्रीरतिधाम मंडलकरं नामास्ति दुर्गं महत् ।
श्रीरत्न्यामुदपादि तत्र विमलव्याघ्रेरवालान्वया-
च्छ्रीसल्लक्षणतो जिनेंद्रसमयश्रद्धालुराशाधरः ॥ १ ॥

सरस्वत्यामिवात्मानं सरस्वत्यामजीजनत् । यः पुत्रं छाहडं गुण्यं रंजितार्जुनभूपतिम् ॥२॥

व्याघ्रेरवालवरवंशसरोजहंसः काव्यामृतौघरसपानसुतृप्तगात्रः ।
सल्लक्षणस्य तनयो नयविश्वचक्षुराशाधरो विजयतां कलिकालिदासः ॥ ३ ॥

इत्युदयसेनमुनिना कविसुहृदा योभिनंदितः प्रीत्या ।
प्रज्ञापुंजोसीति च योभिमतो मदनकीर्तियतिपतिना ॥ ४ ॥

म्लेच्छेशेन सपादलक्षविषये व्याप्ते सुवृत्तक्षति-
त्रासाद्विंध्यनरेंद्रदोःपरिमलस्फूर्जत्त्रिवर्गौजसि ।
प्राप्तो मालवमंडले बहुपरीवारः पुरीमावसन्
यो धारामपठज्जिनप्रमितिवाक्शास्त्रे महावीरतः ॥ ५ ॥

आशाधरत्वं मयि विद्धि सिद्धं निसर्गसौन्दर्यमजर्यमार्य ।
सरस्वतीपुत्रतया यदेतदर्थे परं वाच्यमयं प्रपंचः ॥ ६ ॥

इत्युपश्लोकितो विद्वद्विल्हणेन कवीशिना । श्रीविन्ध्यभूपतिमहासान्धिविग्रहिकेण यः ॥ ७ ॥

श्रीमदर्जुनभूपालराज्ये श्रावकसंकुले । जिनधर्मोदयार्थं यो नलकच्छपुरेऽवसत् ॥ ८ ॥

यो द्राग्व्याकरणाब्धिपारमनयच्छुश्रूषमाणान्न कान्
सत्तर्कं परमास्त्रमाप्य न यतः प्रत्यर्थिनः केऽक्षिपन् ।
चेरुः केऽस्खलितं न येन जिनवाग्दीपं पथि ग्राहिताः
पीत्वा काव्यसुधां यतश्च रसिकेष्वापुः प्रतिष्ठां न के ॥ ९ ॥

स्याद्वादविद्याविशदप्रसादः प्रमेयरत्नाकरनामधेयः ।
तर्कप्रबंधो निरवद्यपद्यपीयूषपूरो वहति स्म यस्मात् ॥ १० ॥

सिद्ध्यंकं भरतेश्वराभ्युदयसत्काव्यं निबंधोज्ज्वलं
यस्त्रैविद्यकवीन्द्रमोदनसहं स्वश्रेयसेऽरीरचत् ।
योऽर्हद्वाक्यरसं निबंधरुचिरं शास्त्रं च धर्मामृतं
निर्माय न्यदधान्मुमुक्षुविदुषामानंदसान्द्रे हृदि ॥ ११ ॥

आयुर्वेदविदामिष्टां व्यक्तुं वाग्भटसंहिताम् । अष्टांगहृदयोद्योतं निबंधमसृजच्च यः ॥ १२ ॥

यो मूलाराधनेष्टोपदेशादिषु निबंधनम् । व्यधत्तामरकोशे च क्रियाकलापमुज्जगौ ॥ १३ ॥
रौद्रटस्य व्यधात्काव्यालंकारस्य निबंधनम् । सहस्रनामस्तवनं सनिबंधं च योर्हताम् ।१४।
अर्हन्महाभिषेकार्चाविधिं मोहतमोरविम् । चक्रे नित्यमहोद्योतं स्नानशास्त्रं जिनेशिनाम् ॥१५॥
रत्नत्रयविधानस्य पूजामाहात्म्यवर्णनम् । रत्नत्रयविधानाख्यं शास्त्रं वितनुतेस्म यः ॥१६॥

प्राच्यानि संचर्च्य जिनप्रतिष्ठाशास्त्राणि दृष्ट्वा व्यवहारमैंद्रं ।
आम्नायविच्छेदतमश्छिदेयं ग्रंथः कृतस्तेन युगानुरूपः ॥ १८ ॥

खांडिल्यान्वयभूषणाल्हणसुतः सागारधर्मे रतो
वास्तव्यो नलकच्छचारुनगरे कर्ता परोपक्रियाम् ।
सर्वज्ञार्चनपात्रदानसमयोद्योतप्रतिष्ठाग्रणीः
पापात्साधुरकारयत्पुनरिमं कृत्वोपरोधं मुहुः ॥ १९ ॥
विक्रमवर्षसपंचाशीति द्वादशसतेष्वतीतेषु ।
आश्विनसितांत्यादिवसे साहसमल्लापराक्षस्य ॥ १९ ॥
श्रीदेवपालनृपतेः प्रमारकुलशेखरस्य सौराज्ये ।
नलकच्छपुरे सिद्धो ग्रंथोऽयं नेमिनाथचैत्यगृहे ॥ २० ॥

अनेकार्हप्रतिष्ठाप्तप्रतिष्ठैः केल्हणादिभिः । सद्यः सूक्तानुरागेण पठित्वायं प्रचारितः ॥ २१ ॥

यावद्विश्वोदयो जिनमंदिराणि तिष्ठन्ति शक्रादिभिरर्च्यमानाः ।
तावज्जिनादिप्रतिमाप्रतिष्ठा विधायिनोऽनेन विधापयंतु ॥ २२ ॥

किंच ।

नंदतात्खांडिल्यवंशोत्थः केल्हणो न्यासवित्तरः ।
लिखितो येन पाठार्थमस्य प्रथमपुस्तकम् ॥ २३ ॥

इति प्रशस्तिः ।

इत्याशाधरविरचितो जिनयज्ञकल्पापरनामा प्रतिष्ठासारोद्धारः समाप्तः ।

अब ग्रंथकारकी प्रशस्ति कहते हैं—" श्रीमान् " इत्यादि श्लोकसे लेकर २३ तक पं० आशाधरका वक्तव्य दिखलाया गया है ॥ १ से २३ ॥

इति पं० आशाधर विरचित जिनयज्ञकल्प द्वितीय नामवाला प्रतिष्ठासारोद्धार समाप्त हुआ ॥

समाप्तोऽयं प्रतिष्ठापाठः ।

१ " मन्निर्बंधं यथा जिनयज्ञकल्पमरीरचत् । त्रिषष्टिस्मृतिशास्त्रं यो निबन्धालंकृतं व्यधात् ॥ १ ॥
यह श्लोक ग्रन्थान्तरोंकी प्रतिमें अधिक है ।

प्रतिष्ठासारोद्धारका परिशिष्ट ।



मत्यातमावृतिहानिमूलविभवं लब्ध्यक्षराद्यागमप्रामोद्दामवपुः प्रकांडमुचिताचारादिशाखोच्चयम् ।
बाह्यश्रुत्युपशाखमुक्तिसुदलं सद्युक्तिपुष्पश्रुतस्कंधं स्वर्थफलाकुलं घनशमच्छायं भजेघच्छिदे ॥ १ ॥
षट्त्रिंशत्त्रिशतैरवग्रहमुखैः स्मृत्यादिभिः सोजसा मत्यै स्वावरणक्षयोपशमस्वस्वांतोत्थयात्मा यया ।
देशेनेहसि संकरव्यतिकरापोहेन वस्तूचिते योग्यं द्वादशधा बहुप्रभृतिभिर्विद्यात्पुरश्चारुदृक् ॥ २ ॥

एतद्द्वयं पठित्वा श्रुतस्कंधस्थापनार्थं पुस्तकोपरि पुष्पांजलिं क्षिपेत् ।

लोकालोकदृशः सदस्यसुक्तैरास्याद्यदर्थश्रुतं निर्यातं ग्रथितं गणेश्वरत्रृपेणांतर्मुहूर्तेन यत् ।
आरातीयमुनिप्रवाहपतितं यत्पुस्तकेष्वर्पितं तज्जैनेंद्रमिहार्पयामि विधिना यष्टुं श्रुतं शाश्वतम् ॥ ३ ॥

विधियज्ञप्रतिज्ञानाय पुस्तकोपरि पुष्पांजलिं क्षिपेत् ।

सर्पच्छीकरवारवारितपतद्भृंगांधभृंगव्रजं निर्यत्या कनकाद्रिशृंगसवयोभृंगारनालाननात् ।
स्वर्गंगाद्युपनीतपूतसुरभिद्रव्याढ्यवार्धारया स्यात्कारजननीं जगद्विजयिनीं जैनीं यजे भारतीम् ॥४॥ जलं।

---

१. यहांसे सरस्वतीदेवीकी पूजाका आरंभ है । इससे पहलेका " इंद्र " इत्यादि पाठ दूसरे अध्यायमें आगया है ।

अंतम्नागनिवर्हिणी बहु [illegible] शान्तिना [illegible] ।
स्याद्वादामृतवर्षिणी [illegible] श्रीनंदिन [illegible] ॥ ६ ॥ [illegible] ।
[illegible] ।
प्रत्याख्यान[illegible] । [illegible] ॥ ६ ॥
[illegible] ।
[illegible] ।
[illegible] ॥ ७ ॥ [illegible] ।
[illegible] ।
[illegible] ॥ ८ ॥ [illegible] ।
[illegible] ।
[illegible] ॥ ९ ॥ [illegible] ।
[illegible] ।
[illegible] ॥ १० ॥ [illegible] ।
[illegible] ।
[illegible] ॥ ११ ॥ [illegible] ।

सांविग्नप्रियधर्मभक्तिरसिका मेधाविनेयात्मनां कर्तुं सूरित्रैरनुग्रहमिमां सर्वज्ञवाक्पद्धतिम् ।
तां न्यस्तामिह पुस्तकेष्वधिकृतश्रीदेवतांगेषु वा सद्वस्त्रैः परिधापयामि विविधैः सद्बोधसंसिद्धये॥ १२॥ वस्त्रं ।
गंधाढ्योदकधारया हृदयहृद्गंधैर्विशुद्धाक्षतै रोचिष्णुप्रसवैर्विचित्रचरुभिः स्फारस्फुरद्दीपकैः ।
गीर्वाणस्पृहणीयधूमविलसद्धूपैः सुधारुक्फलस्तोमैः स्वस्तिकपूर्वकैश्च रचितं श्रुत्यै ददेर्घं विभोः ॥ १३ ॥

पुष्पांजलिः । नमोऽस्तु श्रुतज्ञानभक्तिकायोत्सर्गं करोम्यहम् णमो अरहंताणमित्यादि ।

देवि श्रीचतुराननप्रमुखांभोजाधिवासोत्सवे ब्राह्मि ब्रह्मकलाविकाशिनि जगन्मातस्तमोनाशिनि ।
एतानस्खलितस्वभक्तिनटितानध्यास्य शश्वद्यशोविद्यायुर्वसुविक्रमैरुपचिनु ब्रह्मादियज्ञे धिनु ॥ १४ ॥

एतत्पठित्वा प्रणमेत् । इति श्रुतपूजाविधानम् ।

अथ गुरुपूजा[1] ।

सदा सम्यक्त्वार्के प्रतपति विधूतांधतमसं लसद्विश्वालोकं विलसति वितार्केकनयने ।
भजंते ये वृत्तामृतमपि जने संविभजते घटत्पुष्टिं तेषामिह गणभृतां भानुचरणाः ॥ १५ ॥

पादुकास्थापनम् ।

इमास्तिस्रो गुप्तीरिव शमयितुं कल्मषरजश्चरंती चिच्छक्तीरिव बहिरुतान्वेष्टुमहितान् ।
सुवर्णालूनालात्सुरभिवपुराप्तानुपतिता लुठंतीरब्धाराः क्रमभुवि गुरूणां प्रणिदधे ॥ १६ ॥ जलधारा ।

---

१ अब गुरु पूजा कहते हैं ।

मुमुक्षूणां मैत्रमपवनिमपूर्वत्वनि हरारभीश्वं सौभीति समनित्तु पुनः नेगरत्वः ।
मर्मभिषिः मेतूरविपूरपत्वादत् पूरत्वः मूनाः श्रीतांश्चत्वरीतकन्दसांशिम्मितान् ॥ १७ ॥ गौर्य ।
गुणग्रामप्रेममुगनयारिणालोकश्मपनोपनः हाणैनायतनिमग्नु हलकुंमप्रलीभेः ।
दारुण्यश्रेगुण्यप्रगगनमनानार्यं वरणानुगन्धूनीलोभिरिधिविरमरमात्म्यश्रनयैः ॥ १८ ॥ गरदं ।
इवाम्बुयद्रकिमगनपुमनंगौम्निमुवनः सुमाणपशानूर्णान्यदनमर्दुरत्यवाभिः ।
पराणोद्गाराभिः प्रसरसुमनोभिः नूतनवां नवसमनर्चीनो मुनिवनितुग्रतीनिवर्तनः ॥ १९ ॥ पुर्न ।
निनिधैस्त्वमानायनरमनाम्बुद्वगुणैर्गवाहः स्वमानदिक्रनितु मुनोषु निधिभेः ।
परवनासानुप्रमदमगनिरिमानवनवां रमेशानागर्वा नगपुरागमश्मनैः ॥ २० ॥ नवं ।
तिमर्दहरुणपणगगनपुरमानंदनगमाद्रिमालिः मंत्रैश्चनविलमनःप्रीनमुक्तेः ।
मर्दीन्द्रियांकुलपूलपांगमपुरनां रकुरमरागीकुर्वश्वणरमनतम्याणमनोनम ॥ २१ ॥ वीर्य ।
उर्नपूंगपूर्णपञ्चपुलपनवूपमस्याविस्पर्शिद्रः धीरं प्रतिदिवसमुराणि रमणनिनाग ।
मनांसि प्रीणद्भिः गुणितमनसानारनवुरैः दार्गं पुरायासनस्मानार्थीरमस्वणान ॥ २२ ॥ पूर्ण ।
नगराश्माप्यीतालरसनासानांगमुपगामितरसाणैः श्रेणमात्रगुरमवेनः फलविशुम ।
मुरम्यैश्वोनानाकमुरुकलारप्रभातिभिः फलैः स्फारीकृतां गणितरवीतानवर्णाग ॥ २३ ॥ फलं ।

पयोधारात्रय्यामलयजरसैरक्षतचयैः प्रसूनैर्नैवेद्यैः प्रमदभरतो दीपनिकरैः ।
वरैर्धूपोद्गारैः फलचयकुशाद्यैश्च रचितं विदध्मोर्घं सूरिक्रमसरसिजोत्तारुचिरम् ॥ २४ ॥ अर्घं ।
पंचाचाराचरणसचिवाचारणैकक्रियाणां स्फारस्फूर्जद्गुणचितयशःशुभ्रिताशाधराणाम् ।
सेत्सूरीणामिति विधिकृताराधनाः पादपद्माः श्रेयोस्मभ्यं ददतु परमानंदनिःस्यंदसांद्रम् ॥ २५ ॥

एतत्पठित्वा पंचांगप्रणामं कुर्यात् । गुरवः पांत्वित्यादिः ।

अथ प्रतिष्ठासारसंग्रहस्य श्लोकाः ।

शुद्धं शुद्धात्मसद्भावं सिद्धसंज्ञानदर्शनम् । सिद्धं शुद्धप्रमाणाप्तिनिरस्तपरदर्शनम् ॥ १ ॥
विश्वकर्मार्थिलोकस्य विश्वकर्मोपदेशकम् । विश्वकर्मक्षयार्थिभ्यो विश्वकर्मक्षयप्रदम् ॥ २ ॥
आदिदेवं जिनं नौमि विश्वकर्मजयं प्रभुम् । शेषांश्च वर्धमानांताजिनान् प्रवचनं गुरून् ॥ ३ ॥
विद्यानुवादसत्सूत्राद्वाग्देवीकल्पतस्ततः । चंद्रप्रज्ञप्तिसंज्ञायाः सूर्यप्रज्ञप्तिसंज्ञिकात् ॥ ४ ॥
तथा महापुराणार्थात् श्रावकाध्ययनश्रुतात् । सारं संगृह्य वक्ष्येहं प्रतिष्ठासारसंग्रहम् ॥ ५ ॥
तत्र तावत्प्रवक्ष्यामि प्रतिष्ठाचार्यलक्षणम् । तस्योपदेशतो वक्ष्ये विश्वकर्मप्रवर्तनम् ॥ ६ ॥
शरण्यं सर्वभूतानां वरांगगुणभूषणम् । नत्वा जिनेश्वरं वीरं वच्म्याचार्येंद्रयोर्गुणम् ॥ ७ ॥

१ यहांसे **वसुनंदि** आचार्यकृत प्रतिष्ठासारसंग्रहका आरंभ है ।

पण्डितप्रवर श्रीआशाधर विरचित

प्रतिष्ठासारोद्धार

(संक्षिप्त भाषाटीकासहित)

समाप्त ।